In Public domain. Digitization Muthulakshmi Re...

உ

PRAMĀṆA TATTVA DĪPIKĀ

Proceedings of the National Seminar on

PRAMĀṆAS

Published by:

The Department of Sanskrit & Indian Culture

Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya

(University established under section 3 of the UGC act 1956)

(A unit of Kanchi Kamakoti Peetham charitable trust)

Enathur, Kanchipuram - 631561. Tamilnadu

2013

In Public domain. Digitization Muthulakshmi Research Academy

Vision of SCSVMV University

The true purpose of education is to prepare a student mind to find harmony with the culture of the land and mould the students into noble human beings with strong character, warmth and compassion. Enabling students to acquire knowledge in class rooms and technical skills in laboratory is just a necessary but not sufficient condition for student development. What is more important is to identify the innate talent of students and bring out their hidden potentialities to purpose for all round personality development, which will stand by them, in serving the society with responsibility and commitment later in career. Accent is on the fusion of Eastern thought and Western methodology in education. This is the vision of our Mahavidyalaya, which bears a unique stamp of identity.

In Public domain. Digitization Muthulakshmi.Research Academy

PRAMĀṆA TATTVA DĪPIKĀ

Proceedings of the National Seminar on

PRAMĀṆAS

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy



☎ : 044-27222115 Email: skmkanci@md3.vsnl.net.in.
Fax: 27224305

உ

Sri Chandramouleeswaraya Namaha:

Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvagnapeeta :

His Holiness Sri Kanchi Kamakoti Peetadhipathi

JAGADGURU SRI SANKARACHARYA SWAMIGAL

Srimatam Samsthanam

No. 1, Salai Street, KANCHIPURAM - 631 502.

Date :

नानाशास्त्रमहाम्बुधिं सुगहनं निर्मथ्य धीमन्थनात्
पीयूषं सुधियां प्रमाणमहितं तन्वन् सुविद्यालयः।
श्रीमच्चन्द्रिशेखरेन्द्रयमिनां नाम्ना प्रतिष्ठापितः
जीयात्कीर्तिविभूषितश्चिरमिह श्रीचन्द्रमौलीक्षणात्॥

प्रमाणाद्धि प्रमेयसिद्धिरिति प्रमाणमहिमकर्षो विद्योततेतमाम्। नानाशास्त्रमहाम्बुधेः प्रवेशनलिका प्रमाणमित्यत्र न मतिद्वैधम्। प्रमेयपदार्थानामियत्तया मानं प्रमाणादेव सम्भवति। अत एव शास्त्रेषु प्रमाणविमर्शः सुगहनो विहितः। अनुमानादिप्रमाणसिद्धावेवेश्वरादीनां सिद्धिरिति प्रमाणानि प्रमेयवस्तु वेदयन्ते। विषयममुं मनसि निधाय अस्मद्गुरुचरणानां महामहिमभाजां मूर्तीभूततपसां पुण्यनाम्ना प्रतिष्ठापितस्य श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयस्य संस्कृत विभागः प्रमाणविषयिणीं राष्ट्रियसङ्गोष्ठीं कतिपयेभ्यो मासेभ्यः प्राक्समयोजयत्। तस्याश्च निष्कर्षः प्रमाणतत्त्वदीपिकेति नाम्नेदानीं प्रकाश्यत इति ज्ञात्वा नितरां मोमुद्यते चेतो नः। श्रीमहात्रिपुरसुन्दर्यम्बासमेतश्रीचन्द्रमौलीश्वरस्य अपारकरुणादृष्ट्या ग्रन्थोऽयं धीधननिधिरिव विभ्राजतामिति विश्वविद्यालयस्य संस्कृतविभागश्चैवमेव शास्त्रविमर्शादिना सुरभारतीसुरभिप्रसारं वितनुतामिति तत्समायोजकाश्चैहिकाष्मिकश्रेयोविलासैस्समेधन्तामिति, पठितारोऽस्य ग्रन्थस्य शास्त्रज्ञानप्रकाशविद्योतमान विभवाः विलसन्त्विति चाशास्महे।

नारायणस्मृतिः।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

(भारतीयसर्वकारस्य मे २६, १९९३ दिनाङ्कस्य F.9.9/92-U.3 प्रकटनसङ्ख्यायुतस्य विश्वविद्यालयानुदानायोगस्य १९५६ नियमे तृतीयविधिमनुसृत्य मानितविश्वविद्यालयत्वेन प्रकटीकृतः)

SRI CHANDRASEKHARENDRA SARASWATHI VISWAMAHAVIDYALAYA

(SCSVMV)

(Declared as Deemed-to-be University established under section 3 of the UGC act 1956 Vide notification No F.9.9/92-U.3 dated 26th May 1993 of the Govt. of India)

Enathur Kanchipuram - 631561

Prof. Dr. Vishnu Potty V.S.

Vice-Chancellor (Officiating)

FOREWORD

It is a well established fact that the Orthodox systems or the darsanas have their roots in Vedas. From the beginning of the human civilization man had a strong quest to know the ultimate reality. Pramana is a means to acquire the real knowledge. The Indian system of Philosophy accepted mainly six Pramanas viz; Perception, Inference, Analogy, Presumption, IMon-apperhension, and Scripurtal or Verbal authority. The acceptance of pramanas can be explicit or implicit. The Vaishesikas lists only Pratyaksa and Anumana as Pramanas. But still the vaisheshika system of philosophy is treated as an Astika darsana, because it does not reject Vedapramana and recognizes Vedic knowledge and methods as the means to reach final goal or liberation. Thus it's acknowledgement of Veda is implicit and not explicit. Similarly, Sankhya does not list analogy, but applies it as a part of logical inference making it an implicit acknowledgement. But in a modern perspective there is a dire need for a proper and in depth inquiry into various Pramanas accepted by different schools of theism.

Hence a National seminar on Pramanas has been rightly planned by the Dept. of Sanskrit and Indian culture to open new avenues in the field of Indian philosophy with modern outlook.

It is highly appreciable that within a short notice of time several great scholars and budding researchers enthusiastically participated in the seminar. I specially appreciate Dr. A Venkata Radheshyam for providing a wonderful platform for serious debates and discussions on various themes relating to the topic. I am sure that these proceedings of the seminar will open new vistas in the field of Pramanas.

☎ 044-27296815 (O) 044-27264408 | Mobile : (P) 9445783508 (O) 9597387773 | Fax : 044-27264295 | e-mail : vc@kanchiuniv.ac.in (O) Website : www.kanchiuniv.ac.in

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणतत्त्वदीपिका

(Proceedings of National Seminar of Pramanas)

23-24 February, 2012

प्रधानसम्पादकः

आचार्य विष्णुपोत्ति वि.एस्.

कुलपतिः

सम्पादकः

डा. अं. वेङ्कटराधेश्यामः

श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

एनाचूर्, काञ्चीपुरम्

२०१३

In Public domain. Digitization Muthulakshmi Research Academy

PRAMĀṆA TATTVA DĪPIKĀ

(Proceedings of theNational Seminar of Pramanas)

23-24 February, 2012

Chief Editor :

Prof. Dr. Vishnu Potty V.S.

Editor:

Dr. A.Venkata Radhe Shyam

All rights reserved.

First Edition: 2013

ISBN: 13 978-81-925639-3-0

Copies: 250

Price : Rs. 400/-

Published by :

The Registrar

S.C.S.V.M.V. University

Enathur, Kanchipuram

Printed at: J.P.A.1. Press, Chennai - 600 064.

Cell: 9283186778.

In Public domain. Digitization Muthulakshmi Research Academy

प्रास्ताविकं किञ्चित्

इह खलु प्रपञ्चे सुखप्राप्तिं दुःखनिवृत्तिञ्च कामयमानाः सर्व एव प्राणिनः सुखसाधनेषु प्रयतन्ते, निवर्तन्ते च दुःखसाधनेभ्य इति सार्वजनीनमेव । सुखप्राप्त्यर्थं सुखसाधनानां ग्रहणम्, तत्साधनाभासानाञ्च परिवर्जनम् एवं दुःखसाधनानां परिवर्जनं तथा यानि दुःखसाधनत्वेन भासमानानि वस्तुतः सुखसाधनानि तेषां ग्रहणमप्यावश्यकम्। ग्रहणे च तस्मिन् समीचीने प्रमाणानामावश्यकता अवर्जनीया । तदुक्तं न्यायभाष्ये - **प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्।** प्रमाणमन्तरेण नार्थप्रतिपत्तिः नार्थप्रति पत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्, प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा, तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते, सामर्थ्यं पुनरस्याः फलेनाऽभिसम्बन्धः, समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा। अर्थस्तु सुखं सुखहेतुश्च दुःखं दुःखहेतुश्च सोऽयं प्रमाणार्थोऽपरिसंख्येयः प्राणभृद्भेदस्याऽपरिसंख्येयत्वात्। अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति, कस्मात्? अन्यतमापायेऽर्थस्यानुपपत्तेः। तत्र यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता, स येनार्थं प्रमिणोति तत्प्रमाणम्। योऽर्थः प्रमीयते तत्प्रमेयम्। यदर्थविज्ञानं सा प्रमितिः, चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते इति।

प्रमाणस्वरूपम्

प्रमाकरणं प्रमाणमिति प्रमाणलक्षणं सर्वेषु दर्शनेषु समानम्, तथापि प्रमालक्षणं न समानम्।

मानमेयोदये प्रमाणनिरूपणावसरे इत्थं लक्षणमभिहितम् -

प्रमाकरणमेवात्र प्रमाणं तर्कपक्षवत् ।
प्रमा चाज्ञाततत्त्वार्थज्ञानमेवात्र भिद्यते ।। इति ।

प्रमाणां यदसाधारणं कारणं तत्प्रमाणम्। तत्र प्रमा नाम अज्ञाततत्वार्थज्ञानम्। अनधिगताबाधितवस्तुविषयकं ज्ञानमिति । एवञ्च अनधिगताबाधितार्थविषयकज्ञानजनकं प्रमाणमिति सिद्ध्यति। फलार्थं हि प्रमाणानां स्वीकारात् अर्थपरिच्छेदे वा व्यवहारे वा अनुवादः न किञ्चित् वैलक्षण्यं सम्पादयतीति फलविशेषाभावात् अनुवादः न प्रमाणम्। "तस्मादज्ञाततत्वार्थज्ञानसाधनमेव नः" इति वाक्येन अनधिगताबाधितार्थविषयकज्ञानजनकं प्रमाणमिति स्थिरीकृतम्।

प्रमाणशब्दो हि भगवता न्यायभाष्यकारेण वात्स्यायनेन एवं व्युत्पादितः 'उपलब्धिसाधनानि प्रमाणानि इति समाख्यानिर्वचनसामर्थ्यात् बोद्धव्यम्। प्रमीयते अनेन इति करणार्थाभिधानः हि

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणशब्दः' इति। 'माङ् माने शब्दे च' इत्यस्मात् धातोः प्रोपसर्गकात् प्रमाशब्दः यथार्थज्ञानवाची निष्पन्नः। 'करणाधिकरणयोश्च' इति सूत्रेण करणार्थे विवक्षिते 'ल्युट् च' इति सूत्रेण ल्युट्प्रत्यये कृते प्रमाणशब्दः निष्पन्नः। यद्यप्यनया व्युत्पत्या ज्ञानकारणमित्येतावानेव अर्थः लभ्यते, स च न विवक्षितः ज्ञानसामान्य-साधनेषु इन्द्रियसन्निकर्षादिषु प्रमाणशब्दाप्रयोगात्, तथापि भगवता भाष्यकारेण एव 'तद्विशेषसमाख्यायाः अपि तथैव व्याख्यानम्' इति वाक्येन प्रत्यक्षादिशब्दानामपि करणव्युत्पत्तिमेव दर्शयित्वा पुनः 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यम्, अव्यभिचारि व्यवसायात्मकं प्रत्यक्षमि'ति प्रत्यक्ष-सूत्रव्याख्यानावसरे विशिष्टकारणवाची प्रत्यक्षशब्दः इति 'यत् प्रत्यक्षज्ञानस्य विशिष्टं कारणं तत् उच्यते' इति भाषणात् तत्सामान्येन प्रमाणशब्दस्यापि कारणविशेषः एव अर्थः इति निश्चेतुं शक्यम्।

विशिष्टकारणशब्देन च असाधारणं कारणमेव अभिप्रेतमिति प्रतिपादयन्ति वार्तिककाराः। तेषां वाक्यं 'यत् प्रत्यक्षस्य असाधारणं कारणं तत् अभिधीयते' इत्यस्मिन् अर्थे उपोद्बलकं भवति। ततश्च तत्सामान्यात् प्रमायाः असाधारणं कारणमेव प्रमाणशब्दस्य अर्थः इति लभ्यते । न्यायमञ्जरीकाराः जयन्तभट्टाः तावत् 'अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम्' इति वाक्येन यथार्थज्ञानजनककारणसमुदायरूपा सामग्री एव प्रमाणमिति प्रतिपादयन्ति।

द्वैतदर्शने यथार्थज्ञानं तत्करणञ्चेति उभयमेव प्रमाणमित्युच्यते । ज्ञानं भावव्युत्पत्या, करणं च करणव्युत्पत्या प्रमाणशब्देन गीयते। अतः तदुभयसाधारणं प्रमालक्षणं 'याथार्थ्यमेव मानत्वं तन्मुख्यं ज्ञानशब्दयोः' इति निरूपितम्। **यथार्थं प्रमाणम् -** यथाशब्दः अनतिक्रमार्थः। प्रमेयम् अनतिक्रम्य वर्तमानं प्रमाणम्। यथावस्थितार्थविषयीकारित्वं प्रमाणस्य लक्षणमिति तदर्थः। यथा ज्ञानस्य सविषयत्वं तथा करणस्यापि इति तन्मतम्। तथा च ज्ञाने करणे च लक्षणमिदं समन्वितं भवति। तत्र यथार्थज्ञानं केवलप्रमाणम्। तत्साधनमनुप्रमाणम्। प्रत्यक्षानुमानागमभेदात् तदेतत्प्रमाणं त्रिविधमिति च स्वीकृतम्।

प्रमाणसंख्या

तत्र चार्वाकदर्शनं प्रत्यक्षस्यैव प्रामाण्यं स्वीकरोति। सौगतमार्हतञ्च दर्शनमनुमानस्यापि प्रामाण्यमुररीकरोति। वैशेषिकदर्शनं विहाय रामानुजप्रभृतीनि शाबरपर्यन्तानि सर्वाणि दर्शनानि प्रत्यक्षानुमानाभ्यां सह शब्दस्यापि प्रामाण्यं स्वीकुर्वन्तीति प्रमाणत्रयवादीनि। उपमानस्यापि पृथक् प्रामाण्यं स्वीकृत्य प्रमाणचतुष्टयवादिनो नैयायिकाः संवृत्ताः। प्राभाकराः कथितेन प्रमाणचतुष्टयेन सहार्थापत्तिमपि स्वीकुर्वन्ति। भाट्टास्तु प्रमाणपञ्चकेन सहानुपलब्धिमपि प्रमाणं मन्यन्ते। वेदान्तिनः प्रमाणविषये भाट्टमतमेव पुरस्कुर्वन्ति। पौराणिकाः सम्भवैतिह्ययोः पृथक् प्रामाण्यं वदन्ति। तदुक्तं

In Public domain. Digitization Muthulakshmi Research Academy

मानमेयोदये-

> चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
> भासर्वज्ञस्सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।
> प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः
> षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्।।

एतदतिरिच्य लोकाख्यं नवमम्, आर्षञ्च दशमं प्रमाणमिति केषाञ्चिन्मतं श्रूयते।

प्रत्यक्षम्

न्यायदर्शने प्रत्यक्षलक्षणमित्थं सूत्रितम् - **इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यम-व्यभिचारि व्यवसायात्मकं प्रत्यक्षम्** इति। तत्र भाष्यम् - इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यज्ज्ञानं तत्प्रत्यक्षम्, न तर्हीदानीमिदं भवति - आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति?, नेदं कारणावधारणम् - एतावत् प्रत्यक्षे कारणम् इति किं तु विशिष्टकारणवचनमिति यत् प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते इति ।

प्रत्यक्षविषये जैमिनीयं सूत्रमित्थं समुपलभ्यते **सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति**। संश्चासौ सम्प्रयोगश्च सत्सम्प्रयोगः। इन्द्रियाणां विषयैस्सह सम्प्रयोगे सति पुरुषस्य या बुद्धिर्जायते तत्प्रत्यक्षमित्यर्थः । पदार्थैस्साकं चक्षुरादीन्द्रियाणां संयोगानन्तरं भ्रमस्य जायमानत्वात् भ्रमात्मकप्रत्यक्षेऽपि इन्द्रियार्थसन्निकर्षजन्यत्वमस्तीति भ्रमे अतिव्याप्तमिदं लक्षणमिति शङ्कायां सूत्रस्यास्य प्रत्यक्षलक्षणकथने सूत्रकारस्य न तात्पर्यम् । अपि तु धर्मं प्रति प्रत्यक्षस्य अप्रमाणत्व- कथने एव। प्रत्यक्षं यतः विद्यमानविषयकमतः कालान्तरभाविधर्माधर्मयोः न प्रमाणमिति। अथवा संयोगशब्दस्य इन्द्रियाणां विषयैस्सह समीचीनः प्रयोगः इत्यत्रैव तात्पर्यम्। तेन भ्रमसंशययोः प्रत्यक्षागम्यत्वात् नातिव्याप्तिरिति प्रतिपादितम् ।

वेदान्तपरिभाषायां प्रत्यक्षप्रमाणनिरूपणसन्दर्भे, प्रत्यक्षप्रमा च अत्र चैतन्यमेव। यत्साक्षात् अपरोक्षाद्ब्रह्म इति श्रुतेः। अपरोक्षादित्यस्य अपरोक्षमित्यर्थः इति प्रत्यक्षप्रमायाः चैतन्यरूपत्व-मभिहितम्। नैयायिकास्तु जडस्यापि इन्द्रियार्थसन्निकर्षोत्पन्नस्य ज्ञानस्य प्रत्यक्षत्वं स्वीकुर्वन्ति। वेदान्तिनस्तु केवलायाः वृत्तेः जडत्वात् प्रमात्वमस्वीकृत्य वृत्तिप्रतिबिम्बितचैतन्यस्य प्रमात्वं वर्णयन्ति। नैयायिकाः इन्द्रियस्य करणत्वं स्वीकृत्य प्रत्यक्षस्य षड्विधत्वं व्यवस्थापयन्ति। तत्र मनोरूपेन्द्रियजन्यप्रत्यक्षस्य मानसत्वं स्वीकुर्वन्ति । वेदान्तिनः मनसः इन्द्रियत्वप्रतिपादकश्रुत्याद्य-

In Public domain. Digitization Muthulakshmi Research Academy

भावात् तस्य अनिन्द्रियत्वमेव स्थापयन्ति। अतः वेदान्तिमते मनोऽतिरिक्तं चक्षुराद्येव प्रत्यक्षप्रमाकरणं भवति। नैयायिकाः अलौकिकप्रत्यक्षे सामान्यलक्षण - ज्ञानलक्षण - योगजरूपं त्रिविधमलौकिक-सन्निकर्षं व्यापारत्वेन गणयन्ति, यश्च इतरे दार्शनिकाः नाभ्युपगच्छन्ति।

अनुमानम्

अनुमिनोमीत्यनुव्यवसायगम्यायाः अनुमितेः करणमनुमानं भवति। अस्य चानुमानस्य प्रत्यक्षपूर्वकत्वं त्रैविध्यञ्च - **अथ तत्पूर्वकं त्रिविधमनुमानम्** इति न्यायसूत्रेण बोध्यते। प्रत्यक्षस्य अनुमानकारणत्वमुक्तम्, प्रत्यक्षञ्चात्र साध्यसाधनयोः व्याप्यव्यापकभावसम्बन्धविषयकं साधन-विषयकञ्च भवति। कारिकावल्यां - **त्रैविध्यमनुमानस्य केवलान्वयिभेदतः, द्वैविध्यन्तु भवेद्-व्याप्तेरन्वयव्यतिरेकतः** इति अनुमानम् अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति अनुमानस्य त्रिविधं, व्याप्तिः अन्वयव्यतिरेकाभ्यां द्विविधेति च निरूपितम् । मीमांसकमते - **अनुमानं ज्ञातसम्बन्धस्य एकदेशदर्शनात् एकदेशान्तरे असन्निकृष्टेऽर्थे बुद्धिमुत्पादयति** इति भाष्यकारैः अनुमानं निरूपितम् । एवं मीमांसकाः केवलव्यतिरेक्यनुमानं न सम्भवति, व्याप्तिविशिष्टपक्ष धर्मताज्ञानस्य अनुमितिकरणत्वात् व्यतिरेकव्याप्तेः साध्याभावनिष्ठायाः पक्षधर्मे हेतौ असत्त्वेन तदसम्भवात् इति न्यायमतम् आक्षिपन्ति। उदयनाचार्यैः अभावयोस्सहचारेण भावयोः व्याप्तिः गृह्यते। तत्र नियामकस्तु प्रतियोग्यनुयोगिभावः इति समाहितम् । एवं न्यायावयवानां पञ्चत्वं पौनरुक्त्यदोषेण दूषयित्वा - **तर्कबौद्धमते हित्वा वयं त्र्यवयवे स्थिताः** इति मीमांसकाः त्र्यवयववादिनस्संवृत्ताः । एवमनुमितिं प्रति विशिष्टपरामर्शस्य कारणतायां गौरवमापाद्य ज्ञानद्वयस्य कारणत्वं कल्पयन्ति मीमांसकाः।

उपमानम्

नैयायिकाः संज्ञासंज्ञिसम्बन्धज्ञानम् उपमितिः, सा च उपमानरूपप्रमाणजन्या। गोसदृशो गवयः इत्यतिदेशवाक्यं श्रुतवतः गोसदृशं पिण्डविशेषं पश्यतः अतिदेशवाक्यार्थं स्मरतः सन्निकृष्ट-व्यक्तिविषयिणी अयमसौ गवयपदवाच्यः इति प्रतीतिः जायते । तत्र वाच्यवाचकभावज्ञानरूपोपमितेः करणं सादृश्यज्ञानरूपम् उपमानमिति स्वीकुर्वन्ति। भाट्टाः एतत्सदृशी मदीया गौः इत्याद्याकारकस्य ज्ञानस्यैव उपमितित्वं स्थापयन्ति । सा चोपमितिः गोसदृशोऽयमिति गवयगतसादृश्यप्रत्यक्षात् गोपिण्ड-स्मरणसहकृतात् जायते इति गोसदृश्योऽयमिति ज्ञानमुपमानम् अतिरिक्तं प्रमाणमिति स्वीकुर्वन्ति । वैशेषिकाः अयं गवयपदवाच्यः इति ज्ञानस्य अनुभूतप्रत्यभिज्ञारूपत्वं स्वीकृत्य उपमानस्य प्रमाणा-न्तरत्वं निराकृत्य अनुमाने अन्तर्भावं वर्णयन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

शब्दः

आप्तवाक्यं शब्दः इति शब्दस्य लक्षणं भवति। शब्देन शाब्दबोधे जननीये शक्तिज्ञानं सहकारि। शक्तिश्च ईश्वरेच्छारूपा इति नैयायिकाः। मीमांसकाः ईश्वरानङ्गीकर्तारः तस्याः शक्तित्वं निराकुर्वाणाः, इच्छायाः सम्बन्धभावमनापन्नायाः प्रतियोग्यनुयोगिनोः असम्भवेन दोषेण दूषयन्तः पदार्थान्तरत्वमेव स्वीकृत्य शब्दार्थयोः सम्बन्धस्य साहजिकत्वं व्यवस्थापयन्ति तत्रैवं सूत्रितम् ।

औत्पत्तिकस्तु शब्दस्य अर्थेन सम्बन्धः तस्य ज्ञानम् उपदेशः अव्यतिरेकश्च अर्थे अनुपलब्धे तत् प्रमाणं बादरायणस्य अनपेक्षत्वात् । (१-१-५)

एवमसमग्रवाक्यप्रयोगस्थले अर्थाध्याहारमेव स्वीकृत्य शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितित्वेनैव उपस्थितेः कारणत्वं निराकुर्वन्ति। एवं पदवाक्य शक्तिलक्षणादिविषये गभीरः मतभेदः प्रसिद्ध एव । द्वैतदर्शने निर्दोषः शब्दः आगमः, शाब्दबोधे शब्दज्ञानं करणं, शक्तिस्मरणं सहकारि। पदार्थोपस्थितेः शक्तिस्मरणेनैव अन्यथासिद्धत्वात् अकारणत्वञ्चेति स्थापितम् ।

अर्थापत्तिः

अर्थापत्तिः प्रमाणान्तरमिति मीमांसकानां समयः तत्स्वरूपं शाबरभाष्ये इत्थं निरूपितम् "**...अर्थापत्तिरपि दृष्टश्श्रुतो वा अर्थः अन्यथा नोपपद्यते इत्यर्थकल्पना** " इति । दृष्टस्य श्रुतस्य वा अर्थस्य अनुपपत्तिज्ञानेन उपपादककल्पनम् अर्थापत्तिः इति तदर्थः। सामान्यतो बोधकस्य प्रमाणस्य विशेषबोधकप्रमाणेन सह विरोधज्ञाने जाते अविरोधनिर्वाहकार्थान्तरकल्पनम् अर्थापत्तिरिति फलितोऽर्थः ।

वैशेषिकास्तु अर्थापत्तेः प्रमाणान्तरत्वं निराकुर्वाणाः ताम् अनुमाने अन्तर्भावयन्ति। तदुक्तं वैशेषिकसूत्रोपस्कारे अर्थापत्तिरप्यनुमानमेव । तथाहि दृष्टार्थापत्तिस्तावज्जीवतश्चैत्रस्य गृहासत्त्वेन दृढतरप्रमाणावधृतेन बहिःसत्त्वं कल्पयति । तत्रोपपाद्योपपादकयोर्व्याप्यव्यापकभावावधारणाधीनैव बहिःसत्त्वप्रतीतिः, भवति हि जीवतो गृहासत्त्वं बहिःसत्त्वेन सहचरितं, बहिःसत्त्वं विना जीवतो गृहासत्त्वमनुपपन्नमिति वा ज्ञानम् । तत्राद्येऽन्वयव्याप्तेरेवान्त्ये तु व्यतिरेकव्याप्तेरेव ग्रह इति । व्याप्तिरिति न तस्य ग्रहणमिहोपयुज्यते इति चेत् व्याप्तिग्रहमन्तरेणार्थापत्त्याभासानवकाशात्, स्वरूपसत्या व्याप्त्या वस्तुतो यदुपपादकं तस्यैव कल्पना स्यादिति दिक्। संशयकरणिकाया विरोधकरणिंकायाश्चानुमानान्तर्भाव ऊहनीयः। विरोधस्यापि सहानवस्थाननियमलक्षणस्य व्याप्तिघटितत्वात् । श्रुतार्थापत्तिरप्यनुमितानुमानं - पीनो देवदत्तो दिवा न भुङ्क्ते इत्यनेन वाक्येन पीनत्वमनुमितं तेन च पीनत्वेन रात्रिभोजनानुमानम् - देवदत्तो रात्रौ भुङ्क्ते दिवाऽभोजित्वे सति पीनत्वासम्भवादिति। अनया प्रणाल्या अर्थापत्तेः अनुमाने अन्तर्भावमिच्छन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

अनुपलब्धिः

नैयायिकास्तावत् - **विशेषणतया तद्वदभावानां ग्रहो भवेत्** इत्यादिनाऽभावोपलब्धौ विशेषणतासन्निकर्षसचिवस्येन्द्रियस्य करणत्वं व्यवस्थापयन्ति । भाट्टास्तु एवमभिप्रयन्ति अभावज्ञानं हि प्रतियोग्युपलम्भविरह एव भवतीति योग्यप्रतियोग्युपलम्भाभावस्याऽभावज्ञाने कारणताऽवश्यमभ्युपगन्तव्या, तत्र प्रतियोग्युपलम्भाभावस्यैव कारणत्वकल्पनया निर्वाहे इन्द्रियस्य तत्र कारणतायां युक्तिविरहेणेन्द्रियाजन्यत्वभावज्ञानस्य, अभावज्ञानस्य च प्रत्यक्षादिप्रमाणचतुष्कानन्तर्गततयाऽतिरिक्तत्वमप्येवं सिद्धं भवतीति ।

नैयायिकाः तावत् आपाद्य प्रत्यक्षविषयीभूतघटाद्यभावे इन्द्रियसन्निकर्षादिकारणस्तोमसद्भावेऽपि घटग्रहाभावः अनुपलब्धिर्नाम । भूतले घटो नास्तीत्याद्यभावप्रमायाम् अनुपलब्धिः कारणम् । अस्याश्च धर्मिग्राहकेन्द्रियसन्निकर्षादिसहकारित्वमात्रेणैवोपपत्तौ न करणत्वं, न वा तज्जन्यज्ञानस्य अतिरिक्तप्रमितित्वम् । किन्तु प्रत्यक्षरूपतैवेत्ययं विषयः -

> प्रतिपत्तेः आपरोक्ष्यात् इन्द्रियस्यानुपक्षयात् ।
> अज्ञानकरणत्वात् च भावावेशाच्च चेतसः।।
> प्रतियोगिनि सामर्थ्यात् व्यापारव्यवधानतः।
> अक्षाश्रयत्वात् दोषाणामिन्द्रियाणां विकल्पनात् ।।

इति कारिकामुखेन उदयनाचार्यैः निरूपितम्।

उपसंहारः

परमात्मनः सदनुग्रहात् समारब्धा प्रमाणतत्त्वदीपिका एवं रूपेण प्राकाश्यमुपनीतेति महत् परितोषस्थानम्। तत्तद्विषयपरिशीलने, परिशोधने, तत्प्रकटनसौन्दर्ये च पारदृश्वानः विद्वत्तल्लजाः ग्रन्थेत्र अक्षररूपाः दरीदृश्यन्ते । पत्रसमर्पणसमये वायुलीनां तत्तद्ध्वनियन्त्रजां श्रुतिं पत्रबन्धनेन शाश्वतीं कर्तुं, तथा भाविपरिशोधकानां महदुपकर्तुं च प्रयतमानानां बद्धकटीनाम् अस्मत्कुलपतिवरान् साधितविष्णुप्रीतिवैभवान् **डा.विष्णुपोत्ति वि.एस्.** महाभागान् पौनःपुनिकमभिनन्दितुमीप्सति मे चित्तम् ।

मां चास्य महतो ग्रन्थस्य सम्पादकं कृत्वा परिचिक्षिषमाणान् कुलसचिववरान् प्राचार्य **डा.गुळ्ळपल्लि श्रीनिवासु** महोदयान्, सङ्कायप्रमुखान् प्राचार्य **डा.नारायण जी झा** महाभागांश्च उद्दिश्य, कृतज्ञतान्वितनमस्सुमाञ्जलिं प्रविकिरामि, **चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः** - इति नन्दामि ।

In Public domain. Digitization Muthulakshmi Research Academy

अपि चास्मिन् सन्दर्भे, शाब्दिकपथप्रियगामुकान्, चुलुकितयोगायुर्वेदपाथोनिधीन्, अद्यतनीन विभागाधिपान् तत्र भवतः श्री.डा.एस्. वेणुगोपालमहाभागान् उद्दिश्य सप्रणामं कार्तज्ञ्यसुमाञ्जलिं प्रविकिरामि।

तथा ज्ञानवृद्धान्, आचार्यपदालङ्कारभूतान्, शिलानिबद्धप्राक्तनवर्णकदम्बपठनपाठनरचणान्, आचार्यवरान् श्री पिसिपाटि रामकृष्णमहाभागान्, एवं सदस्सञ्चालने महे आप्रारम्भमासमाप्ति मां कर्तव्योन्मुखं कुर्वतः परमाचार्यपरमभक्तान्, शिवकेशवाद्वैतभावनापुलकितान्तरङ्गान्, तत्र भवतः श्री. डा. ग. शङ्करनारायणन् महाभागांश्च कार्यसाफल्यात्मकेऽस्मिन् क्षणे भृशं प्रध्यायामि, प्रणौमि, प्रणमामि च।

विचिकित्सास्पदे प्रमाणतत्त्वपरामर्शने तत्तद्दर्शनकाराणामभिमतं निर्णयविधानं च सहृदय-पाठकाः विमृश्य, शास्त्रीयाभ्यवहारेणानेन तृप्तास्स्म इति घोषयन्तु प्रमाणविषयकपत्रान्तरेक्षेहा-निरीहाः। तदा मन्यामहे विश्वविद्यालयकृतमिदं प्रकाशनं सुकृतमिति।

- विदुषामनुचरः

अं. वेङ्कटराधेश्यामः

In Public domain. Digitization Muthulakshmi Research Academy

श्रीचन्द्रशेखरकृपापारिप्लवसुशोभितः।
विश्वविद्यालयोऽयं हि स्वतः प्रामाण्यशोभितः।।
स एव साक्षादस्माभिः ईक्षितः किल निश्चयम्।
तत्र प्रमाणं, प्रत्यक्षं, अहो तत् ब्रह्मदर्शकम्।।
तद्दर्शनेन चास्माभिः ब्रह्मानन्दाख्यचित्सुखम्।
अनुभूतं तदेवास्तु चानुमानप्रमाणतः।।
औपम्यं नास्ति निर्धार्यवक्तुं किं तत्प्रमाणकम्।
किन्त्वात्मवेदिनां ज्ञाने गौरयं, तत्प्रमाणकम्।।

'जय'

In Public domain. Digitization Muthulakshmi Research Academy

अन्तरङ्गदर्शिनी

	विषयः	वक्ता	पु.सं
1.	प्रमाणेषु वेदः कल्पमहीरुहः	म.म.आर्.कृष्णमूर्तिशास्त्री	१-८
2.	सांख्यदर्शनरीत्या प्रमाणविमर्शः	आचार्यः वि.एस्.विष्णुपोत्ति	९-१०
3.	व्याकरणदर्शन प्रमाणविचारः	डा.विश्वनाथ गोपालकृष्णशास्त्री	११-१६
4.	प्राभाकरसम्मतम् अर्थापत्तिस्वरूपम्	आचार्यः का.ई.देवनाथन्	१७-१९
5.	मीमांसकसंसतम् अर्थापत्तिप्रमाणम्	डा.मणिद्राविड् शास्त्री	२०-२२
6.	मीमांसकमते अनुपलब्धिः शब्दप्रमाणविषये,नानार्थकशब्दप्रयोगस्थले तात्पर्यनिर्णायकप्रमाणविषये च	डा.देवदत्त गोविन्द पाटिल्	२३-२४
7.	व्याकरणशास्त्रसिद्धान्तकृतामाशयप्रदर्शनम्	आचार्यः श्रिष्टि लक्ष्मीप्रसन्नाञ्जनेयशर्मा	२५-३६
8.	उपमाननिरूपण.म्	आचार्यः का.ई.मधुसूदनन्	३७-४४
9.	प्रमाणानां श्रुतिमूलकत्वम्	डा.चिर्रावूरि श्रीरामशर्मा	४५-४८
10.	प्रमाणमीमांसा	विद्वान् हित्लळ्ळि सूर्यनारायणनागेन्द्रभट्टः	४९-५४
11.	अद्वैतवेदान्तशास्त्रे प्रत्यक्षविचारः	डा.श्रिष्टि लक्ष्मीकुमारशर्मा	५५-६५
12.	आयुर्वेदेऽङ्गीकृतानि प्रमाणानि	डा.एस्.वेणुगोपालन्	६६-७४
13.	प्रमाणसामान्यनिरुक्तिः	डा.के.विश्वनाथः	७५-७८
14.	जातिशक्तिवादविमर्शः	डा.अं.वेङ्कटराधेश्यामः	७९-८१
15.	अद्वैतदर्शने प्रमाणप्रयोजनविवेचनम्	डा.धूळिपाळ रामकृष्णः	८२-८५
16.	द्वैतनये प्रत्यक्षस्वरूपम्	डा.ए.वि.नागसम्पिगे	८६-९३
17.	द्वैतदर्शने प्रमाणस्वरूपम्	आचार्यः अ.हरिदासभट्टः	९४-९६
18.	स्मृतिज्ञानस्य प्रमात्वम्	डा.वासुदेवन्	९७-१०१
19.	अद्वैतिनां शाब्दापरोक्षवादः	डा.गणेश ईश्वर भट्टः	१०२-१०८
20.	इन्द्रियाणां प्राप्यकारितायाः विषये शास्त्रविज्ञानयोः अभिप्रायाः	विद्वान् श्रीरमणशर्मा	१०९-१११
21.	प्रमाणेषु शब्दः	डा.चिन्तलपाटि सत्यनारायणशास्त्री	११२-११५
22.	न्यायदर्शनरीत्या प्रत्यक्षस्य प्रमाणम्	डा.रामचन्द्रुल बालाजी	११६-११८

	विषयः	वक्ता	पु.सं
23.	अद्वैते प्रमाणविमर्शः	डा.के.गणपतिभट्टः	११९-१२२
24.	अनुमानं स्वतन्त्रं प्रमाणम्	डा. नावल्पाक्कं रामानुज श्रीधरन्	१२३-१२४
25.	अनुपलब्धेः प्रमाणान्तरत्वनिरासः	डा.जि.जयमाणिक्यशास्त्री	१२५-१२६
26.	प्रमाणमीमांसा	डा.श्रीरामः ए.एस्.	१२७-१३४
27.	मात्रास्पर्शतः मतिमितिः	विद्वान् रघुवीर बिल्लिगदे	१३५-१४३
28.	तर्कप्रयुक्तप्रत्यक्षप्रपञ्चनस्य पाक्षिकत्वम्	आचार्यः मञ्जुनाथ न.हेगडे	१४४-१४७
29.	प्रमाणेषु साक्षिप्रत्यक्षस्य वैशिष्ट्यम्	विद्वान् सुमन् के.एस्., डा.एस्.एन्.प्राणेशः	१४८-१५२
30.	प्रमाणविषयतयोः परस्परम् उपकार्योपकारकभावः	श्री सन्दीपकुमारशर्मा	१५३-१५५
31.	केवलव्यतिरेक्यनुमानम्	श्री का.ई.गोपालदेशिकन्	१५६-१६१
32.	योग्यताज्ञानस्य शाब्दबोधहेतुत्वम्	डा.ओ.जि.पि.कल्याणशास्त्री	१६२-१६७
33.	शब्दोपमानयोः प्रमाणान्तरत्वविमर्शः	डा.ई.यम्.देवन्	१६८-१७२
34.	अक्षपादसूत्रोक्तरीत्या प्रत्यक्षलक्षणविमर्शः	डा.का.ई.वेङ्कटनाथन्	१७३-१७७
35.	न्यायनये उपमानप्रमाणम्	श्री गौरीशङ्कर षणै	१७८-१८२
36.	The Role of Pramanah in Indian Philosophy	Dr.K.Kumara Swamy Sastry	183-200
37.	Use of Anumana and Upamana in Atmajnanopadesavidhi of Adisankara	Dr.S.Gopalan	201-204
38.	Pramanas in Saivasiddhanta	Dr.T.Ganesan	205-211
39.	Pramana the unmistakable parameter for decisive comparision of the Indian and Western approach to Knowledge	Dr.D.Bharadwaj	212-220
40.	Sruti as Sabdapramana and its Negation - Sri Sankara's Perspective	Dr.V.Vasanta Kumari	221-225
41.	Sabdaparamana as the sole means of Emancipation	Swami Jagadeswarananda Saraswati	226-233
42.	Pramana - gradual mounting from Prameya to Pramata according to Kasmirian Saivism	Sri Maciej Karasinski	234-242

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणतत्त्वदीपिका

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणेषु वेदः कल्पमहीरुहः

महामहोपाध्यायः आर्.कृष्णमूर्तिशास्त्री

उपोद्घातः

'धर्मो विश्वस्य जगतः प्रतिष्ठा' इति वेदसूक्तिः श्रीकृष्णेन स्थिरीकृता - 'कस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्' इति (३.१५), 'कामधुक्' (३.१०) इति च। 'वेदोऽखिलो धर्ममूलम्' इति निर्णीतं महर्षिभिः। 'धर्मः चोदनालक्षणः' इत्येवं निर्धारितं पूर्वतन्त्रे। एवं च कामधेनुकल्पस्य धर्मस्य बोधकतया हेतुः अयं वेदः प्रमाणेषु कल्पमहीरुहः। यद्यत् वाञ्छितं तत्सर्वं वितरति कल्पवृक्षः। द्वयोरयमेव भेदः यत् अर्थरूपः कल्पवृक्षः, शब्दरूपो वेद इति। वेदस्यायं महिमा उद्घोषितः वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति। 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्' इति सूक्तिः वेदस्यैव मुख्या महाभारतस्य तु गौणी। ईदृशस्य वेदस्य परिपोषणाय उपबृंहणाय चैव सर्वाणि शास्त्राणि प्रवृत्तानि। तादृशमहिमवतो वेदस्य काश्चित् विश्वोपकारकविषयान् लेखेऽस्मिन् स्थालीपुलाकन्यायेन प्रदर्शयत्ययं जनः श्री विश्वेशप्रीतये।

१.विश्वहितप्रार्थनम्

यागानुष्ठानाय दर्भानयनं, तदर्थं तल्लवनं प्रसक्तम्। तदा लविता एवं चिन्तयति - अहो, दर्भतृणस्य हिंसा खलु जायते। गतिरन्या च नास्ति। अतः विधात्मानं नारायणं एवं सः प्रार्थयितुं प्रवर्तते - हे दर्भ, त्वं वर्षवृद्धमसि। त्वां ते पर्वसु एव लुनामि, अन्वक् तिर्यक् वा न छिनद्मि। इदं च लवनं न मदीयलाभाय, किन्तु विश्वकल्याणप्रदाय यज्ञाय क्रियते। ते आच्छेत्ताऽहं मा किल्बिषं प्राप्नवानि। त्वं शतशाखातया वर्धस्व वयमपि यज्ञानुष्ठानसम्पादनेन सहस्रशाखाः प्रवर्धामहै इति। तथा हि श्रुतिः आम्नायते - 'वर्षवृद्धमसि देवबर्हिर्मात्वाऽन्वङ्गा तिर्यक् पर्व ते राध्यासम्, आच्छेत्ता ते मा रिषं, देवबर्हिः शतवल्शं विरोह सहस्रवल्शा विवयगुँरुहेम'[१] इति।

२. सर्वकल्याणं करवाम - मनुष्यः विश्वस्य प्रियं कर्तुमेव सृष्टः। स एव स्वयं आत्मानं संबोध्य एवं प्रार्थनां अथवा प्रतिज्ञां कुर्वन् लक्ष्यते - 'मधु मनिष्ये मधुजनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचम् उद्यासं, शुश्रूषेण्यां मनुष्येभ्यः'[२] इति। अयमत्र भावः - सर्वदा मानवोऽहं विश्वस्य प्रियं चिन्तयिष्यामि, वदिष्यामि, करिष्यामि च। देवानामपि प्रियं सम्पादयिष्यामि कदापि अहितं मया न चिन्त्यते, कथ्यते, क्रियते चेति।

विश्रान्तप्राचार्यः, मद्रपुरी संस्कृतकलाशाला, मद्रपुरी.

In Public domain. Digitization Muthulakshmi Research Academy

३. विश्वसहोदरत्वभावना - विश्वभ्रातृत्वं यदद्य नूतनमिवोद्घुष्यते सर्वत्र तत् अस्माकं पुरुष-सूक्ते स्पष्टं प्रकटीकृतं - 'तस्मात् यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्मात्। तस्माज्जाता अजावयः।'[३]

मनुष्येषु वर्णचतुष्टयं नारायणावयवेभ्यः उत्पन्नमित्येव न, अपि तु अजाश्वादयोऽपि प्राणिनः भगवत एव उत्पन्नाः। सत्येवं सर्वप्राणिनां भ्रातृत्वं सहजसिद्धं खलु। शरीरस्यैकत्वेऽपि तदवयवानां मुखनेत्रादीनां पाणिपादादीनां च पृथक्पृथक्विभिन्नकार्येष्वेव सामर्थ्यम्, एकस्य अन्यव्यापारे असामर्थ्यं च यथा एवं परमात्मावयवानामपि विभिन्नकार्यकारित्वमेव समञ्जसमित्यपि नात्र प्रस्मर्तव्यम्। इदं च सूच्यते वेदमात्रा।

४. यागादिः विश्वकल्याणाय - दर्शपूर्णमासेष्टेः पूर्वाङ्गभूतेषु प्रयाजेषु पञ्चसु समिदादिनामकेषु एवं प्रार्थना दृश्यते - वसन्तादयः षड्ऋतवः स्वस्वोचितफलप्रदानशक्ताः सम्पद्यन्तां, सर्वेभ्यः प्राणिभ्यः तत्तादार्तवफलानि समृद्ध्यन्ताम् इति।[४]

अ. समिधो यजति वसन्तमेवर्तूनामवरुन्धे,

आ. तनूनपातं यजति ग्रीष्ममेवावरुन्धे,

इ. इडो यजति वर्षा एवावरुन्धे,

ई. बर्हिर्यजति शरदमेवावरुन्धे,

उ. स्वाहाकारं यजति हेमन्तमेवावरुन्धे - इति।

५. अन्नजलसमृद्धये - सर्वेषु नानाफलेषु यागेषु प्रयुज्यमाना सप्तदशाक्षरी विराजते। तानि चाक्षराणि एवं - क. आश्रावय - ४, ख.अस्तु श्रौषट् - ४, ग. यज -२, घ. ये यजामहे - ५, ङ. वौषट् -२ = १७। अस्याः सप्तदशाक्षर्याः प्रयोगं विना यागः कोऽपि न प्रवर्तते। पञ्चधा प्रविभक्तायाः अस्याः सप्तदशाक्षर्याः १) धेनुत्वं रूपयित्वा सर्वकामदोग्धृत्वं, २) वृष्टिरूपत्वं प्रकल्प्य सर्वपोषकत्वं, ३) पुण्यप्रदत्वं च एवमुक्तम्[५]-

१. यो वै सूनृतायै दोहं वेद दुह एवैनां.....,

२. त एतामार्द्रां पङ्क्तिमपश्यन्... तेभ्यो दिशः प्राप्यायन्त...,

३. एष वै छन्दस्यः प्रजापतिः ... पुण्यो भवति इति।

अपि च विष्णुप्रीतिकरत्वं अस्य अक्षरसन्दोहस्य स्मर्यते -

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु।। इति।

६. भगवत्प्रार्थना कार्या - अद्यत्वे नास्तिक्यं यत् तत्र तत्रेक्ष्यते भगवत्प्रार्थनादिकं च निषिद्ध्यते तस्य नास्तिक्यवचसश्चोत्थापनं कृत्वा समाधानं च सुमनोहरं प्रतिपादितं वरीवर्ति। एवम् अग्न्यादि-देवानां प्रतिदिनमुपस्थानम्, आशीःप्रार्थनम् इष्ट्यादिषु होमादिषु च कर्तव्यम् उत नेति विचारः एव-मारभ्यते- 'उपस्थेयोऽग्नी३र्नोपस्थेया इत्याहुः'[६] इति।

तदनन्तरं पूर्वपक्षतया नास्तिकवचनम् उद्भाव्यते इत्थं । देवाः मनुजापेक्षया उत्कृष्टाः। स्थिते चैवं तान् देवान् प्रतिदिनं वारद्वयं प्रातः सायं च होमान्ते यदि वयं याचेमहि तर्हि धनिकमनुष्यः इव कुपितत्वं देवानामापतेत्, तेन च नः हानिरेव स्यात्, अतः अग्न्युपस्थानं न कर्तव्यमिति।[७]

'नोपस्थेया३ इत्याहुः मनुष्यायेन्वै योऽहरहराहृत्य अथैनं याचति स इन्वै तमुपार्च्छति, अथ को देवानहरहर्याचिष्यति इति तस्मान्नोपस्थेयः' इति।

दृढे पूर्वपक्षे प्राप्ते समाधानं श्रुतौ समाम्नायते - 'अथो खल्वाहुः आशिषे वै कं यजमानो यजत इति तस्मादुपस्थेयः' इति।

अत्र समाधाने इदं विवृतं विद्यारण्यस्वामिभिः, तद्भाष्ये एवं - मनुष्यभगवतोः साम्यं नैव चिन्तनीयं, मनुष्यो हि अतिपरिमितसंपत्तिमान्, शक्तः, तस्य ईदृशस्य मनसि - पुनः पुनः याचकेभ्यः धनादिदाने स्वस्य निष्किञ्चनत्वं न चिरात् स्यात् इति चिन्ता स्वाभाविकी। परन्तु अपरिमितैश्वर्यसम्पन्नस्य लक्ष्मीपतेः कथं प्रार्थना वैफल्यकरणचिन्ता उदियात्? वस्तुतस्तु भगवान् एवं मन्यते भक्तेभ्यः प्रार्थितं तदा दास्यामि इति। उक्तं हि भगवद्गीतायां - 'लभते च ततः कामान् मयैव विहितान् हि तान्'[८] इति। (गी.७.२२) यद्यभीष्टं तत्तत् यागादिकाले प्रार्थनीयमेव, यतः भगवान् वरदः खलु।

७. स्वल्पदानात् कथं भूरिलाभः - क्रयविक्रयन्यायतुल्यता यागे भवितुमर्हति। उक्तं हि 'देवान् भावयतानेन ते देवा भावयन्तु वः' (गी.३)। एवं च स्वल्पस्य पुरोडाशाज्यादेः दानेन भूरि फलं कथं लभ्येत? इति मानवी शङ्का वेदे उद्भाव्य निराकृता एवं । मनुजैः यत् यावद्दीयते तत् तथैव तावदेव देवान् प्राप्नोति इति चिन्तनं न साधु। हविष्प्रदानवेलायां यन्मन्त्रोच्चारणं श्रद्धया क्रियते तस्य मन्त्रस्य बलेन दीयमानं हविः तावतीम् अभिवृद्धिं प्राप्नुयात् यावती देवैः काम्यते, यावत्या देवाः सदातृप्ता भवेयुः। अतः हविष्प्रदानं प्राप्य तेऽपेक्षितं बहुलतया वर्षेयुः इति। शृणुत कर्णपीयूषं वाक्यं - 'धान्यमसि धिनुहि देवानित्याह। एतस्य यजुषो वीर्येण। यावदेका देवता कामयते यावदेका। तावत् आहुतिः प्रथते। न हि

In Public domain. Digitization Muthulakshmi Research Academy

तदस्ति। यत्तावदेव स्यात्। यावज्जुहोति।'[९] इति। अत एव कविकुलतिलकेन कालिदासेन एवं सुष्ठु उक्तम् भंग्यन्तरेण - 'सहस्रगुणमुत्स्रष्टुं आदत्ते हि रसं रविः' इति।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।[१०] इति च।

८. गर्भाः कथं वर्धन्ते - मातृभुक्तेन अन्नरसेन गर्भाणां वृद्धिः इति वयम् ऊहामहे। वेदे तु अग्निहोत्रहोमे क्रियमाणेन आहुतिविशेषेण गर्भाणाम् अनश्नतामपि वृद्धिर्भवति इति प्रतिपादितम् - अग्निहोत्रहोमकाले दीक्षितः अतिस्वल्पं स्वयं हविरश्नाति इति यत् तदेव दृष्टविधया गर्भाणां वृद्धये सम्पद्यते इत्युक्तम् - 'यन्निमार्ष्टि तदोषधीनाम्। यद्द्वितीयं तत्पितृणाम्। यत्प्राश्नाति तद्गर्भाणाम्। तस्माद्गर्भा अनश्नन्तो वर्धन्ते'[११] इति।

९. मेधालाभाय जपः - सर्वं वस्तु धनेन क्रेतुं शक्यते प्रायः इह लोके। किन्तु मेधाशक्तिः मन्त्रजपेनैव सिद्ध्येत्। तादृशो मन्त्रः तैत्तिरीयोपनिषदि आम्नायते - 'यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्सम्बभूव। समेन्द्रो मेधया स्पृणोस्तु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा....'[१२] इति।

अर्थः - वेदानां त्रयाणां सारतया समुत्पन्नः अकारोकारमकारात्मकः प्रणवः (ओङ्कारः)। तत्प्रतिपाद्यः परमात्मा सकलजगतां धाता परमैश्वर्ययुक्तः मां मेधया प्रीणयतु। तद्द्वारा अहममृतत्वहेतोः तत्वज्ञानस्य धारको भूयासम्। मम शरीरबलं च मेधया सह विवर्धताम्। मधुरवक्ता च भूयासम् इति।

१०. धनसमृद्धये होमः - धनं ऐहिकसुखसाधनं, तद्विना जनः सुखी न भवेत्, जीवनस्य तदायत्तत्वात्। वस्तुतः धनं सत्कर्मद्वारा चित्तशुद्ध्यादिकं उत्पाद्य परमात्मज्ञानपर्यन्तमपि साधनं भवितुमर्हति इति हेतोः उपनिषत्प्रस्तावे आत्मज्ञानप्रधाने अस्मिन् भागे श्रीकामस्य कृते उच्यमानोऽयं मन्त्रभागः न विरुद्धः इति च भाष्ये अत्र स्पष्टीकृतम्।

सा श्रीः सर्वप्राणिसुखप्रापिका, सस्यादिसमृद्धिद्वारा अन्नपानादिसमृद्धिप्रदा च भूयात् इति, धनवृद्धौ सत्यां वहूनां शिष्याणां वेदवेदान्ताध्यापनं सिद्ध्यतु इति च प्रार्थनात्र दरीदृश्यते। अहो वेदस्य औदार्यम्। श्रूयतां वेदवाणी - 'आवहन्ती वितन्वाना। कुर्वाणा चीरमात्मनः। वासांसि मम गावश्च। अन्नपाने च सर्वदा। आमायन्तु ब्रह्मचारिणः स्वाहा,... एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वतः स्वाहा'[१३] इति।

११. विश्वस्य क्षुत्पिपासानिवृत्तिः - सोमयागेषु उपसद्धोमाः क्रियन्ते। तेषां मन्त्रेषु उग्रं वचः, त्वेषं वचश्च नश्यतु इति प्रार्थनाऽस्ति। तन्मन्त्रव्याख्यानरूपे ब्राह्मणे।[१४] एवमुक्तं यत् अशनयापिपासे

In Public domain. Digitization Muthulakshmi Research Academy

एव उग्रं वचः, पापं वीरहत्यादिकं त्वेषं वचः। तदुभयम् उपसदनुष्ठानेन नश्यतु इति - 'उग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहेत्याह। अशनयापिपासे हवा उग्रं वचः। एनश्च वैरहत्यं च त्वेषं वचः' इति।

१२. सङ्कटपरिहाराः -

१. यागानुष्ठानकाले पञ्चदिनेषु अनशनं दीक्षितस्य विहितं पीत्वा दीक्षते, कृशो यजतेति। तत्र कश्चन सङ्कटः एवं जायते यथाशास्त्रमनशने अनुष्ठातुः प्राणलायः स्यात्, अशनस्वीकारे व्रतलोपात् कर्मनिष्फलं स्यात् इति। अयं सङ्कटः श्रुत्या प्रथमं प्रदर्शितः। यदनाश्वानुपवसेत् क्षोधुकः स्यात्- 'यदश्नीयात् रुद्रोऽस्य पशूनभिमन्येत'[१५] इति।

सङ्कटस्यास्य परिहारः तत्रैव कथितः। एवं - क्षुधितः सन् दीक्षितः जलं यथेष्टं पिबेत्, जलपानं च अशितमिव बलं दद्यात्, अन्नस्य अस्वीकारेण अनशितमिव च भवति। एवं सति पूर्वोक्तदोषद्वयं न प्राप्नोति इति।[१६]

अपोऽश्नाति तन्नेवाशितं, नेवानशितं न क्षोधुको भवति, नास्य रुद्रः पशूनभिमन्यते इति। अहो कीदृशं मातृवात्सल्यं श्रुतेः। एतदवलम्ब्यैव श्रीमद्भागवते अम्बरीषचरित्रे ऋषिभिः द्वादशीपारणा जलेन कार्येति निर्णय कृतः।

२. पत्न्याः गृहमेधीयशेषभक्षणे कश्चन सङ्कटः एवमापादितः पत्नी गृहमेधीयशेषं यदि भक्षयेत् गृहसमृद्धिस्तु स्यात्, परन्तु यज्ञस्य ऋद्धिः नैव भवेत्। यदि एतत्परिहाराय सा शेषं नाश्नीयात् यज्ञसमृद्धिरेव भवेत् गृहमेधित्वं न भवेत्। किमत्र कार्यम्? इति। एवं सङ्कटमुक्त्वा परिहारोऽपि आम्नायते - पत्न्याः अशनार्थं गृहमेधीयहविषो भिन्नतया पृथक् पाकं पक्त्वा तस्यान्नस्याशनं तया कर्तव्यं, सत्येवं दोषद्वयं पूर्वोक्तं परिहृतं भवति इति उक्तं हि - 'यत्पत्नी गृहमेधीयस्याश्नीयात्। गृहमेध्येव स्यात्। वित्वस्य यज्ञ ऋध्येत। यन्नाश्नीयात्। अगृहमेधी स्यात्। नास्य यज्ञो व्यृद्ध्येत। प्रतिवेशं पचेयुः। तस्याश्नीयात्। गृहमेध्येव भवति। नास्य यज्ञो व्यृद्ध्यते'[१७] इति।

३. प्रवर्ग्याज्यावेक्षणे पत्नी यदि अवेक्षणमन्यत्रेव कुर्यात् तदा कश्चन दोषः प्रजानां निर्दाहरूपो भवेत्। यदि नैवेक्षेत प्रजोत्पत्तिरेव न स्यात् इत्येवं धर्मसङ्कटे समुत्पन्ने निर्दुष्टो मार्गः सङ्कटपरिहाराय एवमुक्तः - पत्नीं प्रवर्ग्यस्य प्रवृत्तनपात्रात् किञ्चित् तिरस्कृत्य नीत्वा अवेक्षणमन्त्रमात्रं वाचयेत् इति। एतेन पूर्वोक्तसङ्कटः परिहृतो भवति इति। श्रूयतां तत्सन्दर्भगतवाक्यजाते - 'यत्पत्न्यवेक्षेत। प्रजायेत। प्रजांत्वस्यै निर्दहेत्। यन्नावेक्षेत। न प्रजायेत। नास्यै प्रजां निर्दहति। तिरस्कृत्य यजुर्वाचयति। प्रजायते। नास्यै प्रजां निर्दहति।'[१८] इति।

In Public domain. Digitization Muthulakshmi Research Academy

४. उपानहस्स्वीकारः कार्यो न वा - इत्येवं कश्चन सङ्कटः कर्हिचित् सञ्जायते। तत्र विचित्रः परिहारः श्रुत्या कथ्यते। अग्निचयनाख्ये कर्मणि चितेरुपरि यजमानस्य आरोहणसमये उपानद्धरणं कार्यं उत न इति विचारः, पक्षद्वये दोषश्च उक्तः। तादृशे सङ्कटे विचित्रः परिहारश्चोच्यते -

चितिः अग्निरूपः, अग्निश्च मृत्युरूपः, कृष्णाजिनं तु वेदस्वरूपमित्युक्तम्। एवं च अग्निचिद्यजमानः चित्यारोहणसमये पादयोः दाहव्यथापरिहाराय कृष्णाजिननिर्मितौ उपानहौ धृत्वा गच्छति चेत् वेदेनैव मृत्वन्तर्धानं भवेत्। परन्तु विद्वांसोऽत्र दोषं वदन्ति यत् अग्नेरन्नादरूपत्वात् तस्योपानयामन्तर्धाने कृते मृत्युपरिहारे जातेऽपि अन्नाद्यप्राप्तिः अस्य न स्यात् इति। एवं च पक्षद्वयेऽपि पाददाहः अन्नाद्याप्राप्तिश्चेति सङ्कटे जाते कः परिहारः दयामूर्तिः वेदमाता अत्रैवमुपदिशति उक्तदोषद्वयपरिहाराय एकाम् उपानहं धृत्वा अन्यां नैव धरेत्। तथा च सति मृत्योरन्तर्धानं च लभ्यते अन्नाद्यं च अवरुन्धे यजमानः। अहो कौशलं। श्रूयताममृता गीः - 'मृत्युर्वा एष यदग्निः, ब्रह्मण एतद्रूपं यत्कृष्णाजिनं, कार्ष्णी उपानहावुपमुञ्चते, ब्रह्मणैव मृत्योरन्तर्धत्ते, अन्तरन्नाद्यादित्याहुः, अन्यामुपमुञ्चतेऽन्यां न, अन्तरेव मृत्योर्धत्ते अवान्नाद्यं रुधे'[१९] इति।

५. यथाकालं कार्याणि (Punctuality) कथं कुर्यात् इत्यत्र सङ्कटमुत्पद्यते। तत्र परिहारः मनोहरः कथ्यते, तत्पश्यामः। आतिथ्येष्टिप्रस्तावे विषयोऽयं कथ्यते - सोमराजा गृहम् आगच्छति शकटेन। ऋषभद्वययुक्तं तच्छकटम्। सोमस्यागमने तत्स्वागतकरणाय इष्टिः निर्वर्तनीया। सा कथं कार्या इत्यत्र इदमुच्यते शकटस्योभयोः वृषभयोः किमेकानन्तरं यदि क्रियेत यज्ञस्य विच्छेदः (विलम्बदोषप्रयुक्तः) स्यात्। एतद्वारणाय वृषभद्वयस्यापि शकटादविमोकदशायां यदि इष्टिः क्रियते तदा अनागताय आतिथ्यं कृतं स्यात्। अतः विलम्बापकर्षयोः (पूर्वतः करणम् = अपकर्षः) परिहाराय इदमुक्तं - एको वृषभः विमुक्तो भवेत्, अन्यस्तु अविमुक्तः, तस्यां दशायाम् आगतानागतां यातिथये सोमाय आतिथ्यं कुर्यात्। तेन यज्ञः सन्ततया यथाशास्त्रं निर्वर्तितो भवति इत्येवमुपायः कथ्यते - 'यदुभौ विमुच्यातिथ्यं गृह्णीयात् यज्ञं विच्छिद्यात्, यदुभावविमुच्य यथाऽनागतायातिथ्यं क्रियते तादृगेव तत्, विमुक्तोऽन्योऽनड्वान् भवति अविमुक्तोऽन्यः, अथातिथ्यं गृह्णाति यज्ञस्य सन्तत्यै'[२०] इति।

६. हारियोजनग्रहस्य शेषभक्षणे कश्चन सङ्कटः आपतितः एवं - सोमरसे मिश्रितानां धानानां चर्वणं कार्यम् उत न इति संशये पक्षद्वयेऽपि दोषः उक्तः एवं धान्यानां दन्तैश्चर्वणे कृते यजमानस्य पशुसमृद्धिः स्वल्पा एव भवेत्, यदि चर्वणं न क्रियते तदा बहवः पशवः दोहनासमर्थाः प्राप्येरन् इति। एतद्द्वयपरिहारेण उपयुक्तबहुपशुप्राप्तये अयमुपायः उददिश्यते - 'मनसा चर्वणं भावयित्वा धान्यानां गिलनं कर्तव्यम्। एवं कृते दोहनसमर्थगोसमृद्धिः भूयसी भवेत्'[२१] इच्युच्यते।

In Public domain. Digitization Muthulakshmi Research Academy

'पशवो वै हारियोजनीः, यत्संभिद्यात् अल्पा एनं पशवो भुञ्जन्त उपतिष्ठेरन्, यन्न संभिद्यात् बहव एनं पशवोऽभुञ्जन्तः उपतिष्ठेरन्, मनसा संबाधते, उभयं करोति, बहव एवैनं पशवो भुञ्जन्त उपतिष्ठन्ते' इति।

एवं बहवः सङ्कटपरिहारोयायाः तत्र तत्र वेदेन उपदिश्यन्ते। तान् वयं यदि जानीमः तर्हि अहित-परिहारः, हिताभिवृद्धिश्च निश्चप्रचं स्याताम् इति वेदश्च कल्पमहीरुहकल्पत्वमथवा सखितुल्यत्वं सुहृदत्वमङ्गीकार्यमित्यत्र नास्ति संशयलेशः।

१३. वातावरणशुद्धिपरिहारः (Remedy for pollutions) - अयं विषयः उद्यत्वे अत्यन्तमावश्यकः परिगण्यते। यतः वातजलान्नेषु अनिवार्याः प्राणहराः अशुद्धयः समापन्नाः सर्वत्र।

अस्माकं वेदः भाविनीमिमामापदं पूर्वमेव ज्ञात्वा इव एवमशुद्धित्रयस्य परिहारं प्रार्थनारूपेण वर्णयति अथवा कर्तव्यतया बोधयति।

१. वातस्य प्रार्थना एवं क्रियते - शन्नो वातः पवतां मातरिश्वा, शन्नस्तपतु सूर्यः।[२२]

२. द्वौ वातौ वातः समुद्रप्रदेशात् ओषधिप्रदेशाच्च। तौ द्वौ सम्बोध्य प्रार्थयेते एव हे वातौ, युवां भेषजशक्तिं वातम्, अत्रत्यं रपः = अशुद्धिविशेषं विवातम्। यतः युवां विश्वभेषजौ सृष्टौ भगवता सर्वदा चरन्तौ च इत्येवं रमणीया सर्वशरण्या प्रार्थना क्रियते - 'आवात वाहि भेषजम्। विवात वाहि यद्रपः। त्वं हि विश्वभेषजः। देवानां दूत ईयसे द्वाविमौ वातौ वातः। आ सिन्धोरापरावतः। दक्षं मे अन्य आवातु। पराऽन्यो वातु यद्रपः।'[२३]

३. हे वायो, ते गृहे अमृतस्य निधिर्हितः, तस्मान्निधेः अक्षय्यात् अस्मभ्यं भेषजं देहि, अस्मान् जीवय कृपया इति अत्युत्तमा प्रार्थना श्रूयताम्।[२४]

जलस्य प्रार्थना तु सन्ध्यावन्दने प्रतिदिनं क्रियते एवम् - आपः यूयं सुखजनयित्र्यः, अतः अस्मभ्यं शरीरपुष्टिम् ऊर्जं च स्थापयत। युष्माकं शिवतमो रसः यो गूढो वर्तते, तस्यांशं नः दत्तम्। मातरो हि शिशुभ्यः सुप्रीत्या हितं सम्पादयन्ति इति प्रोक्षणमन्त्रः वदति - 'आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे। योवश्शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ...'[२५] इति।

अन्नप्रार्थना चैवं भवति - १. अन्नपतेऽग्ने, रोगानुत्पादकम् अन्नं, बलप्रदं चास्मभ्यं देहि। २. अस्माभिः भुज्यमानम् अन्नम् अविषं कुरु -

१. अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः।

२. रसमन्नमिहायुषे। अदब्धायोऽशीततनो। अविषं नः पितुं कृणु।

In Public domain. Digitization Muthulakshmi Research Academy

उपसंहारः

वेदो नित्यमधीयताम् इति सूक्तिः नितरामस्माकम् उपकाराय महद्भिः उपदिष्टा। अतो वयं आचार्याणां मार्गदर्शनेन वेदशास्त्रमधीयानाः कल्पमहीरुहादभीष्टानि लभमानाः सर्वान् पुरुषार्थान् लभामहे इति शम्।

निबन्धान्तटिप्पण्यः

१.तै.सं.१.१.२	२.तै.सं.३.३.२	३.तै.आ.३.१.२
४.तै.सं.२.६.१	५.तै.सं.१.६.११	६.तै.सं.१.५.९
७.तै.सं.१.५.९	८.भ.गी.७.२२	९.तै.ब्रा.३.२.६
१०.रघु.१	११.तै.ब्रा.२.१.४	१२.तै.आ.७.४
१३.तै.आ.७.४	१४.तै.ब्रा.१.५.१०	१५.तै.सं.१.६.७
१६.तै.सं.१.६.७	१७.तै.ब्रा.१.६.७	१८.तै.आ.५.६
१९.तै.सं.५.४.४	२०.तै.सं.६.२.१	२१.तै.सं.६.५.९
२२.तै.आ.४.४२	२३.तै.आ.४.४२	२४.तै.आ.४.४२
२५.तै.सं.५.६.१		

In Public domain. Digitization Muthulakshmi Research Academy

साङ्ख्यदर्शनरीत्या प्रमाणविमर्शः

आचार्यः वि.एस्.विष्णुपोत्ति

सुखं तु जगतामेकं काम्यमिति न्यायेन दुःखं मा भूत् सुखं भवतु इति सर्वसाधारणोऽभिलाषः। तदर्थं विशेषबुद्धियुक्तः मनुष्यः यतमानः अस्ति। तत्र बहवः सत्यान्वेषणेन दुःखकारणं ज्ञातवन्तः, दुःखनिवारणोपायश्च। एवं साक्षात्कृतधर्माणः परं प्रत्युपकर्तुं स्वानुभूतमर्थं प्रकटितवन्तः। तैः प्रदर्शित-मार्गमनुसृत्य परवर्तिनः अपि लक्ष्यं प्राप्तवन्तः। तत्र अन्वेषणे मुख्यं कर्तव्यमन्वेष्टुः भवति लक्ष्यनिर्णयः। तत्र किमन्वेष्टव्यम्? इति आदौ निर्णेतव्यम्। अनन्तरं कथमन्वेष्टव्यम् ? उपायः कः ? इत्यादयः परि-कल्प्यन्ते। एवं प्रकारेण निर्णीतलक्ष्यः अन्वेष्टा स्वलक्ष्यप्राप्तौ सम्भाव्यप्रतिबन्धान् तन्निवारणमार्गांश्च जानीयात्। अन्यथा लक्ष्यात् प्रच्युतः स्यात्। तत्र नित्यसुखप्राप्तिः लक्ष्यमिति मनुष्याणां शास्त्रकृद्भिः व्यवस्थापितम्। तच्च नित्यं सुखं प्राप्नोति तत्त्वज्ञानेन इत्यपि। तत्र न्यायभाष्यकारवचनानुसारेण तस्मिन् तदिति तथा अतस्मिन् न तदिति, अथवा सत्सु सद् इति असत्सु च असदिति यथाभूतम् तत्त्वम्। अतत्त्वबुद्धिः मिथ्या। यावत्तत्त्वबुद्धिः न भवति तावद्विद्यमाना तु मिथ्याबुद्धिः। तत्र नित्यसुखप्राप्त्युपायः तत्त्वज्ञानमिति प्रतिपादितम्। तत्त्वज्ञानाच्च अतत्त्वबुद्धेः निवृत्तिः। उक्तश्च सांख्यकारिकायां ज्ञानेन चापवर्गो, विपर्ययादिष्यते बन्धः। तादृशप्रमाविषयभूताः प्रमेयाः चतुर्विधाः। प्रकृतिः, विकृतिः, प्रकृति-विकृतिः, पुरुषश्चेति। तत्र चैतन्यरहितायां प्रकृतौ चैतन्यवतीति, अकर्तरि पुरुषे कर्ता इति च रीत्या अतत्त्वज्ञानम्। एतेषां चतुर्विधप्रमेयानां ज्ञानं केन प्रमाणेन भवति इति सांख्यकारिकायां इत्थं प्रदर्शितम्। सामान्यतस्तु दृष्टमतीन्द्रियाणां प्रतीतिरनुमानात्। तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम् इति। एतदनुसारेण विकृतिपदार्थज्ञानं प्रत्यक्षप्रमाणेन जायते इति सिद्ध्यति। तन्मात्रादीनां प्रकृतिविकृतिपदार्थाः न साधारणजनप्रत्यक्षगम्या इति तत्रासिद्धत्वात् अनुमानसिद्धाः। एवमेव अत्यन्तसूक्ष्मभूतत्वात् प्रकृति-पुरुषयोश्च अनुमानादेव सिद्धिः। प्रत्यक्षानुमानाभ्यामसिद्धस्य पदार्थस्य सिद्धिः शब्देन भवति इत्यपि स्पष्टीकृतम् विद्यते। स्वस्वप्रमाणसिद्धत्वादित्यनेन सांख्यानां प्रतिपादितार्थसाधनोपायत्वेन त्रिविधमेव प्रमाणमिष्टम्, अन्येषां परमाणानां एषु त्रिषु प्रमाणेषु अन्तर्भावादित्यपि व्यवस्था सांख्यमते। उपमाना-दीनान्तु शब्दानुमानयोरन्तर्भावः।

अत्रायं विचारः। सांख्याभिमतप्रमेयानां चतुर्णां सिद्धौ पर्याप्तानि त्रीणि प्रमाणानि। अतिरिक्तपदार्थश्च नास्ति, अथवा अतिरिक्तस्य पदार्थस्य प्रतिपादनस्य नास्ति प्रकृतोपयोगित्वम्।

कुलपतिः, श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्चीपुरम्.

In Public domain. Digitization Muthulakshmi Research Academy

प्रमेयसिद्धिपर्याप्तप्रमाणतत्त्वमपि अत्र समाप्तम्। प्रत्यक्षेण किल विकृतिपदार्थानां सिद्धिः। एवमनुमानेन प्रकृतेः प्रकृतिविकृतीनां, पुरुषस्य च सिद्धिः। तर्हि शब्दप्रमाणेन किं साध्यते सांख्यैः। प्रत्यक्षानुमानाभ्यामसिद्धस्य वस्तुनः सिद्धिः शब्देन इति उक्तम्। तद्वस्तु किं भवति इति स्पष्टता न दृश्यते। स्वर्गापवर्गधर्मादीनां प्रत्यक्षानुमानाभ्यां सिद्धिः न भवति तेषामागमेन सिद्धिः इत्युच्यते तर्हि आगमस्य सम्पूर्णस्य प्रामाण्यमस्ति वा न वा। कुत इति चेत् पूर्वं दृष्टवदानुश्रविकः इति कारिकया वेदोक्तयागादि कर्मणां प्रत्यक्षदृष्टोपायवद्दोषवत्त्वे वेदाप्रामाण्यमेव प्रसक्तम्। पुनः धर्मादयश्च बुद्धिभेदाः एव। अनुमानेन तेषां सिद्धिः भवति।

तत्रापि शब्दस्य स्वीकारे आवश्यकता नास्ति। प्रकृत्यादीनां कपिलाद्युक्तत्वात् प्रामाण्यमतः कपिलादिभिरुक्तः शब्दः प्रमाणमिति चेत् सर्वलौकिकशब्दानां प्रामाण्यमागतम् इत्येवमादयः विचाराः सांख्यानां प्रमाणचर्चायाम् विचारणीयोऽर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

व्याकरणदर्शने प्रमाणविचारः

डा. विश्वनाथ गोपालकृष्णशास्त्री

प्रमीयतेऽनेनेति प्रमाणम् । दार्शनिकाः यथा प्रमाणविमर्शे संलग्नाः न तथा अवलोक्यन्ते शाब्दिकाः।

तस्मादज्ञाततत्त्वार्थज्ञानसाधनमेव नः
प्रमाणमिति निर्णीतं तद्विशेषानथ ब्रुवे।
प्रत्यक्षमनुमानं च शाब्दं चोपमितिस्तथा
अर्थापत्तिरभावश्च षट् प्रमाणानि मादृशाम्।।[1]

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
भासर्वज्ञश्च साङ्ख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययागात्।।

इत्थं प्रमाणसंख्याविषये तत्तद्दार्शनिकानां मतं प्रदर्श्य मानमेयोदयकारः स्वीयं षट्प्रमाणवादम् अन्ते न्यरूपयत्। यथा -

तदेवं निष्प्रतिद्वन्द्वा षट्प्रमाणी समर्थिता।[2]
अतः षडेव मानानि मानमन्ति मनीषिणः।[3]

इत्थं मानमेयोदयादिषु प्रमाणविमर्शे वैयाकरणानामुल्लेखो यद्यपि न दृश्यते, तथापि व्याकरण-दर्शने प्रमाणचर्चा बहुधा दृश्यते। तद्यथा -

तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव।
नैव चास्ति तलं व्योम्नि न खद्योतो हुताशनः।।[4]

तस्मात् प्रत्यक्षमप्यर्थं विद्वानीक्षेतयुक्तितः।
न दर्शनस्य प्रामाण्यात् दृश्यमर्थं प्रकल्पयेत्।।[5]

इति वदता प्रमाणपरीक्षा कृता। महाभाष्यवाक्यपदीयादिग्रन्थेषु बहुशः प्रमाणविचारः दरीदृश्यते। संक्षेपेण कानिचन स्थलानि प्रदर्श्यन्ते।

प्रत्यक्षम्

विश्रान्ताचार्यः, गौतमीसंस्कृतविद्यापीठम्, राजमहेन्द्रवरम्

In Public domain. Digitization Muthulakshmi Research Academy

सर्वे दार्शनिकाः यथा प्रत्यक्षस्य श्रेष्ठत्वं, ज्येष्ठत्वं च वदन्ति, तद्वत् वैयाकरणा अपि व्यावहारिकतत्त्वावेदकेषु प्रमाणेषु प्रत्यक्षं प्रबलमिति वदन्ति। तदुक्तम् - "परं प्रधानं प्रमाणं प्रत्यक्षम्, अनुमानस्य तत्पूर्वकत्वात्"[६] इति प्रदीपे। अन्यथा जातीयकः खल्वपि प्रत्यक्षेणार्थसम्प्रत्ययः"[७] इति भाष्ये। कैयटेनोक्तम् - धातुवाच्यस्य समूहस्य युगपदसन्निधानात् अप्रत्यक्षत्वेप्येकस्य तु क्षणस्य प्रत्यक्षत्वेन बुद्ध्या तान् क्षणान् सङ्कलय्य पचतीति प्रयुज्यते इति तत्रैवोद्योते 'प्रत्यक्षत्वेनेति' प्रतीकमादाय नागेशेनोक्तं 'पश्य मृगो धावतीति प्रत्ययादित्यर्थ' इति।

अनुमानम्

अनुमानचर्चा बहुषु स्थलेषु वर्तते महाभाष्ये यथा - "क्रिया नामेयमत्यन्तापरदृष्टा अशक्या पिण्डीभूतानि दर्शयितुम्। यथा गर्भो निर्लुण्ठितः। साऽसावनुमानवाच्या"[८] इति भाष्यम्।

आख्यातपदवाच्या पूर्वपरीपूतावयवा साध्यमानावस्थीभूतभविष्यद्वर्तमानसदसदनेकावयवसमूहरूपा सद्वस्तुविषयेन्द्रियग्राह्या न भवतीत्यर्थः इति तदाशयं कैयटः अवर्णयत्।

एतेन क्रिया अनुमेयैवेत्युक्तं भवति इति तत्रैव नागेशः। एवमेव "स्त्रियाम्"[९] इति सूत्रे खट्वावृक्षयोः लिङ्गमस्ति नवेति विचारे लिङ्गसाधकं भाष्यं दृश्यते। अथवा यथा आदित्यगतिः सती नोपलभ्यते तद्वत् खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते इति भाष्यम्। तत्रैव कैयटः - यथा आदित्यगतिः सती प्रत्यक्षेण नोपलभ्यते देशान्तप्राप्त्याऽनुमीयते तथा खट्वावृक्षयोः सदपि लिङ्गं सूक्ष्मत्वात् प्रत्यक्षेण अशक्यं ग्रहीतुं तत्कृतकार्यदर्शनादनुमीयते इति। सतां भावानां कथमनुपलब्धिरिति प्रश्ने भाष्यकृता समाहितम् - षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्वात्, इन्द्रियदौर्बल्यात्, अतिप्रमादादिति।

अस्मदादीनामिन्द्रियस्य बह्व्यः शक्तयः तमसावृताः इति न तेनेन्द्रियेण विप्रकृष्टानां प्रत्यक्षं भवितुमर्हति तथापि योगाभ्यासेन तमसोपनये क्लृप्तैः सन्निकर्षैः संयोगादिभिरेव सर्वं प्रत्यक्षं भवति। योगजधर्मस्य पृथक् प्रत्यासत्तित्वकल्पनस्य गुरुत्वात् इति तत्र नागेशः।

तत्रैव सूत्रे "यथाऽकाशेन ज्योतिषः" इति वार्तिकस्य भाष्यम् - आकाशं दृष्ट्वा ज्योतिरत्रेति गम्यते। अत्र आकाशशब्दस्य आकाशत इति व्युत्पत्या आलोकः अर्थः। तेन यथा मेघान्तरितं ज्योतिरनुमीयते तथा लिङ्गमनुमेयमिति।

उपमानम्

"उपमानानि सामान्यवचनैः"[१०] इति सूत्रे भाष्ये -"मानं हि नामानिर्ज्ञाताज्ञानार्थमुपादीयते।

In Public domain. Digitization Muthulakshmi Research Academy

अनिर्ज्ञातमर्थं ज्ञास्यामीति। तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति। गौर्निर्ज्ञातः गवयोऽनिर्ज्ञातः। अनन्तरं च भाष्ये, यस्य गवयो गौरनिर्ज्ञातः तेन गवय इव गौरिति कर्तव्यं स्यादित्याक्षिप्य बाढं कर्तव्यम् इतीष्टापत्या परिहृतम्। अपेक्षानिमित्तकः पितापुत्रादिव्यवहारवदुपमानोपमेयभाव इति न कश्चिद्दोष इति तत्र प्रदीपः। ज्ञानप्रदत्वात् यत्र पुत्राणामपि पितृत्वव्यवहारः तद्विषयोयं दृष्टान्तः'' इति तत्र नागेशः।

उपपूर्वकश्च माङ् सादृश्यहेतुके परिच्छेदे रूढः। येन वस्त्वनन्तरं सादृश्येन स्ववृत्तिधर्मवत्वेन परिच्छिद्यत तदुपमानम्। तद्यथा गौरिव गवयः इति।

बहुगुणविशिष्टे वस्तुनि उपमेये तात्पर्यवशात् उपमानाद् यः कश्चिदेव गुणः प्रतीयते न तु सर्वे गुणाः। तद्यथा चन्द्रमुखी देवदत्तेति बहवश्चन्द्रे गुणाः। या चासौ प्रियदर्शनता सा गम्यते इति।

वाक्यपदीये तृतीयकाण्डे वत्तिसमुद्देशे -

अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते।
साकल्येनापरिज्ञानादुपमानं तदुच्यते।।[११]

तथैव -

मितस्तु स्वेन मानेन प्रसिद्धो यो गुणाश्रयः।
आश्रयान्तरमानाय स्वधर्मेण प्रवर्तते।।[१२]

रूपान्तरेण संस्पर्शो रूपान्तरवतां सताम्।
भिन्नेन यस्य भेद्यानामुपमानं तदुच्यते।।[१३]

इति च हरिणा प्रपञ्चितम्।

उपमानोपमेययोः समानधर्मः युगपत् उभयगतो न भवति खलु ? खलु समानवचनत्वं तस्य इति शङ्कायां समाधीयते हरिणा -

उपमेये स्थितो धर्मः श्रुतोऽन्यत्रानुमीयते।
श्रुतोऽथवोपमानस्थ उपमेयेऽनुमीयते।।[१४] इति।

शब्दः

शब्दप्रमाणविषये किं वक्तव्यम् शब्दप्रमाणका वयम्, यश्शब्द आह तदस्माकं प्रमाणमिति शाब्दिकानां घण्टाघोषः।

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते।

In Public domain. Digitization Muthulakshmi Research Academy

ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्।।[१५]

भर्तृहरि वाक्यपदीये शब्दस्यैकस्यैव अलौकिके विषये प्रामाण्यं प्रतिपादयति नानुमानादीनाम्।

यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते।।[१६]

इति कारिकया अनुमानस्य अपरिनिष्ठितत्वं प्रत्यपादि। 'तर्काप्रतिष्ठानादि'ति च वदन्ति वेदान्तिनः।

अचिन्त्याः खलु ये भावाः न तां स्तर्केण योजयेदिति वदन्ति अभियुक्ताः।

चैतन्यमिव यश्चायमविरोधेन वर्तते।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते।।[१७]

इति शब्दस्य श्रैष्ठ्यं न्यरूपयत्।

तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्।।[१८]

इति वदता हरिणा वेदस्य अपौरुषेयत्वं वैयाकरणमतमिति सूचितम्। अतः सर्वापेक्षया शब्दप्रमाणस्य महत्त्वं शाब्दिका मन्यन्ते। शब्दप्रमाणका वयम् इत्युक्तेस्त्रैवतात्पर्यम्। न तु मानान्तरनिराकरणे इति।

अर्थापत्तिः

व्याकरणशास्त्रे बहुसु स्थलेषु अर्थापत्तिप्रमाणमङ्गीकृत्य स्वकार्यनिर्वहणं दृश्यते।

प्रातिपदिकार्थसूत्र तिङ्समानाधिकरणे प्रथमा इति नियमं प्रदर्श्य वृक्षः प्लक्षः इत्यत्र तिङोऽप्रयोगे कथं प्रथमा इति शङ्कायां भाष्यकृतोक्तम्। उक्तं पूर्वेण अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते। वृक्षः प्लक्षः अस्तीति गम्यते इति। आक्षिप्तः प्रतीयते इति तदर्थः। आक्षेपः अनुपपत्तिमूलकार्थापत्त्यैव भवति। तदुक्तं येन विना यदनुपपन्नं तत्तेनाक्षिप्यते इति।

तथा कर्तृकर्मणोः कृतीति सूत्रे कृति किम् ? इत्यस्य व्याख्याने कर्तृकर्मभ्यां क्रिया आक्षिप्यते इत्युच्यते अर्थापत्त्या सन्निधाप्यते इति तदर्थः।

तदित्थं परमताङ्गीकृतप्रमाणानि अङ्गीकुर्वन्तोपि वैयाकरणाः स्वमतानुरूपमन्यदपि प्रमाणं स्वीकुर्वन्ति। तद्यथा - प्रथमतस्तु वैयाकरणाः प्रतिभां प्रमाणत्वेन आमनन्ति। वाक्यपदीये द्वितीयकाण्डे प्रतिभाविषये विस्तरेण प्रपञ्चितं हरिणा -

विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्।।[१९]

प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति।

समारम्भाः प्रतायन्ते तिरश्चामपि तद्वशात्।।[२०]

प्रतिभा काचन सर्वेषु सहजा वर्तते। सा प्रमाणम्। कविकुलगुरुः कालिदासोपि आह - सतां हि सन्देहपदेषु वस्तुषु प्रमाणयन्तः करणप्रवृत्तयः इति। पशुपक्ष्यादिरपि प्रतिभयैव व्यवहारं कुर्वन्ति। वसन्ततौ पुंस्कोकिलस्य कः स्वरवृत्तिं विकुरुते? जन्त्वादयः कुलायादिकरणे केन शिक्षिताः? जन्तूनां मध्ये शाश्वतः विरोधः कुत्रचित्, कुत्रचित् प्रेम इत्यादयः आहारप्रीत्यपद्वेषप्लवनादिक्रियाः केवलप्रतिभा जन्या एव। सा च प्रतिभा षड्विधा -

स्वभावचरणाभ्यासयोगादृष्टोपपादिताम्।

विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः।।[२१]

अभ्यासः

एवमभ्यासोपि प्रमाणं शाब्दिकनये। तदुक्तं हरिणा -

परेषामसाख्येयमभ्यासादेव जायते।

मणिरुप्यादिविज्ञानं तद्विदां नानुमनिकम्।।[२२]

न हि मणिरुप्यादि विज्ञानं प्रत्यक्षप्रमाणजन्यम्, नापि शब्दजं किन्तु अभ्यासमात्रजन्यमेव।

अदृष्टम्

एवमदृष्टमप्यतिरिक्तं प्रमाणमभ्युपगच्छन्ति वैयाकरणाः। तदाह हरिः -

प्रत्यक्षमनुमानञ्च व्यतिक्रम्य व्यवस्थिताः।

पितृरक्षः पिशाचानां कर्मजा एव सिद्धयः।।[२३]

देशकालव्यवहितवस्तुदर्शनं पितृरक्षः पिशाचानां कर्मजसिद्धिवशात् जायते। कर्मजसिद्धिरेवादृष्टमित्युच्यते। अन्तर्धानादिसिद्धयः इति वृषभदेवव्याख्या।

येषां मनः रजोगुणेन तमोगुणेन वा नोपप्लुतं, सत्वगुणपूर्ण राजते, तादृशानां योगिनां व्यवहित वस्तुविषयकं ज्ञानम् अस्मदादिप्रत्यक्षतुल्ययेन जायते। तच्च निश्चयात्मकमेव भवति न सन्देहरूपम्। आर्षेण चक्षषा पश्यतां तेषां ज्ञानं नानुमानेन बाध्यते।

चेष्टा

चेष्टापि प्रमाणत्वेन अङ्गीकृता व्याकरणे। अन्तरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

''अक्षिनिकोचैः पाणिविहारैश्च''[२४] इति सूत्रे भाष्ये इयांस्तु विशेषः - यथा नैयायिकाः प्रमाणपटवः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति सूत्रोक्तरीत्या प्रमाणचतुष्टयमेव स्वीकुर्वन्ति। इतरेषामत्रैवान्तर्भावं साग्रहं प्रदर्शयन्ति। तथा वैयाकरणाः प्रमाणसंख्याविषये आग्रहं न प्रदर्शयन्तीति भाति। अस्तु वा अन्तर्भावः। न कापि क्षतिः।

तदेवं वैयाकरणाभिमतप्रमाणविषये यथामति संक्षेपेण अयं विचारः सङ्गोष्ठ्यामस्यां समर्पितो मया। अत्रत्यं गुणदोषादिकं सुधियो विभावयन्त्विति सविनयमभ्यर्थ्यते।

निबन्धान्तटिप्पण्यः

१. मा.मे.१.१५	२. मा.मे.पृ.१४३
३. मा.मे.प्रमाणखण्डान्ते, पृ.१४६	४. वा.प.२.१४०
५. वा.प.२.१४१	६. अष्टा.३.२.१०२
७. अष्टा.२.१.२४	८. म.भा.१.३.१
९. अष्टा.४.१.३	१०. अष्टा.२.१.५४
११. वा.प.३.३६०	१२. वा.प.३.३७५
१३. वा.प.३.३७६	१४. वा.प.३.३८३
१५. वा.प.१.३०	१६. वा.प.१.३४
१७. वा.प.१.४१	१८. वा.प.१.४३
१९. वा.प.२.१४३	२०. वा.प.२.१४७
२१. वा.प.२.१५२	२२. वा.प.१.३५
२३. वा.प.१.३६	२४. अष्टा.२.१.१

In Public domain. Digitization Muthulakshmi Research Academy

प्राभाकरसम्मतम् अर्थापत्तिस्वरूपम्

आचार्यः का.ई.देवनाथन्

प्राभाकराः प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः अर्थापत्तिश्चेति पञ्चप्रमाणानि उररीकुर्वन्ति। तार्किकादिभिः अर्थापत्तेः पृथक् प्रामाणायं नाङ्गीकृतम्। अर्थापत्तिः व्यतिरेकव्याप्तिबुद्ध्या चारितार्थ्यं भजत इत्याहुः तार्किकाः। देवदत्तस्य पीनत्वे सति दिवा भोजनाभावः तस्य रात्रिभोजनं कल्पयति। इयं च कल्पना अर्थापत्तिः तस्याः प्रमित्यन्तरत्वे अर्थापयामि कल्पयामि इति अनुव्यवसायः प्रमाणम् इति प्राभाकराः। अत्र व्यतिरेकव्याप्तिरेव वक्तव्या इति तार्किकाः। व्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वे सति अर्थापत्तेः प्रमाणान्तरत्वं नावश्यकम्। उदाहृतस्थले केवलव्यतिरेक्यनुमानमेव स्वीक्रियते। व्यतिरेक्यनुमानसिद्धौ अर्थापत्तिः न मानान्तरम्, तेनैव तदर्थसिद्धेः इति तत्त्वचिन्तामणिग्रन्थः। तेनैव अनुमानेनैव तदर्थस्य अर्थापत्तिप्रमाणफलस्यानुभवस्य सिद्धेः - उत्पत्तेः इति तदर्थः। एवं स्थिते भाट्टप्राभाकरमतयोरर्थापत्तिस्वरूपं निरूप्य प्राभाकरसम्मतं तत्स्वरूपं विव्रियतेऽत्र निबन्धे।

भाट्टमतम् - देवदत्तस्य शतवर्षजीवित्वे ज्योतिश्शास्त्रादवगते सति तस्य गृहासत्वे ज्ञाते सति जीवतो गृहासत्त्वं बहिस्सत्त्वं विनानुपपन्नमिति यज्ज्ञानं तद्भवति अर्थापत्तिप्रमाणम्। ततः बहिरस्तीति जायमाना धीः अर्थापत्तिप्रमितिः। अर्थापत्तिशब्दः व्युत्पत्तिभेदेन प्रमाणं, प्रमितिं च वदति। न च देवदत्तः, बहिरस्ति, जीवित्वे सति गृहासत्वात् इत्यन्वयानुमानेनैव बहिस्सत्वस्यावगन्तुं शक्यत्वे किमर्थमतिरिक्तप्रमाणत्वमिति वाच्यम्, केवलस्य जीवनस्य बहिस्सत्त्वव्यभिचरितत्वेन गृहाभावविशिष्टस्य तस्य हेतुत्वेन वक्तव्ये बहिः सत्त्वग्रहणात् पूर्वं तस्य गृहीतुमशक्यत्वात्।

तस्माद्योविद्यमानस्य गृहाभावोऽवगम्यते।
स हेतुः स बहिर्भावं नागृहीत्वा च गृह्यते।। इति बृहती स्पष्टयतीममर्थम्।

अयमाशयः - देवदत्तः गृहे नास्तीति प्रत्यक्षेणावगतम्। सः जीवतीति ज्योतिश्शास्त्रेण तन्मूलकानुमानेन वा ज्ञातम्। एवं प्रमाणद्वयस्य विरोधे सति विरोधपरिहाराय बहिस्सत्त्वं कल्प्यते। अत्र यः जीवन् यत्र नास्ति स ततोऽन्यत्रास्ति यथाऽहम् इति सामान्यमुखी व्याप्तिः शङ्कितुं न शक्यते। जीवनगृहाभावयोः साहित्यं हि बहिःसत्त्वघटितम् इति बहिस्सत्त्वज्ञानाभावे जीवनविशिष्टस्य गृहाभावस्य ज्ञानं न भवेत्।

न च न मानयोः विरोधोऽस्ति प्रसिद्धे वाप्यसौ समः इति ग्रन्थेन उदयनाचार्येण प्रमाणयोः विरोधो नास्ति, अस्ति चेत् तयोरन्यतरस्य बाध्यत्वम् एव, एतादृशो हि विरोधः अनुमानेऽपि प्रसिद्धे

आचार्यः, विशिष्टाद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

सम्भवति, ततः अनुमानं सर्वं गच्छेत् इत्युक्तम् इति वाच्यम्, जीवनप्रमाणस्य गृहाभावप्रमाणस्य च साधारणाऽसाधारणरूपत्वेन साऽवकाशनिरवकाशन्यायावतारेणोभयोः प्रामाण्यस्यापरित्यागात्। किञ्च प्रसिद्धे वह्न्यनुमानेप्यसौ समः इति प्रश्नो न युक्तः। तत्र एवं विरोधो वक्तव्यः - यत्र धूमः तत्राग्निः इति व्याप्तिग्राहकप्रमाणेन पर्वतेऽपि अग्निः प्राप्तः। अग्नेः पर्वतस्योर्ध्वदेशेऽनुपलम्भेन पर्वतोर्ध्वदेशे अग्न्यभाव-प्रमाणस्य व्याप्तिग्राहकप्रमाणेन विरोधे सति पर्वतनितम्बदेशेऽग्निरस्ति इति कल्पना अर्थापत्तिरेव किं न स्यादिति। तत्रोच्यते पर्वतस्याग्निप्रापकं साधारणं प्रमाणं किम् इति प्रश्नः। अदृष्टपर्वतस्य पुरुषस्य कथं पर्वतेऽग्निमत्त्वज्ञानं भवेत् व्याप्तिग्रहणप्रमाणेनापि। न हि सामान्यलक्षणायाः स्वीकारः भाट्टमते। अतोऽग्नि-प्रापकं साधारणप्रमाणं नास्ति इति न अनुमानसामान्यस्यापायः। अतोऽर्थापत्तिः पृथक् प्रमाणम्। यदुक्त-मुदयनाचार्यैः अनियम्यस्य नायुक्तिः, नानियन्तोपपादक इति। तत्रापि व्याप्तेः सत्त्वेऽपि तस्या अप्रति-सन्धानेऽपि जायमानाया धीविशेषस्यातिरिक्तत्वमेवेति समाधानम्।

प्राभाकरमतम्

प्राभाकरा अर्थापत्तेः पृथक्प्रमाणत्वं स्वीकुर्वन्तोऽपि जीवनस्य सन्दिग्धस्य गमकत्वात्, लिङ्गस्य च निश्चितस्यैव गमकत्वात् नानुमानेऽन्तर्भावः तस्या इति वदन्ति। तथा हि ज्योतिश्शास्त्रेण तत्कथित-लिङ्गाद्वा देवदत्तस्य शतवर्षजीवित्वमवगतम्, शतवर्षजीवी गृह एव भवतीति प्रत्यक्षेणावगतम्, ततः योग्यानुपलब्ध्या गृहेऽभावो निश्चितः जीवनग्राहकप्रमाणस्य, गृह एव भवतीति नियमग्राहकप्रमाणस्य च बलाबलस्याज्ञातत्वात् तज्ज्ञानद्वये प्रमात्वसंशयो जायते, अयं च प्रमात्वसंशयः देवदत्तो जीवति न वा इत्याकारको जायते। अत्र जीवति न वेति संशयो यथा, तथा देवदत्तो गृहान्यावृत्तिर्वा न वा इत्यपि संशयो भवितुमर्हति। एवं च शतवर्षजीविनः गृहेऽसतः विषये जातस्यास्य संशयस्य निवृत्तये गृहाऽसत्व-विशिष्टजीवनव्यापकं बहिस्सत्त्वं कल्पनीयम्। बहिस्सत्त्वे कल्पिते गृहाभावविशिष्टो जीवति न वा इति संशयः, तथा देवदत्तो जीवन् गृहान्यवृत्तिर्न वा इति संशयश्च निवर्तते। जीवतो गृहान्यवृत्तित्वस्य बहिस्सत्वरूपत्वात्।

अत्र प्राभाकराः गृहाभावः, निश्चयद्वयधर्मिकप्रामाण्यसंशयः, जीवनसंशयो वा अर्थापत्तिप्रमाणम् इति वदन्ति। अत्र प्रमाणयोः विरोध इत्यनेन प्राभाकरैः ज्योतिश्शास्त्रप्रत्यक्षयोः विरोधो दर्शितः न भाट्ट-मतवत् जीवनानुपलब्धिप्रमाणयोः विरोधः प्रादर्शि। गृहाभावनिश्चयेन जीवनस्य सन्देहः गृहान्यवृत्तित्व-संशयरूपोऽपि भवतीति कृत्वा ग्रन्थेषु संशयद्वयं न प्रदर्शितम्। न च गृहाभावनिश्चयः मृतेऽपि दृष्ट इति तस्य वहिस्सत्त्वकल्पकत्वं व्यभिचारात् न भवतीति वाच्यम्, न हि केवलगृहाभावनिश्चयस्य बहिस्सत्त्व-कल्पकत्वं ब्रूमः अपि तु प्रमाणद्वयजनितनिश्चयविशिष्टगृहाभावनिश्चयजनितसंशय एव कल्पनाङ्गम्।

In Public domain. Digitization Muthulakshmi Research Academy

न हि अर्थापत्तिप्रमाणमस्मन्मते निश्चयः, किन्तु संशय एव, स च न गृहाभावस्य किन्तु जीवनस्य। अत एव मृतजनिष्यमाणविषयकगृहाभावनिश्चयः पूर्वोक्तसंशयापादको न भवतीति तत्र न बहिस्सत्त्व-कल्पना।

ननु जीवनगृहान्यावृत्तित्वप्रमाणयोः यदि तुल्यबलत्वं स्यात् तदा विशेषदर्शनविरहात् न बहिः सत्त्वकल्पना। बहिः सत्त्वव्याप्यस्य गृहासत्त्वविशिष्टशतवर्षजीवनस्य निश्चयाभावात्। गृहान्यावृत्तित्व-प्रापकप्रमाणे सति एतादृशव्याप्यस्य निश्चयायोगात्। न च व्याप्यसंशयस्यैव हेतुत्वमर्थापत्तिस्थले स्वीक्रियत इति वाच्यम्। जीवननिर्वाहकबहिस्सत्त्ववत् गृहसत्त्वनियमनिर्वाहकस्य मरणस्यापि कल्पना-प्रसङ्गात्। अतोऽनुमानप्रमाणेन बहिस्सत्त्वं साधनीयम्, तत्र च जीवित्वस्य संशयो नेष्टव्यः। अपि च गृहाभावनिश्चयः जीवनसंशयजनकः (बहिः सत्त्वसंशयजनकः) इति।

In Public domain. Digitization Muthulakshmi Research Academy

मीमांसकसंमतम् अर्थापत्तिप्रमाणम्

डा. मणिद्राविड्

अर्थापत्तिप्रमाणं तावत् शाबरभाष्ये इत्थं निरूपितम् - अर्थापत्तिरपि दृष्टः श्रुतो वा अर्थः अन्यथा नोपपद्यते इत्यर्थकल्पना (शाबरभाष्यम्.१.१.५) इति। अस्यार्थः - दृष्टस्य श्रुतस्य वा अर्थस्य अनुपपत्तिज्ञानेन उपपादककल्पनम् अर्थापत्तिः इति। प्रत्यक्षादिप्रमाणेन शब्दातिरिक्तेन प्रमितोऽर्थः दृष्टशब्देन विवक्षितः। श्रुतशब्देन च शब्दप्रमाणप्रमितो विवक्षितः। श्रुतार्थापत्तेः प्रमाणग्राहकत्वरूप-विशेषात् पृथग् ग्रहणम्। अनुपपत्तिर्नाम प्रमाणान्तरेण विरोधः। अतश्च सामान्यतो बोधकस्य प्रमाणस्य विशेषबोधकप्रमाणेन सह विरोधज्ञानेन अविरोधनिर्वाहकार्थान्तरकल्पनम् अर्थापत्तिरिति फलितम्। यथा ज्योतिश्शास्त्रोक्तगणितमूलकानुमानेन देवदत्तः क्वचिज्जीवतीति सामान्येनावगतम्। गृहे देवदत्तो नास्तीति चानुपलब्ध्याऽवगतम्। अनयोः प्रमाणयोः विरोधे सति अविरोधाय देवदत्तस्य गृहाद् बहिः सद्भावः कल्प्यते। तेन च क्वचिदस्तित्वबोधकप्रमाणस्य गृहाभावबोधकप्रमाणस्य चाविरोधः उपपादितो भवति। तदत्र प्रमाणयोर्विरोधज्ञानं करणम्। उपपादकज्ञानं फलमिति स्थितिः। अस्याश्चार्थापत्तेः शक्त्यादिसाधने उपयोगः शास्त्रदीपिकादिग्रन्थेषूपवर्णितः।

अत्र तार्किकाः इत्थं मीमांसकमतं दूषयन्ति - प्रमाणयोः द्वयोर्विरोध एव न सम्भवति, विरोधे सति एकस्याप्रमाणत्वात्। इदं रजतम् नेदं रजतम् इति ज्ञानयोः अन्यतरस्याप्रमाणत्वं हि प्रसिद्धम्। किञ्च ज्योतिश्शास्त्रमूलकानुमानेन देवदत्तस्य जीवित्वावगमेऽपि तस्य देशविशेषसम्बन्धो नावगम्यते। गृहाभावबोधकप्रमाणेन च न देवदत्तस्य जीवनं निराक्रियते, किन्तु गृहाभावमात्रं बोध्यते। अतश्च जीवनगृहाभावयोरविरोधात् प्रमाणद्वयविरोधरूपम् अर्थापत्तिप्रमाणं न सम्भवति।

अपि च - यत्र यत्र धूमः तत्र तत्राग्निः इति व्याप्तिग्राहकप्रमाणेन पर्वतेऽपि अग्निरवगम्यते। प्रत्यक्षप्रमाणेन च पर्वते वह्निः नोपलभ्यते। तत्र उभयोः प्रमाणयोः विरोधे पर्वते चक्षुर्व्यवहितप्रदेशे अग्निसद्भावज्ञानस्य अर्थापत्तितैव स्यात्, नानुमितिता। सर्वत्र चैवमनुमानस्थले व्याप्तिग्राहकप्रमाणस्य प्रत्यक्षस्य च विरोधे अर्थापत्तिरेव प्रसरेदिति अनुमानं दत्तजलाञ्जलि प्रसज्येत। तदुक्तं न्यायकुसुमाञ्जलौ उदयनाचार्यैः - न मानयोर्विरोधोऽस्तिप्रसिद्धे वाऽप्यसौ समः (न्या.कु.३.१९) इति। अनुमानं तु पृथक् प्रमाणत्वेनेष्यते मीमांसकैरपि।

सहाचार्यः, मद्रपुरी संस्कृतकलाशाला, मद्रपुरी.

In Public domain. Digitization Muthulakshmi Research Academy

अतश्च उक्तस्थले इत्थमनुमीयते - देवदत्तो बहिरस्ति, जीवित्वे सति गृहेऽसत्त्वात्, यो जीवन् सन् यत्र नास्ति स ततोऽन्यत्रास्ति, यथाऽहमिति। अतः अनुमानेनैव गतार्थत्वात् अर्थापत्तिः न पृथक् प्रमाणम् इति।

अत्रैवं मीमांसकाः समादधते - यदुक्तं प्रमाणयोर्विरोधो न सम्भवति, विरोधे एकस्याप्रमाणत्वनियमादिति, तन्न। प्रमाणयोर्विरोधे सति एकस्याप्रमाणत्वनियमः यत्र विशेषप्रमाणयोर्विरोधस्तत्रैव। यथा इदं रजतम् नेदं रजतम् इत्यत्र। सामान्यविशेषप्रमाणयोस्तु विरोधे नान्यतरस्याप्रामाण्यनियमः। यथा - यदाहवनीये जुहोति पदे जुहोति इत्यनयोः। अत्र हि होमसामान्योद्देशेन आधारत्वेन आहवनीयो विहितः यदाहवनीये जुहोति इति सामान्यशास्त्रेण। पदहोमरूपविशेषोद्देशेन पदनिक्षेपदेशविशेषः आधारत्वेन विहितः पदे जुहोति इति विशेषशास्त्रेण। पदहोमे च उभयोः प्राप्तौ विरोधे सति विशेषप्रमाणेन सामान्यप्रमाणस्य स्वविषयातिरिक्तविषये सङ्कोचेऽपि नाप्रामाण्यम्। तदप्रामाण्ये हि कुत्रापि होमे आहवनीयप्राप्तिर्न स्यात्। स्पष्टं चैतद् वार्तिकादिग्रन्थेषु। तस्मात् सामान्यविशेषप्रमाणद्वयविरोधः सम्भवत्येव।

यच्चोक्तम् - जीवनग्राहकप्रमाणेन गृहरूपदेशविशेषसम्बन्धानवगमात् जीवनगृहाभावयोरविरोधात् प्रमाणद्वयविरोधरूपम् अर्थापत्तिप्रमाणं न सम्भवतीति, तदपि न। जीवनग्राहकप्रमाणेन हि जीवनस्य किञ्चिद्देशसम्बन्धितयैवावगमः। देशाऽसम्बन्धित्वं जीवनं चेति व्याहतम्। सोऽपि च सामान्येनावगतो देशः गृहतदितरदेशानामन्यतमो देश एव, युगपद् अनेकदेशस्थितेरसम्भवात्। अतश्च जीवनग्राहकप्रमाणेन जीवनस्य सामान्येन किञ्चिद्देशसम्बन्धितयाऽवगतस्य विशेषापेक्षया अनेकदेशस्थितेरसम्भवात्। अतश्च जीवनग्राहकप्रमाणेन जीवनस्य सामान्येन किञ्चिद्देशसम्बन्धितयाऽवगतस्य विशेषापेक्षया गृहरूपदेशविशेषे यदा पर्यवसानम्, तेन च गृहे देवदत्तस्य सत्तां प्रतीत्य तं दिदृक्षोः तद्गृहगमनम्, तदा गृहाभावज्ञाने सति पूर्वप्रमितार्थस्य विरोधज्ञानं भवत्येव। यद्यपि जीवनगृहाभावयोरविरोधः, तथापि जीवन् देवदत्तो गृहेऽस्ति इति ज्ञानविषयीभूतस्य गृहसत्ताविशिष्टजीवनस्य गृहाभावेन विरोधोऽस्त्येव। सामान्यतो जीवनग्राहकप्रमाणस्य विशेषे पर्यवसानस्यावश्यकत्वेन गृहरूप एकस्मिन् विशेषे पर्यवसाने गृहाभावग्राहकप्रमाणेन सह विरोधप्रतीतिमात्रमिह अर्थापत्तौ सामग्री। जीवनग्राहकप्रमाणस्य गृहातिरिक्तदेशेऽपि अवकाशोऽस्तीति विरोधपरिहारः। वास्तवः प्रमाणयोर्विरोधस्तु नास्माकमप्यभिमतः, तस्य परिहर्तुमशक्यत्वात्। गृहसत्तांशे तदप्रामाण्यमपीष्टमेव।

यदप्युक्तं प्रसिद्धानुमानानामपि ईदृशविरोधसत्त्वात् अर्थापत्तित्वं स्यादिति, तदपि न। प्रसिद्धानुमानस्थले प्रमाणद्वयविरोधाभावात्। न हि व्याप्तिग्राहकप्रमाणेन पर्वते अग्निः प्राप्यते। न हि अनुमितेः पूर्वं व्याप्तिग्रहदशायां पर्वतस्य अग्निमत्ताऽवगम्यते। तथा सति अनुमानस्यैव विलोपापत्तेः,तत्प्रमेयस्य व्याप्तिग्राहकप्रमाणेनैव विषयीकृतत्वात्। ततश्च व्याप्तिग्राहकप्रमाणेन

In Public domain. Digitization Muthulakshmi Research Academy

धूमे वह्निव्याप्ति- ग्रहणेऽपि पक्षे साध्यसम्बन्धस्याविषयीकरणात् अनुमानमेव पर्वते अग्निग्राहकं वक्तव्यम्। तच्च विशेष-विषयमेवेति न सामान्यविशेषप्रमाणद्वयविरोधः तत्रास्ति। वस्तुतस्तु व्याप्तिग्रहे न सर्वधूमवतामग्निमत्त्वं विषयः। दृष्टान्तधर्मिष्वेव धूमाग्निसाहचर्यस्य तदानीं प्रतीतेः। यत्र यत्र धूमः तत्र तत्राग्निः इति तु न व्याप्तिज्ञानम्, किन्त्वनुमानमेवेति स्पष्टं न्यायरत्नमालादिग्रन्थेषु। ततश्च पर्वतस्याग्निमत्त्वं नानुमाना- त्प्राक् सिद्धमित्यनुमानं निर्बाधं प्रवर्तते। यदि चानुमानेन पर्वते अग्नौ ज्ञाते अग्नेरूर्ध्वदेशेऽनुपलम्भेन विरोधे अधःप्रदेशे स्थितिरवगम्यते, तर्हि साऽर्थापत्तिरेवेति इष्टमेवैतत् मीमांसकानाम्।

यत्पुनरनुमानं प्रयुक्तम् - देवदत्तो बहिरस्ति, जीवित्वे सति गृहेऽसत्त्वात् इति, तत्र जीवित्वे सति गृहेऽसत्त्वादिति हेतुः स्वरूपाऽसिद्धः। बहिर्भावरूपसाध्यसिद्धिं विना जीवनविशिष्टगृहाभावस्य प्रत्येतुमशक्यत्वात्। तथाहि - देवदत्तं जीवन्तं ज्ञात्वा तं द्रष्टुकामः तद्गृहं गच्छतीति लोके प्रसिद्धम्। तत् कुतः? जीवनस्य हि सामान्यतः किञ्चिद्देशसम्बन्धितयैवावगतस्यापि पर्यवसानगत्या गृहरूपदेश-सम्बन्धितया ज्ञातत्वात्। अन्यथा तस्य नियमेन देवदत्तगृहगमनानुपपत्तेः। अतश्च तस्य गृहे बाधे सति देशान्तरसम्बन्धित्वकल्पनात् प्राक् पूर्वोक्तरीत्या विरोधज्ञाने जाग्रति गृहाभावेन सह समुच्चित्य जीवनस्य ज्ञातुमशक्यत्वात् नोक्तविशिष्टहेतुसिद्धिः। विशेष्यमात्रं, विशेषणमात्रं वा बहिस्सद्भाव-व्यभिचारीति न हेतुः। अर्थापत्त्या देशान्तरसम्बन्धित्वज्ञाने जाते तु विरोधपरिहारेण हेतुसिद्धिः स्यात्। परन्तु अनुमानं तदानीं व्यर्थम्। गृहाद् बहिर्भावस्य हेतुज्ञानात् प्रागेव सिद्धत्वात्। तदुक्तम् बृहट्टीकायाम्-
तस्माद् यो विद्यमानस्य गृहाभावोऽवगम्यते। स हेतुः स बहिर्भावं नागृहीत्वा च गृह्यते इति।।

अतश्च जीवनग्राहकप्रमाणेन किञ्चिद्देशसम्बन्धितयैव जीवनस्य प्रमितत्वात्, गृहरूपस्य देशविशेषस्य बाधे सति तद्भिन्नदेशसम्बन्धित्वस्य सिद्धेः प्राक् जीवनग्राहकप्रमाणस्य विरोध एव प्रसज्ज्येत। स च बहिर्देशसम्बन्धसिद्धेः प्राक्कालीनः। तन्निवृत्तये च देवदत्तस्य बहिर्देशस्थितिः कल्प्यत इति पृथगेव अर्थापत्तिप्रमाणमङ्गीकार्यम्।

इदं त्ववधेयम् - नास्माभिः उक्तस्थले अनुमानस्य गतिः सर्वथा निरुध्यते। भवतु नाम विशिष्ट-हेतुसिद्ध्यनन्तरं सिषाधयिषयाऽनुमानम्। किन्तु अर्थापत्तिः तत्र नापलपितुं शक्यत इत्येतावत् प्रति-पाद्यते। भिन्ना हि अर्थापत्त्यनुमानयोः सामग्री। पक्षधर्मताज्ञानव्याप्तिज्ञानादिघटिता अनुमानसामग्री। न तत्र प्रमाणयोर्विरोधज्ञानस्यापेक्षा। सामान्यविशेषप्रमाणद्वयविरोधप्रतीतिघटिता अर्थापत्तौ सामग्री। ततश्च व्याप्त्यादिप्रतिसन्धानं विनैव अनुपपत्तिज्ञानेन यत्रार्थविशेषप्रतिपत्तिः तत्रार्थापत्तिरवश्यमङ्गी-कार्यैति दिक्।

In Public domain. Digitization Muthulakshmi Research Academy

मीमांसकमते अनुपलब्धिः

डा. देवदत्त गोविन्द पाटिल्[1]

गोडाकुलाब्धिपूर्णेन्दु सुब्रह्मण्यबुधं गुरुम्।
शिष्यारविन्दतरणिं वन्दे वाञ्छितसिद्धये।।

मीमांसकमतरीत्या अनुपलब्धेः प्रमाणान्तरत्त्वोपन्यासायाऽयं यत्नः क्रियते। प्रतियोगिविषयक-प्रत्यक्षादिप्रमाणानामभाव एव अनुपलब्धिर्नाम। उपलब्धिर्ज्ञानं तस्य च सामग्रीत्वे उपपत्तिः सिद्धैव। तथाहि इन्द्रियसन्निकर्षाऽलोकसंयोगादिकारणसत्वे भूतले घटप्रत्यक्षं भवति। एतादृशसामग्रीसत्वेऽपि इन्द्रियादीनां समवधानविशेषेऽपि यदा घटः न गृह्यते, इयं भवति अनुपलब्धिः। इयं भवति च अभावप्रमायां हेतुः भूतले घटो नास्तीति। तत्र एतादृशानुपलब्धेः कारणत्वे न नैयायिकमीमांसकयोः विवादः किन्तु करणत्वे एव । भूतलादिधर्मिग्राहकत्वेन क्लृप्तेन इन्द्रियेणैव विशेषणताख्यसन्निकर्षसचिवेन अभावप्रत्यक्षोत्पत्तिसम्भवे अतिरिक्तकरणकल्पनं मीमांसकानामयुक्तमिति नैयायिकानामाशयः। तदुक्तमाचार्यैः -

प्रतिपत्तेः आपरोक्ष्यात् इन्द्रियस्यानुपक्षयात्
अज्ञानकरणत्वात् च भावावेशाच्च चेतसः।
प्रतियोगिनि सामर्थ्यात् व्यापारव्यवधानतः
अक्षाश्रयत्वात् दोषाणामिन्द्रियाणि विकल्पनात्।। इति।

भूतले घटाभावः इति प्रत्ययः प्रत्यक्षरूपः इति साधनाय इमे हेतवः क्रमेण तैरुपन्यस्ताः। तेषां पक्षवृत्तित्वादिनिर्वाहानुरोधेन अर्थतः अनुवादः क्रियते। तत्रानुपलब्धिविशेषस्य प्रत्यक्षान्तर्भावः श्रूयताम् - इयमभावप्रतिपत्तिरिन्द्रियापरोक्षत्वात्, कार्यान्तानुपक्षीणेन्द्रियसापेक्षत्वात्, अज्ञायमान-करणकत्वात्, मनसो भावरूपं करणान्तरमाविश्यैव बाह्यानुभवजनकत्वदर्शनबलसिद्धात् मनस्सह-कारिभावभूतकरणसापेक्षत्वरूपहेतोश्च रूपादिप्रतीतिवदिति। तथा च एतैः हेतुभिः तादृशज्ञानस्य प्रत्यक्षरूपता सिद्ध्यतीति आचार्याणामाशयः।

अत्र चिन्त्यते। भट्टपादैः श्लोकवार्तिकग्रन्थे अनुमानप्रमाणे व्याप्तिनिरूपणावसरे इत्थमभिहितम्-

व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्मः प्रयोजकः।
यस्मिन् सति अमुना भाव्यमिति शक्त्यानिरूप्यते।।

---

1 प्राचार्यः, श्रीनृसिंहसरस्वती पाठशाला (शास्त्रविभागः), पुण्यपत्तनम्.

In Public domain. Digitization Muthulakshmi Research Academy

अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा। इति।

हेतौ दृश्यमाना या व्याप्तिः तस्याः कश्चिद्धर्मः प्रयोजको भवति। स एव साध्यस्य साधकोऽपि। अन्यस्तु अन्यनिष्ठव्याप्तिमुपजीवतीति तस्य न साधकता इति तदाशयः। उदाहृतं च तैः यज्ञीयहिंसां पक्षीकृत्य हिंसात्वेन हेतुना अधर्मत्वसाधकं स्थलम्। अत्र पूर्वपक्षिणा सर्वस्याः अपि वैधहिंसायाः पक्षीकरणात् न व्यभिचारनिरूपणयोग्यस्थलं लभामहे। अतः हिंसात्वं स्वयं नाऽधर्मत्वव्याप्तिमत् किन्तु निषिद्धत्वे विद्यमानानां व्याप्तिमेवोपजीवतीति। न तेन अधर्मत्वं शक्यते साधयितुमिति परिहृतम्। (इदं न्यायपरिभाषायामुपाध्युद्भावनमिति व्यवहर्तुं प्रभवामः।) एवं चाऽनेनैव न्यायेन आचार्योक्तानां निखिलानां हेतूनां परिहारः सुलभः। सर्वस्यापि हेतोः प्रत्यक्षत्वप्रयोजकग्राह्यसम्बद्धत्वरूपपदार्थाधीनमेव साध्यसाधकत्वम्।

उक्तं चान्यत्र भट्टपादैरेव - 'सम्बन्धं वर्तमानं हि गृह्यते चक्षुरादिना' इति। तथा च सम्बन्धार्थग्राहित्वम्, सम्बद्धत्वमित्यादिसम्बन्धघटितपदार्थेषु विद्यमाना एव व्याप्तिः आचार्योक्तहेतुभिरुपजीव्यते इति न हिंसात्वमिवैतेषामपि साध्यसाधकत्वम् । प्रातिस्विकरूपेण पक्षवृत्तित्वाद्यनुरोधेन सम्बन्धघटितधर्माश्चिन्त्याः। उपायान्तरेणाऽचार्योक्तहेतूनां विस्तरेण दूषणं चिदानन्दपण्डितविरचितनीतितत्त्वाविर्भावसंज्ञके ग्रन्थे द्रष्टव्यम्। तथा च सम्बद्धत्वाधीनमेव नैयायिकैः अभावप्रमायाः प्रत्यक्षत्वमेष्टव्यम्। तत्रैव विवादे सति कथं पूर्वोक्ताः हेतवः मीमांसकान् प्रति साधकाः भवेयुः।

किञ्च सन्निकर्षः विशेषणतारूपः। तस्य भूतलाभावान्यतररूपत्त्वे दूषणानां नैयायिकैरेव स्वग्रन्थे उक्तत्वात्, सम्बन्धिनोः सम्बन्धस्य च सत्वे सर्वदा अभावप्रत्यक्षवारणानुरोधेन विशेषरूपेणैव विशेषणतायाः परिष्कर्तव्यतया, तेन रूपेण च सम्बन्धानां स्वीकारस्य च न्यायग्रन्थे एव तत्र तत्र दूषितत्त्वात् अकिञ्चिदेतत्। इतः अभ्युपेत्य सन्निकर्षं, चिन्त्यते। स्वसंयुक्तविशेषणतासन्निकर्षस्य पाषाणसमवेतगन्धे सत्वेऽपि किमिति तस्य प्रत्यक्षं न भवति? पदार्थस्याऽयोग्यत्वादिति समाधेयम्। तर्हि सत्यपि सन्निकर्षे यदनुमानरूपप्रमाणविलम्बात् पाषाणे गन्धवत्ताप्रत्ययाभावः सः पाषाणे गन्धप्रत्ययः तत्प्रमाणप्रयोज्यः इतिवत् भूतलरूपधर्मिणि गृहीते दृष्टे च प्रतियोगिनि सत्यपि सन्निकर्षे यदनुपलब्धिरूपकारणविलम्बात् अभावप्रत्ययानुत्पादः सः अभावप्रत्ययः अनुपलब्धिकारणप्रयोज्यः इति उभयवादिसिद्धौ किमिति अन्तरा सन्निकर्षकल्पनेन प्रमायाः च प्रत्यक्षत्वव्यवस्थापनप्रयासेन। अनुपलब्धिमात्रसाध्याभावप्रमायाः उदाहरणं श्लोकवार्तिके सूचितमपि श्रीमद्पार्थसारथिमिश्रैः तद्व्याख्याने न्यायरत्नाकरे शास्त्रदीपिकायां च विस्तरेणोपपादितम्। विस्तरभयात् नेहोच्यते इति शम्।

In Public domain. Digitization Muthulakshmi Research Academy

शब्दप्रमाणविषये, नानार्थकशब्दप्रयोगस्थले तात्पर्यनिर्णायक-प्रमाणविषये च व्याकरणशास्त्रसिद्धान्तकृताम् आशयप्रदर्शनम्

आचार्यः श्रिष्टि लक्ष्मीप्रसन्नाञ्जनेयशर्मा

भूमिका

प्राधान्येन प्रमाण-प्रमेयादिविचारपरशास्त्रे इव शब्दसाधुत्वप्रतिपादनपरे व्याकरणशास्त्रे प्रमाण-विचारः यद्यपि प्राधान्येन नोपलभ्यते, तथापि महाभाष्य-वाक्यपदीयादिग्रन्थपरिशीलने प्रमाणविषये व्याकरणशास्त्रसिद्धान्तकृतामभिप्रायाः तत्र तत्र विक्षिप्ततया विद्यमानाः अस्माकं दृष्टिपथमायान्त्येव।

प्रकृते शब्दप्रमाणविषये, नानार्थकशब्दप्रयोगस्थले तात्पर्यनिर्णयोपायविषये च व्याकरण-शास्त्रसिद्धान्तकृताम् अभिप्रायाः किञ्चिदिव परिशील्यन्ते, तत्प्रसङ्गेन अन्यत्किञ्चिदपि।

यद्यपि तात्पर्यनिर्णयोपायाः न साक्षात् प्रमाणत्वेन व्यवह्रियन्ते शास्त्रकारैः, नानार्थकशब्द-प्रयोगस्थले शब्दप्रमाणस्य स्वकार्यजनने - एते सहायका भवन्तीति तत्रत्यप्रमाप्रयोजकत्वमाश्रित्य तेऽपि अत्र प्रमाणत्वेन स्वीकृताः।

१.शब्दप्रमाणविषयः

१. शब्दस्य ज्ञाने धर्मः? उत प्रयोगे धर्मः? इति निरूपणावसरे शब्दस्य ज्ञाने धर्मः? इति पक्षे प्रसक्तं 'ज्ञाने धर्मः इति चेत् तथा अधर्मश्च प्राप्नोति, अपशब्दानामपि बहूनां ज्ञायमानत्वात्' इति दोषं निराकुर्वद्भिः भाष्यकारैः उक्तम् - 'नैष दोषः। शब्दप्रमाणकाः वयम् यत् शब्दः आह तत् अस्माकं प्रमाणम्, शब्दः (= एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति म.भा.६.१.४, पृ.८४) इति श्रुतिवाक्यम् च।' शब्दज्ञाने धर्मम् आह न अपशब्दज्ञाने अधर्मम्। यच्च पुनः अशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति न अभ्युदयाय। तद्यथा - 'हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति नापि अभ्युदयाय......' इत्युक्तम्। किञ्च -

२. यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावत् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगवित् दुष्यति चापशब्दैः।।

इति वाक्येन व्याकरणशास्त्रप्रयोजनप्रतिपादनावसरे..... 'यदि श्लोकाः अपि प्रमाणं तर्हि -
यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।

वरिष्ठशोधाधिकारी, ई.एफ्.ई.ओ., पाण्डिच्चेरी.

In Public domain. Digitization Muthulakshmi Research Academy

पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत्।।

इत्ययमपि श्लोकः प्रमाणं भवितुमर्हति' इति एकदेशिना पृष्टे सति भाष्यकारैः समाहितम् - प्रमत्तगीतः एषः तत्रभवतः, यस्तु अप्रमत्तगीतः तत् प्रमाणमिति। अनेन सूचितम् - "भ्रमप्रमादादि- दोषरहितेन आप्तेन प्रयुक्तः शब्दः प्रमाणम्" इति।

३. वृद्धिरादैच् (१.१.१) इति सूत्रभाष्ये 'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण .....' इत्युक्तम्।

अनेन सूचितम् - 'व्याकरणशास्त्रकर्ता पाणिनिः अत्र शास्त्रे आप्तः' इति। एवं 'यथोत्तरं मुनीनां प्रामाण्यम्' इत्यभियुक्तोक्त्या अत्र मुनित्रयमपि प्रमाणभूतमिति, 'व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणम्' इति भाष्यकृद्वचनेन अभियुक्ताः व्याख्याकृतोऽपि अत्र प्रमाणभूताः इति च स्पष्टं ज्ञायते।

४. स्वं रूपं शब्दस्याशब्दसंज्ञा (१.१.६८) इति सूत्रभाष्ये स्वंरूपसूत्रप्रयोजनकथनावसरे - '... शब्देन उच्चारितेन (= वक्तुः उच्चारणेन श्रोतृबुद्धौ अभिव्यक्तेन गामानय दध्यशान इति शब्देन) अर्थो गम्यते। ...' इत्यभिप्रायः प्रकाशितः। अनेन सूचितम् - "ज्ञातः एव शब्दः प्रमाकरणम्, न तु स्वरूपतः सन्" इति।

५. अणुदित्सवर्णस्य चाप्रत्ययः (१.१.६९) इति सूत्रभाष्ये - '... अक्षरसमाम्नाये ह्रस्वाः यत्र गृहीताः तत्र दीर्घादीनाम् अनिर्देशात् अणादिप्रत्याहारग्रहणेषु आदिरन्त्येन सहेता (१.१.७१) इति सूत्रेण ह्रस्वानामेव ग्रहणं स्यात्, दीर्घादीनां ग्रहणं न स्यात्' इति शङ्कायाम् '... अणादिप्रत्याहारेषु आदिरन्त्येन सहेता (१.१.७१) इति सूत्रेण प्रतीयमानाः ह्रस्वाः अणुदित्सवर्णस्य चाप्रत्ययः (१.१.६९) इति सूत्रेण दीर्घान् संप्रत्याययिष्यन्ति' इति एकदेशिना उक्ते सति '... उच्चार्यमाणः एव शब्दः सम्प्रत्यायको भवति न सम्प्रतीयमानः। तद्यथा - 'ऋक् इत्युक्ते संपाठमात्रं गम्यते, नास्यार्थो गम्यते' इत्युक्तम्।

ततः 'अइउण् इत्यादिषु अक्षरसमाम्नायसूत्रेष्वेव - अणुदित्सवर्णस्य चाप्रत्ययः - इति सूत्रेण दीर्घादीनां ग्रहणं भवतु, तत्र ह्रस्वानामुच्चारितत्वात्' इति पुनः शङ्कायाम्, - 'नेत्याह। सर्वथा अवरकालैव (अणुदित्सवर्णस्य चाप्रत्ययः इति, परिभाषा = संज्ञासूत्रम्।) वर्णानामुपदेशस्तावत्। उपदेशोत्तरकाला इत्संज्ञा। इत्संज्ञोत्तरकालः आदिरन्त्येन सहेता इति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा। सवर्णसंज्ञोत्तरकालम् अणुदित्सवर्णस्य चाप्रत्ययः इति (= अणुदित्सवर्णस्य चाप्रत्ययः इति परिभाषा)। सैषा उपदेशोत्तरकाला परिभाषा अवरकाला सती वर्णानामुत्पत्तौ (= दीर्घादीनां

In Public domain. Digitization Muthulakshmi Research Academy

बोधने) निमित्तत्वाय प्रकल्पिष्यते इत्येतन्न। - इत्युक्तम्।'

अनेन सूचितम् - 'ज्ञातात् पदात् जातं पदार्थज्ञानमेव शाब्दबोधे (=वाक्यार्थबोधे) द्वारम्= सहकारिकारणम्' इति। अत एव 'वाक्यार्थज्ञाने पदार्थज्ञानं कारणम्' इति अभियुक्तोक्तिः, तां स्वीकृत्य हलन्त्यम् (१.३.३), नाज्झलौ (१.१.१०) इत्यादिसूत्रेषु अन्योन्याश्रयदोषापादनम्, तद्वारणार्थं सम्पूर्णसूत्रस्य तदेकदेशस्य वा आवृत्त्याद्याश्रयणं च शास्त्रकारैः कृतं सङ्गच्छते।

तथा च - 'आप्तवाक्यं शब्दः इति, सः शब्दः ज्ञातस्सन् प्रमां जनयति' इति। तत्र पदजन्य-पदार्थोपस्थितिः सहकारिकारणम् इति च सूचितमिति वक्तुं शक्यते। तथा च प्राचीननैयायिकादिभिः या शाब्दबोधसामग्री प्रदर्शिता सा व्याकरणमहाभाष्ये एव अस्तीति ज्ञायते।

२.नानार्थकशब्दप्रयोगस्थलविषयः

२.१.नानार्थकशब्दत्वेन अभिमताः केचन शब्दाः

लोके सैन्धवादयः शब्दाः केचन नानार्थकत्वेन प्रसिद्धाः सन्ति। तथापि भर्तृहर्यादिकृतेषु वाक्यपदीयादिग्रन्थेषु व्याकरणसिद्धान्तप्रतिपादकेषु[१] (सूचना - अत्र ग्रन्थमध्ये दातव्याः टिप्पण्यः सर्वाः अपि एतन्निबन्धान्ते दत्ताः) अन्ये केचन अप्रसिद्धाः शब्दाः 'अश्वः अजापयः तेन यस्य तस्य' इत्यादयः नानार्थकशब्दत्वेन उदाहृताः। अतः ते एव मया अत्र स्वीकृताः। तत्र प्रथमतः, तेषां नानार्थकत्वं कथमिति प्रदर्श्यते -

अश्वः इति सुबन्तं सत् - तुरगः इत्यर्थं बोधयति। एवम् 'टु, ओ, श्वि, गति-वृद्ध्योः' इति धातोः < अश्वत् - अश्वताम् - अश्वन्, अश्वः - अश्वतम् - अश्वत इत्यादिक्रमेण > लुङ्मध्यम-पुरुषैकवचने निष्पन्नम् **अश्वः** इति तिङन्तं सत् 'वृद्धिं प्राप्तवान्' इत्यर्थं बोधयति।

'अजापयः' इति सुबन्तं सत् - 'अजायाः पयः' इत्येकमर्थं बोधयति। 'जि-जये' इति धातोः णिजन्तात् लङि मध्यमपुरुषैकवचने < अजापयत् - अजापयताम् - अजापयन्, अजापयः - अजा-पयतम्- अजापयत इत्यादिक्रमेण > निष्पन्नम् **अजापयः** इति तिङन्तं सत् 'त्वं जेतुं प्रयोजितवान्' इत्यर्थं बोधयति।

'तद्' शब्दात् तृतीयैकवचने निष्पन्नं **तेन** इति सुबन्तं सत् - प्रसिद्धं कञ्चित् अर्थं बोधयति। 'तनु = विस्तारे' इत्यस्मात् धातोः लिटि मध्यमपुरुषबहुवचने < ततान - तेनतुः - तेनुः, तेनिथ - तेनथुः - **तेन** इत्यादिक्रमेण > निष्पन्नम् **तेन** इति तिङन्तं सत् 'यूयं विस्तारं कृतवन्तः' इत्यर्थं बोधयति।

'यद्' शब्दात् षष्ठ्येकवचने निष्पन्नं **'यस्य'** इति, एवं 'तद्' शब्दात् षष्ठ्येकवचने निष्पन्नं

In Public domain. Digitization Muthulakshmi Research Academy

'तस्य' इति च सुबन्तं सत् - प्रसिद्धं कञ्चित् अर्थं बोधयतः। 'यसु = प्रयत्ने' इति दैवादिकात् धातोः लोटि मध्यमपुरुषैकवचने <यस्यतु - यस्यताम् - यस्यन्तु। **यस्य** - यस्यतम् - यस्यत इत्यादिक्रमेण> निष्पन्नं **यस्य** इति तिङन्तं सत् 'त्वं प्रयत्नं कुरु' इत्यर्थं बोधयति।

'तसु = उपक्षये' इति धातोः दैवादिकात् लोटि मध्यमपुरुषैकवचने < तस्यतु - तस्यताम् - तस्यन्तु, तस्य - तस्यतम् - तस्यत इत्यादिक्रमेण > निष्पन्नं तस्य इति तिङन्तं सत् 'त्वम् उपक्षयं प्राप्नुहि' इत्यर्थं बोधयति। एवम्, समानानुपूर्वीकाः एते शब्दाः एतादृशाः अन्ये च नानार्थबोधक-शक्तिमत्त्वात् नानार्थकशब्दाः इत्युच्यन्ते।

२.२.नानार्थकशब्दाः सन्ति वा? न वा?

नानार्थकशब्दाः सन्ति वा? न वा? इत्यत्र सामान्यतः मतद्वयमस्ति, नानार्थकशब्दाः न सन्ति इति एकं मतम्। ते सन्ति इति द्वितीयं मतम्। तत्र आद्यमतस्य अयं सारः -

२.२.१.नानार्थकशब्दाः न सन्ति इति मतम्

शब्दस्य अर्थेन साकं तादात्म्यं तन्मूलकः वाच्य-वाचकभावश्च सम्बन्धः भवति। केनचिदर्थेन तादात्म्यापन्नः शब्दः अन्येन अर्थेन तादात्म्यापन्नात् शब्दात् भिन्नः इति स्वीकार्यम्। तथा च विष्णुरूपार्थेन तादात्म्यापन्नात् हरिशब्दात् इन्द्ररूपार्थतादात्म्यापन्नः शब्दः भिन्न इति, आनुपूर्वी-सादृश्यमात्रेण एकोऽयं हरिशब्दः नानार्थः इति लौकिकानां व्यवहारः, वस्तुतः भिन्नार्थाः शब्दाः भिन्ना एवेति एतेषामाशयः। अत्र 'हलोऽनन्तरास्संयोगः' इति सूत्रस्थम् सारण्यक-ससीमक-सस्थण्डिलक-प्रदेशविशेषबोधकः ग्रामशब्दः शालासमुदायवाचकात् ग्रामशब्दात् भिन्नः इत्यर्थसूचकम् '... तत् यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्य एतत्प्रयुज्यते अनन्तराविमौ ग्रामौ इति ...' इति भाष्यं प्रमाणम्। एतदनुसारेण आगतः एव 'अर्थभेदात् शब्दभेदः' इति न्यायः।

अत्र विष्णवादिवाचकः हरिशब्दः नाना, तदर्थाश्च नाना, तत्तदर्थतादात्म्यानि शब्दनिष्ठानि (= तत्तदर्थबोधनशक्तयः) च नाना। अर्थभेदात् शब्दभेदः इति मतेऽपि केचन एवं मन्यते - यत्र विस्तृतार्थकस्य शब्दस्य लक्षणया अर्थसङ्कोचः क्रियते तत्र अर्थभेदेऽपि शब्दभेदव्यवहारः भाष्यकाराणां न सम्मतः। यथा निवृत्तप्रेषणपक्षे[2] प्रथम-तृतीयकक्ष्ययोः फलविशिष्टव्यापाररूपार्थवाचकयोः शुद्ध-ण्यन्तधात्वोः, द्वितीय-चतुर्थकक्ष्ययोः फलरूपार्थमात्रलक्षणायामपि न धातुभेद (= शब्दभेद) व्यवहारः। यत्र हर्यादिशब्दाः इन्द्रादिरूपमत्यन्तभिन्नमर्थं वदन्ति, तत्रैव 'अर्थभेदात् शब्दभेदव्यवहारः' इति।

२.२.२.नानार्थकशब्दाः सन्ति इति मतम्

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयमतस्य अयं सारः - यथा एकस्मिन् वृन्ते अनेकानि फलानि सम्बद्धानि सन्ति, यथा वा एकस्मिन् आम्रफले रूपतादात्म्यं रसतादात्म्यं गन्धतादात्म्यं चेत्येवमादीनि बहूनि सम्भवन्ति, तथा एकस्मिन् हरिशब्दे विष्णुरूपार्थतादात्म्यमिन्द्ररूपार्थतादात्म्यं कपिरूपार्थतादात्म्यं चेत्येवमादीनि बहूनि सम्भवन्ति। तत्तदर्थानां तत्तदर्थनिरूपितानां शब्दनिष्ठानां बोधकत्वशक्तीनाञ्च भेदेऽपि तत्तत्तादात्म्यापन्नशब्दस्तु एक एव। अतः अनेकार्थकः/नानार्थः शब्दः एक एव। अत्र च प्रमाणं 'हलोऽनन्तरास्संयोगः' इति सूत्रस्थं '.... ग्रामशब्दोऽयं बह्वर्थः...' इत्यादिभाष्यमेव। एतदनुसारेण आगत एव 'अर्थभेदात् शक्तिभेद एव न शब्दभेदः' इति न्यायः। तथा च हरिशब्दः एकः, तदर्थाः नाना, तादात्म्यानि (= शक्तयः) च नाना इति। अयमेवाशयः वाक्यपदीये द्वितीयकाण्डे -

> एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः।
> निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते।। २५०।।
>
> भेदपक्षेऽपि सारूप्यात् भिन्नार्थाः प्रतिपत्तिषु।
> नियता यान्त्यभिव्यक्तिं शब्दाः प्रकरणादिभिः।। ३१७ ।।

इति कारिकाभ्यां प्रकटितः।

तथा च नानार्थकशब्दाः सन्ति इति केषाञ्चिन्मतम् इति, न सन्ति इति अन्येषां मतमिति, तच्च उभयं भाष्यसम्मतमेव इति च सिद्धम्।

२.३.नानार्थकशब्दस्थले तात्पर्यग्राहकप्रमाणानि

एवं मतभेदेन नानार्थकशब्दसिद्धौ, काचन शङ्का जायते - सैन्धवमानय इत्यादिलौकिकवाक्येषु 'संख्याया अतिशदन्तायाः कन्' (५.१.२२) इत्यादिशास्त्रवाक्येषु च सैन्धवसङ्ख्यादिनानार्थकशब्दप्रयोगे नानार्थानामुपस्थितत्वात् कथं निश्चितैकार्थशाब्दबोधः भवति? इति। अत्र महाभाष्यग्रन्थात् समाधानमेवं लभ्यते - अर्थप्रकरणादीनां साहाय्येन निश्चितार्थशाब्दबोधः भवति इति। 'बहु-गण-वतु-डति-संख्या'(१.१.२३) इति सूत्रभाष्ये - बह्वादीनां संख्यासंज्ञाकरणे संख्याप्रदेशेषु 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इति परिभाषया कृत्रिमसंख्याया एव प्रतीतिः प्राप्नोति। तथा च 'संख्याया अतिशदन्तायाः कन्' (५.१.२२) इत्यादिशास्त्रवाक्येषु संख्याशब्देन अकृत्रिमसंख्याया अपि प्रतीतिः इष्टा न स्यात् इत्याशङ्क्य अन्यत्र लोके कृत्रिमसंज्ञायाः ग्रहणे 'अर्थप्रकरणादिकमस्ति तात्पर्यग्राहकम्। अत्र व्याकरणे तु यत्र प्रकरणादिकमुल्लङ्घ्य अप्राकरणिकार्थबोधनेऽपि तात्पर्यग्राहकमस्ति तत्र कृत्रिमस्य अकृत्रिमस्य च प्रतीतिः भवत्येव'[३] इत्यभिप्रायः प्रकटितः। तत्र भाष्यमेवमस्ति

In Public domain. Digitization Muthulakshmi Research Academy

- '... नैष दोषः। अर्थात् प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति।' अर्थो वा अस्य एवं संज्ञकेन भवति, प्रकृतं वा तत्र भवति - इदमेवं संज्ञकेन भवति, प्रकृतं वा तत्र भवति- इदमेवं संज्ञकेन कार्यमिति।[४] आतश्च अर्थात् प्रकरणाद्वा - अङ्ग! हि भवान् ग्राम्यं पांशुलपादम् अप्रकारणज्ञम् आगतं ब्रवीतु गोपालकमानय ...[५] इति। उभयगतिः (= कृत्रिमाकृत्रिमयोः उभयोरपि ज्ञानम्, ततश्च को वा अत्र विवक्षित इति सन्देहश्च) तस्य भवति। यः गाः पालयति सः यष्टिहस्तः एव तस्य परिचित इति कृत्वा तस्य साधीयो वा यष्टिहस्तं गमिष्यति।[६] यथैव तर्हि अर्थात् प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति एवमिहापि प्राप्नोति - जानाति ह्यसौ बह्वादीनामियं संज्ञा कृतेति। न यथा लोके तथा व्याकरणे। उभयगतिः (= कृत्रिमाकृत्रिमयोः उभयोरपि ज्ञानम्) पुनः, इह (= व्याकरणशास्त्रे) भवति। अन्यत्रापि, नावश्यमिहैव (= संख्यासंज्ञासूत्रे एव), तद्यथा 'कर्तुरीप्सिततमं कर्म' इति कृत्रिमा कर्मसंज्ञा। कर्मप्रदेशेषु च उभयगतिः भवति। 'कर्मणि द्वितीया' इति कृत्रिमस्य ग्रहणम्। 'कर्तरि कर्मव्यतिहारे' इत्यत्र अकृत्रिमस्य - इति।

एतेन इदं सूचितम् - लोके शास्त्रे वा नानार्थकशब्दप्रयोगस्थले अर्थप्रकरणे एकतरनिश्चितार्थोपस्थापकप्रमाणे इति, यत्र अर्थप्रकरणे समुल्लङ्घ्य उभयार्थबोधने तात्पर्यग्राहकमस्ति तत्र नानार्थबोधो भवति इति च। अत्र भाष्योक्ते अर्थप्रकरणे अन्येषां संयोगादीनामप्युपलक्षणभूते। अयमेवांशः भर्तृहरिणा वाक्यपदीये द्वितीयकाण्डे -

> संसर्गो, विप्रयोगश्च[७], साहचर्यं विरोधिता।
> अर्थः, प्रकरणं, लिङ्गं, शब्दस्यान्यस्य सन्निधिः।। ३१७।।
> सामर्थ्यम् औचिती, देशः, कालो, व्यक्तिः, स्वरादयः।
> शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।। ३१८।।[८]

इति कारिकाभ्यां सोदाहरणं विवृतः।

२.४.कारिकयोरर्थः

संयोग-प्रकरणादयः, शब्दार्थस्य = नानार्थकशब्दबोध्यार्थस्य, अनवच्छेदे = अनिश्चये सन्देहे वा, विशेषस्मृतिहेतवः = वक्तृतात्पर्यविषयार्थविशेषनिर्णयजनकाः। (अत्र स्मृतिशब्दः निश्चयार्थकः।) इति एतत्कारिकार्थः। नानार्थकशब्दात् प्राथमिकोपस्थितावेव संयोगादीनामुपयोगः इति एतन्मतसारः।

एतत्कारिकाव्याख्यातारः केचित् वदन्ति - शब्दश्रवणानन्तरं तदीयनानार्थेषु गृहीतशक्तिकानां पुरुषाणां सर्वे अर्थाः उपस्थिता भवन्ति। ततः एतच्छब्दप्रयोक्तुः कस्मिन् अर्थे तात्पर्यम्? इति तात्पर्यसन्देहे जाते, भाष्योक्ताः अर्थप्रकरणादयः भर्तृहरिकारिकोक्ताः संयोगविप्रयोगादयश्च वक्तृ-

In Public domain. Digitization Muthulakshmi Research Academy

तात्पर्यविषयीभूतार्थनिर्णायकाः भवन्ति इति।

अन्ये वदन्ति - संसर्गादिषु सामर्थ्यमेवैकं शब्दार्थनिर्णयनिमित्तम्। योऽपि अर्थप्रकरणादिना तत्र अर्थभेदः प्रतीयते, सोऽपि सामर्थ्यसत्त्वे एव न तु तदभावे इति सामर्थ्यमेव तत्रापि अर्थभेदप्रत्यय-निमित्तम्, अर्थप्रकरणादिकं तु तत्र सन्निहितमपि अन्यथासिद्धमिति। सामर्थ्यमेव हि तत्र तत्र संसर्गादिभिर्व्यज्यते इति च।

२.५.इमे कारिके बहुभिरुदाहृते

अत्र काव्यप्रकाशकारादिभिः काव्यसाहित्यपरतया संयोगादीनाम् उदाहरणानि दत्तानि। वृत्तिवार्तिक-रसगङ्गाधर-काव्यदर्पणादिग्रन्थेषु अतिव्याप्त्यव्याप्त्यादिदोषनिराकरणपूर्वकं तेषां लक्षण-परिष्कारादिकं कृत्वा काव्यसाहित्यपरतयैव उदाहरणानि दत्तानि। अतः अत्र संयोगादयः केचित् (न सर्वे) पाणिनीयव्याकरणात् उदाहरणदानेन विव्रियन्ते। केषाञ्चित् उदारहणानि मृग्यानि।

२.६.व्याकरणे संयोगाद्युदाहरणेषु क्वचित् कश्चित् विशेषः

अत्रेदमवधेयम् - हर्यादिशब्दानां लोके शब्दस्वरूपात् भिन्नः कश्चन अर्थः प्रसिद्धः अस्ति। व्याकरणसूत्रोपात्तानां शब्दानां तु प्रायशः आनुपूर्वीरूपः शब्द एव वाच्यो भवति न तु लोकप्रसिद्धार्थः, 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रात्। अत एव 'भुजोऽनवने' (१.३.६६) इत्यादौ अवनार्थविप्र-योगात् धातुविशेषरूपशब्दविशेषनिर्णय एव। वस्तुतः स एव अत्र अर्थविशेषनिर्णयत्वेन ग्राह्यः इति।

२.६.१.व्याकरमशास्त्रे संसर्गात्/संयोगात् अर्थविशेषनिर्णयः यथा -

'अवाद् ग्रः' (१.३.५१) इति सूत्रे 'गॄधातोः' इत्यर्थकः 'ग्रः' इति शब्दः गॄ निगरणे (धा.पा. १४१०) गॄ शब्दे (धा.पा.१४९८) इति अनेकधातुबोधकस्सन् नानार्थकः भवति।

तत्र ग्रः इति नानार्थकशब्दस्य अर्थ(धातु)विशेषनिर्णयः संयोगात् भवति। तथाहि - अव इत्युपसर्गसम्बन्धः नियमेन गिरतेरेव उपपद्यते, न तु गृणातेः इति कृत्वा 'अवाद् ग्रः' (१.३.५१)[९] इत्यत्र अव शब्दसंयोगात् निगरणार्थको गिरतिरेव (गॄ निगरणे) 'ग्रः' शब्देन गृह्यते, न तु शब्दार्थकः गृणातिः (गॄ शब्दे इति)। अव इत्युपसर्गसम्बन्धः नियमेन गिरतेरेव उपपद्यते, न तु गृणातेः इत्यत्र ... 'न च अवपूर्वस्य गृणातेः प्रयोगोऽस्ति इति' 'अवाद् ग्रः' इति सूत्रभाष्यस्थं लक्ष्यैकचक्षुष्कस्य भाष्यकारस्य वचनमेव प्रमाणम्।

२.६.२.विप्रयोगात् अर्थविशेषनिर्णयः यथा -

'भुजोऽनवने' (१.३.६६) इत्यत्र भुज इति शब्दः नानार्थकः। तत्र अर्थविशेषनिर्णयः विप्र-

In Public domain. Digitization Muthulakshmi Research Academy

योगात् भवति। तथा हि - 'भुजोऽनवने'[१०] इत्यत्र अनवने इत्यनेन भुजधातोः अवनार्थविप्रयोगबोधनात् अवनार्थबोधनयोग्यस्य अनवनार्थस्यैव भुजेः अर्थात् पालनार्थकस्यैव भुजेः ग्रहणं विज्ञायते, न तु कौटिल्यार्थस्य। तेन 'निर्भुजति पाणिम्' इत्यत्र नात्मनेपदम्।

२.६.३.शास्त्रे साहचर्यात् अर्थविशेषनिर्णयो यथा -

'विपराभ्यां जेः' (१.३.१९)[११] इत्यत्र पराशब्दः, जिधातुसमभिव्याहारे अदृष्टव्यभिचारेण विशब्देन उपसर्गेन साहचर्यात् उपसर्ग एव गृह्यते। परा जयति सेना इत्यत्र आत्मनेपदं न भवति। अत्र पराशब्दः नानार्थकः । (एका सूचना - २.६.४. विरोधिता, २.६.५. अर्थः, २.६.६. प्रकरणम् इत्येतानि परित्यक्तानि। विरोधितायाः उदाहरणं मृग्यम्। अर्थप्रकरणयोस्तु उदाहरणं सुखेन ऊहितुं शक्यते।)

२.६.७. लिङ्गम् = ज्ञापकम्। लिङ्गाच्च वाक्यान्तरे दृष्टात् वाक्यान्तरे अर्थविशेषः निर्णीयते। यथा- अक्ताः शर्करा उपदधाति[१२] इत्यत्र अनेकस्य दृततैलवसादिरूपस्य अञ्जनसाधनद्रव्यस्य सम्भवे 'तेजो वै घृतम्' इति घृतस्य स्तुतिरूपात् लिङ्गात् घृतसाधनकत्वमेव शर्कराकर्मिकाया अञ्जनक्रियायाः निर्धार्यते, तथा व्याकरणशास्त्रेऽपि यानि यानि ज्ञापकानि तानि सर्वाण्यपि लिङ्गान्येवेति कृत्वा तेभ्यः अर्थविशेषनिर्णयः क्रियते। यथा - हृदयस्य हृल्लेखयदण्लासेषु[१३] इति सूत्रे अणः पृथक् लेखग्रहण-सामर्थ्यरूपात् लिङ्गात् लेख इति घञन्तं लेखशब्दं बोधयति न तु अणन्तम् इति निर्णयः। तेन घञन्ते लेखशब्दे परे हृदादेशो न, हृदयलेखः इत्येव। अत्र लेखशब्दः घञन्त-अणन्तलेखशब्दबोधनसामर्थ्ययुक्त इति हेतोः नानार्थकः।

केचित्तु - शब्दस्य अर्थप्रकाशनसामर्थ्यं लिङ्गमिति वृद्धिपदस्य आदैक्षु शक्तिः इत्येतदर्थग्राहक-संज्ञासूत्रबलात् वृद्धिपदस्य आदैजर्थप्रकाशनसामर्थ्यरूपं लिङ्गं 'मृजेर्वृद्धिः' इत्यादौ अस्तीति वृद्ध्यादि संज्ञापदानि लिङ्गस्य उदाहरणम् इति वदन्ति। संयोगादिषु यत् सामर्थ्यं परिगणितम् तत्तु अनुपपत्ति-रूपत्वात् अर्थापत्तिरूपमिति च वदन्ति।

२.६.८. शब्दान्तरसन्निधानात् अपि अर्थविशेषनिर्णयः भवति। यथा - 'रामो जामदग्न्यः' इत्यत्र जामदग्न्यपदसन्निधानात् रामः परशुरामः इति, 'अर्जुनः कार्तवीर्यः' इत्यत्र कार्तवीर्यपदसन्निधानात् अर्जुनः कृतवीर्यापत्यं सहस्रबाहुः इति च यथा गृह्यते तथैव, 'णेरणौ' सूत्रे हेतुमण्णेरेव बोधकस्य णेरिति पदस्य[१४] सन्निधानात्, अणौ, णौ चेत् इत्यत्र णिपदेनापि हेतुमण्णेरेव ग्रहणमिति निश्चीयते। तथा च हेतुमण्णेरभावे कर्म हेतुमण्णौ कर्ता भवति चेत् हेतुमण्ण्यन्तात् आत्मनेपदं भवति इति सूत्र-वाक्यार्थः निश्चितो भवति। तेन 'गणयति गणं गोपालकः - गणयति गणः' इत्यत्र इदं सूत्रं न प्रवर्तते।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र णेरितिशब्दः चुरादिण्यन्तहेतुमण्ण्यन्तयोः वाचकत्वात् नानार्थकः।

२.६.९. सामर्थ्यात् विशेषप्रतिपत्तिः यथा - 'अनुदरा कन्या' इत्यत्र कन्यायाः उदराभावानुपपत्तिरूपात् सामर्थ्यात् उदरविशेषस्य (स्थूलोदरस्य) प्रतिषेधः इति निश्चीयते, यथा वा, 'अभिरूपाय कन्या देया' इत्यत्र अभिरूपेषु पश्वादिषु कन्यासम्प्रदानत्वानुपत्तिरूपात् सामर्थ्यात् अभिरूपवराय इत्यर्थः निश्चीयते, तथा शास्त्रेऽपि 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (१.२.४३)[१५] इत्यत्र समासशब्दस्य समासार्थं 'सुप् प्रतिना मात्रार्थे' इत्यादिशास्त्रमेव अर्थः इति निश्चीयते, शाकप्रति इत्यादिसमासे प्रथमानिर्दिष्टपदस्य ग्रहणानुपपत्तिरूपात् सामर्थ्यात्।

'एकविभक्ति चापूर्वनिपाते' (१.२.४४)[१६] इत्यत्र प्रसज्यमानपूर्वनिपातप्रतिषेधबोधकेन अपूर्वनिपातपदेन यः समासशब्दः अनुमीयते तस्य लक्षणया समासार्थालौकिकविग्रहवाक्यम् इत्यर्थः निश्चीयते। अत्र समासशब्दः समस्तपदम्, समासविधायकशास्त्रम्, समासार्थालौकिकविग्रहवाक्यम् इत्येवं नानार्थान् बोधयतीति कृत्वा नानार्थकः।

२.६.१०. औचित्यात् = स्वस्वक्रियौचित्यात्, शब्दार्थनिर्णयः एवमूह्यते। प्रष्ठशब्दः अग्रगामित्वनिमित्तसमाश्रयणेन प्रवर्तते, 'प्रष्ठोऽग्रगामिनि' इति पाणिनिसूत्रात्। अनेनैव निमित्तेन अयं शब्दः स्त्रियामपि प्रवर्तितुमर्हति। तथा च प्रष्ठ इति निपातितस्य शब्दस्य अग्रगामी पुमान्, अग्रगामिनी स्त्री इति अर्थद्वयबोधकत्वं प्राप्नोति, तथापि तस्य निमित्तस्य पुंस्येव औचित्यसम्भवात् पुंवाचक एव स शब्दः इति स्वीक्रियते। पुंयोगाच्च दाम्पत्यादिरूपात् स शब्दः स्त्रियां वर्तते, न साक्षादिति प्रष्ठा इति न भवति। पुंयोगेन निमित्तेन स्त्रियां प्रवृत्तौ तु 'पुंयोगादाख्यायाम्'(४.१.४८) इत्यनेन ङीषि प्रष्ठी इति तु भवत्येव। एतादृशस्थले औचित्यात् निर्णयः भवेत् इत्याभाति। (अत्र काचित् सूचना - अत्र ११. देशः, १२. कालः इत्येतयोः उदाहरणे मृग्ये।)

२.६.१३. व्यक्तिः लिङ्गम्, व्यज्यते द्रव्यं यया इति व्युत्पत्तेः। लोके लिङ्गान्निर्णयो यथा - 'तत् ग्रामस्यार्धं लभेत' इत्यत्र नपुंसकेन तत्पदेन परामर्शात् अर्धशब्दः समप्रविभागरूपार्थः इति निश्चीयते, 'तं ग्रामस्यार्धं लभेत' इत्यत्र तु तमिति पुंलिङ्गेन परामर्शात् ग्रामैकदेशमात्ररूपार्थः निश्चीयते, तथा शास्त्रेऽपि 'अर्धं नपुंसकम्'[१७](२.२.२७३) नपुंसकलिङ्गेन निर्देशात् समप्रविभागवाची एव अर्धशब्दः इति निश्चीयते। अत्र अर्धशब्दः नानार्थकः।

२.६.१४. स्वरात् यथा - यथा वैपाशः कूपः। 'उदक्च विपाशः' (४.२.७४)[१८] इति सूत्रेण कूपेऽर्थे अत्र

In Public domain. Digitization Muthulakshmi Research Academy

अञ्प्रत्ययः। 'ञ्नित्यादिर्नित्यम्' इति अञन्तस्य आद्युदात्तत्वम्। अत्र आद्युदात्तस्य श्रवणात् विपाशा-नद्याः उत्तरकूलवर्ती कूपविशेषः वैपाशशब्दार्थः इति निश्चीयते। अन्तोदात्तस्वरश्रवणे तु तद्विपरीतस्य विगतपाशपुरुषसम्बन्धिनः कूपस्य प्रतीतिः। अत्र हि 'तस्येदम्' इति अण् प्रत्ययः। प्रत्ययाद्युदात्तत्वात् अण् प्रत्ययान्तस्य अन्तोदात्तत्वम्। अत्र पूर्वोक्तरीत्या वैपाशशब्दः नानार्थकः।

२.६.१५. हरिकारिकायां ...स्वरादयः, इत्यत्र आदिपदेन सत्व-षत्वयोः णत्व-नत्वयोश्च ग्रहणम्।

२.६.१६. सत्व-षत्वाभ्याम् अर्थविशेषनिर्णयः यथा - 'सुसिक्तम् इत्यत्र सुः पूजायाम्' (१.४.९४)[१९] इति सूत्रेण कर्मप्रवचनीयसंज्ञायाम् उपसर्गत्वाभावात् षत्वाभावः। वृक्षादिकं सम्यक् सिक्तं तेन इति सेचनकर्त्तुः पूजा प्रतीयते। सुषिक्तं किं तवात्र? इत्यादौ कर्मप्रवचनीयत्वाभावात् उपसर्गसंज्ञायां सत्यां, षत्वप्रवृत्तौ क्षेपरूपस्य अर्थान्तरस्य प्रतीतिः, अर्थात्, वृक्षादिकं तेन तथा अतिशयेन सिक्तम्, यथा वृक्षादेः नाशो जातः इति।

२.६.१७. णत्व-नत्वाभ्यां यथा - प्रणायक इत्यत्र 'उपसर्गादसमासेऽपि णोपदेशस्य' (७.४.१४)[२०] इति उपसर्गाश्रयणत्वसद्भावे प्रणयनक्रियाकर्तुः प्रतिपत्तिः, णत्वाभावे तु प्रगता नायकाः अस्माद् देशात् असौ प्रनायको देशः इति अन्यपदार्थस्य प्रतीतिरिति।

अत्र काचित् शङ्का जायते - व्यक्ति-स्वर-सत्व-षत्व-णत्व-नत्वादिभिः शब्दभेद एव प्रतीयते (अर्धम् अर्धः, सुसिक्तम् सुषिक्तम्, प्रणायकः प्रनायकः इत्यादिरूपेण।), न तु एकशब्दत्वम्। तत् कथमत्र नानार्थकशब्दत्वव्यवहारः ? इति। अत्र समाधानमेवमूह्यते - लिङ्ग-षत्व-णत्वादिभिः शब्दयो-र्भेदेऽपि तमविवक्षित्वा एकशब्दत्वं नानार्थत्वं च स्वीकृत्य लिङ्ग-षत्व-णत्वादिभिः अर्थविशेषनिर्णयः कृत इति। एवमेव लघुमञ्जूषादौ एतत्कारिकास्थस्य आदिपदस्य व्याख्या कृता।

तदेवं नानार्थकशब्दात् अनेकार्थोपस्थितावपि, एते संसर्गादयः शब्दार्थविषयकसन्देह-निराकरणद्वारा नियतार्थनिर्णयहेतुत्वात् विशेषस्मृतिहेतवः = वक्तृतात्पर्यविषयीभूतार्थनिर्णयहेतवः इति, अत एव नानार्थकशब्दप्रयोगस्थले तात्पर्यनिर्णयोपायाः (= तात्पर्यनिर्णायकप्रमाणानि) इति च व्याकरणशास्त्रसिद्धान्तकृतां भाष्यकार-भर्तृहरिप्रभृतीनामाशय इति बोद्धव्यम् इति शम्।

निबन्धान्तटिप्पण्यः

(अत्र निबन्धान्तटिप्पणीषु आकरनिर्देशः, उद्धृतसूत्रकारिकाणां काशिकावृत्ति-वाक्यपदीयादि ग्रन्थेभ्यः प्रकृतविषयोपयोगितया सूत्रार्थ - उदाहरण - प्रत्युदाहरण-कारिकाभावादिकं दत्तमिति बोध्यम्।)

१. अयमंशः -

नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयम्।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान् बुधान्।।

इति शब्दकौस्तुभप्रारम्भपद्यात् स्फुटं ज्ञायते।

२. द्र.काशिकादौ 'णेरणौ' (१.३.६७) सूत्रव्याख्या।

३. अत्र 'संख्याया अतिशदन्तायाः कन्' इति कन् विधायकसूत्रे संख्याशब्दः नानार्थकः। यद्यपि कृत्रिमसंख्यावाचकत्वमेव प्राप्तम्, तथाऽपि अत्र सूत्रे लौकिकसंख्यावाचक विंशत्यादि 'ति' शब्दान्तपर्युदासः लौकिकसंख्यायामपि वक्तुः तात्पर्यमस्तीति बोधयति।

४. अर्थः = सामर्थ्यम्, गोपालकमानय, तं गुरुरध्यापयिष्यति इति प्रयुक्ते - यः गाः पालयति तस्य यष्टिहस्तस्य अध्यापनासम्भवात् गोपालकनामकमाणवकस्य बोधो भवति श्रोतुः। प्रकरणम् = प्रस्तावः। यथा भोजनप्रकरणे सैन्धवमानय इति प्रयुक्ते लवणस्य बोधो भवति। गमनप्रकरणे तु अश्वस्य।

५. अत्र गोपालकशब्दः नानार्थकः। यः यष्टिहस्तस्सन् गाः पालयति विद्यागन्धशून्यः तं बोधयति, यः गाः न पालयति विद्याशीलश्च माणवकः तमपि बोधयति। अतः नानार्थकः गोपालकशब्दः।

६. अप्रकरणज्ञस्य तस्य श्रोतुः यष्टिहस्तविषयकोपस्थितिमेव सम्यक् प्राधान्येन जनयति वक्त्रा उच्चरितः स शब्दः।

७. इमे कारिके 'संयोगो, विप्रयोगश्च...' इत्येवं रूपेण काव्यप्रकाश-तद्व्याख्यान-रसगङ्गाधरादिषु बहुषु ग्रन्थेषु उद्धृते।

८. इह केचित् अर्थभेदात् शब्दभेद इत्यभ्युपगच्छन्ति। अपरे तु नार्थभेदाच्छब्दभेदः, किन्तु शब्दैक्येऽपि शक्तिभेद इति अभ्युपगच्छन्ति, एवम् द्वौ पक्षौ। तत्र शब्दनानात्वपक्षे स्वभावतो भिन्नेषु समानानुपूर्वीकेषु शब्देषु स्वरूपाभेदाद् अव्यावत्तार्थकेषु रूपसाम्येऽपि संसर्गादिभिर्निमित्तान्तरैः, अर्थावच्छेदः = अर्थविशेषनिर्णयः क्रियते। शब्दैकत्वपक्षे तु तत्तदर्थाभिधाने भिन्नासु शक्तिषु श्रुतिसारूप्यमात्रात्, आनुपूर्वीसाम्यात्, अलब्धविभागासु (अज्ञातरूपभेदासु) तथैव = पूर्वकल्प इव) शब्दनानात्वपक्षे इव) संसर्गादिभिः निमित्तैः अर्थविशेषनिर्णयः क्रियते इति रीत्या पक्षद्वयेऽपि संसर्गप्रकरणादयः शब्दार्थनिर्णायकाः इति संसर्गादीनामुपन्यासः प्रकृतकारिकाभ्यां क्रियते।

९. अव इत्युपसर्गात् परस्य गॄ धातोः आत्मनेपदं भवति इति 'अवाद् ग्रः'(१.३.५१)इति सूत्रस्य अर्थः। अत्र 'ग्रः' इति गॄ निगरणे (धा.पा.१४१०) गॄ शब्दे (धा.पा.१४९८) इति धातुद्वयबोधकत्वात् नानार्थकः।

१०. 'भुजोऽनवने' (१.३.६६) - भुज पालनाभ्यवहारयोः (धा.पा.१४५५) इति रुधादौ पठ्यते। तस्मात्, अनवने = पालनभिन्ने अर्थे, वर्तमानात् आत्मनेपदं भवति। भुङ्क्ते, भुञ्जाते। अनवन इति किम्? भुनक्ति एनमग्निः आहितः। अनवनप्रतिषेधेन रौधादिकस्यैव ग्रहणं विज्ञायते, न तौदादिकस्य भुजो कौटिल्ये (धा.पा.१४१८) इत्यस्य। तेनेह न भवति - विभुजति (= कुटिलीकरोति) पाणिम्।

११. 'विपराभ्यां जेः' (१.३.१९) - शेषात्कर्तरि परस्मैपदम् (१.३.७८) इत्यस्यापवादः। वि-परापूर्वात् जयतेर्धातोः आत्मनेपदं भवति। विजयते, पराजयते। वि-पराशब्दौ उपसर्गौ गृह्येते, साहचर्यात्। तेनेह न भवति - बहुवि जयति वनम्। परा जयति सेना इति।

In Public domain. Digitization Muthulakshmi Research Academy

१२. अक्तशब्दः दूततैलाक्तं घृताक्तम् इत्याद्यनेकार्थान् बोधयतीति नानार्थकः। एवं लेखशब्दोऽपि घञन्तलेख-शब्दम् अणन्तलेखशब्दं च बोधयतीति नानार्थकः।

१३. 'हृदयस्य हृल्लेखयदण्लासेषु' (६.३.५०) - हृदयस्य हृद् इत्ययम् आदेशः भवति लेख यत् अण् लास इत्येतेषु परतः। लेख - हृदयं लिखतीति हृल्लेखः। यत् - हृदयस्य प्रियं हृद्यम्। अण् - हृदयस्येदं हार्दम्। लास-हृदयस्य लासो हृल्लासः। लेख इत्यणन्तस्य ग्रहणमिष्यते। घञि तु हृदयस्य लेखो हृदयलेखः।

१४. णेरिति पदं हेतुमण्णेरेव बोधकम्, 'भीस्म्योर्हेतुभये' इति उत्तरसूत्रे अनुवृत्तौ हेतुमण्णेरेव सम्भवात् अर्थाधिकारानुरोधेन अत्रापि तद्बोधनस्यैव उचितत्वात्।

१५. 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (१.२.४३) - प्रथमया विभक्त्या यन्निर्दिश्यते समासशास्त्रे तत् उपसर्जनसंज्ञं भवति। समासे इति समासविधायि शास्त्रं गृह्यते। वक्ष्यति - 'द्वितीया श्रितातीतपतितगता-त्यस्तप्राप्तापन्नैः' (२.१.२४) इति। द्वितीयासमासे द्वितीयेत्येतत् प्रथमानिर्दिष्टम्। तृतीयासमासे तृतीयेति, चतुर्थीसमासे चतुर्थीति, ...।

१६. 'एकविभक्ति चापूर्वनिपाते' (१.२.४४) - एका विभक्तिर्यस्य तदिदम् एकविभक्ति, समासे विधीयमाने यन्नियतविभक्तिकम् = द्वितीये सम्बन्धिनि बहुभिर्विभक्तिभिः युज्यमानेऽपि एकयैव विभक्त्या यत् युज्यते, तदुपसर्जनसंज्ञं भवति, अपूर्वनिपाते, पूर्वनिपातं = पूर्वनिपाताख्यम् उपसर्जनकार्यं वर्जयित्वा।

१७. 'अर्धं नपुंसकम्' (२.२.२) - समप्रविभागे अर्धशब्दः नपुंसकलिङ्गः, तस्येदं ग्रहणम्। अर्धम् इत्येतत् नपुंसकम् एकदेशिना एकाधिकरणेन समस्यते, तत्पुरुषश्च समासः भवति। षष्ठीसमासापवादः अयं योगः। अर्धं पिप्पल्या अर्द्धपिप्पली। अर्द्धकोशातकी। नपुंसकमिति किं? ग्रामार्द्धः। नगरार्द्धः। एकदेशिनेत्येव, अर्द्धं पशोः देवदत्तस्य। देवदत्तेन सह समासो न भवति। एकाधिकरण इत्येव, अर्धं पिप्पलीनाम्।

१८. 'उदक्च विपाशः' (४.२.७४) - विपाशः = विपाश् नामकनद्याः, उत्तरे कूले ये कूपाः तेषु अभिधेयेषु अञ्प्रत्ययः भवति चातुरर्थिकः। अणोऽपवादः। अबह्वजर्थ आरम्भः। दत्तेन निवृत्तः कूपः = दात्तः। गौप्तः। उदगिति किम्। दक्षिणतः विपाशः।

१९. 'सुः पूजायाम्' (१.४.९४) - सुशब्दः पूजायाम् अर्थे कर्मप्रवचनीयसंज्ञः भवति। सुसिक्तं भवता। सुस्तुतं भवता। धात्वर्थः स्तूयते। उपसर्गसंज्ञाश्रयं षत्वं न भवति। पूजायामिति किं? सुषिक्तं किं तवात्र।

२०. 'उपसर्गादसमासेऽपि णोपदेशस्य' (७.४.१४) - ण उपदेशे यस्य असौ णोपदेशः। णोपदेशस्य धातोः यः नकारः तस्य उपसर्गस्थात् रेफ-षकाररूपात् निमित्तात् उत्तरस्य णकारादेशः भवति असमासेऽपि समासेऽपि। प्रणमाति परिणमाति। प्रणायकः परिणायकः। उपसर्गादिति किम्। पूर्वपदाधिकारात् समास एव स्यात् इति तदधिकारनिवृत्तिद्योतनार्थम्। णोपदेशस्येति किम्? प्रनर्दति।

In Public domain. Digitization Muthulakshmi Research Academy

उपमाननिरूपणम्

आचार्यः का.ई.मधुसूदनन्

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ति सूत्रयतो महर्षेः गौतमस्य उपमानस्य क्लृप्तप्रमाणातिरिक्तत्वं विलक्षणप्रमितिजनकत्वादिष्टमिति तावत् स्पष्टं प्रतीयते। वैशेषिकास्तु गवयादिपदवाच्यत्वानुभवं वाक्यादनुमानाद्वा इच्छन्तः उपमानं नातिरिक्तं मन्वते। प्राभाकराः मीमांसकाः सादृश्यस्य उपमानप्रमाणविषयस्य क्लृप्तप्रमेयविलक्षणत्वात् उपमानस्य प्रमाणान्तरत्वं ब्रुवते। भाट्टाः मीमांसकास्तु सादृश्यस्य सिद्धपदार्थान्तर्भावेऽपि प्रमाणान्तरनिरपेक्षं परिच्छेद्यत्वात् उपमानस्य प्रमाणान्तरतामातिष्ठन्ते इति स्थितिः। तदिह निबन्धे उपमानविषये तत्तन्मतं पूर्वग्रन्थानुसारेण सयुक्तिकं यथावदुपपाद्य परिशील्यते स्वमतिविशुद्धये।

प्राभाकरमतम्

सादृश्यप्रमाकरणमुपमानम्। सादृश्यप्रमा च गोसदृशो गवयपदवाच्यः इत्याद्याकारिका सादृश्यं च अतिरिक्तपदार्थः। तच्च प्रत्याश्रयं भिन्नम्, एकत्वे सर्वस्य सर्वसादृश्यापत्तेः सुसादृश्यमन्दसादृश्यव्यवहारानुपपत्तेश्च। नास्य द्रव्ये गुणे कर्मणि वा अन्तर्भावः, गुणकर्मवृत्तित्वात्। नापि सामान्ये, प्रतिपदार्थं भिन्नत्वात्। न विशेषे प्रत्यक्षत्वात्। नापि समवायाभावयोः समवेतत्वात्। तस्मात् सादृश्यं पदार्थान्तरम्। न च धर्म्यन्तरे धर्म्यन्तरवृत्तिधर्मबाहुल्यम्, असाधारणधर्मशून्यत्वे सति तद्गतभूयोधर्मवत्वम्, स्वनिष्ठात्यन्ताभावप्रतियोगिधर्मसमानाधिकरणभूयोधर्मवत्वं वा सादृश्यम्। भूयस्त्वस्याननुगतत्वात्। त्रित्वरूपत्वे हस्तिमशक्योरपि सादृश्यापत्तेः। तस्मात् सादृश्यात्मकविलक्षणप्रमेयावबोधित्वात् उपमानं प्रमाणान्तरम्।

अत्र उदयनाचार्याणां प्रत्यवस्थानम्

सादृश्यं किं भावः अभावो वा। भावत्वेऽपि सगुणं निर्गुणं वा। निर्गुणत्वेऽपि आश्रितमनाश्रितं वा। आश्रितत्वे सामान्यवत् निस्सामान्यं वा। सामान्यवत्त्वे स्पन्दोऽस्पन्दो वा। निर्गुणं निस्सामान्यमाश्रितमेकाश्रितमनेकाश्रितं वा इति यथायथं सप्तपदार्थान्तर्गतमेव। अतः नोपमानविषयः अर्थान्तरमिति उदनाचार्यः प्राभाकरपक्षं दूषयाम्बभूवुः।

प्राभाकरसमाधानम्

तेन तस्य वा सदृशः इति व्यवहारानुपपत्या तस्मात् सदृशः इति व्यवहारापत्त्या च सादृश्यमतिरिक्तं

आचार्यः, न्यायविभागः, राजीवगान्धीपरिसरः, राष्ट्रियसंस्कृतसंस्थानम्, शृङ्गेरी.

In Public domain. Digitization Muthulakshmi Research Academy

सिद्ध्यति। प्रामाणिकव्यवहारमनादृत्य विकल्पभयमात्रेण सप्तपदार्थान्तर्गततत्वस्वीकारे सामान्यादिकं भावोऽभावो वा इत्यादि विकल्पेन सामान्यविशेषसमवायानामपि समवेतत्वादिरूपद्रव्यादित्रय-साधर्म्यात् द्रव्यगुमकर्मान्तर्भावः स्यादिति प्राभाकराः समादधुः।

सादृश्यस्यानतिरिक्तत्वकथनेन तन्मतदूषणम्

सादृश्यं सामान्यमेव। तच्च समानयोर्भावः, न तु जातिः। एकसम्बन्धिधर्मवत्त्वमिति यावत्। स च धर्मो द्रव्यं गुणः अन्यद्वा यथायथं भवितुमर्हति। असाधारणान्यतद्गतभूयो धर्मवत्त्वं तत्सादृश्यम्। स्वस्मिन् स्वसादृश्यवारणाय तद्वत्यसाधारणधर्माभाववत्त्वे सति इति वक्तव्यम्। भूयोधर्मेषु असाधारण-धर्मस्यापि अन्तर्गतत्वादसम्भवः इति धर्मे असाधारणान्यत्वनिवेशः। अथवा तद्गतभूयोधर्मवत्त्वरूपं सादृश्यं तद्गतयादृशधर्मवत्त्वज्ञानोत्तरमेव गृह्यते तदेव सदृशव्यवहारनिमित्तं सादृश्यमस्तु। तादृशधर्माति-रिक्तधर्माणां सादृश्ये घटनमनावश्यकम्। तद्गतधर्मवत्त्वमेव वा सादृश्यम्। सर्वथा न पदार्थान्तरमिति प्राभाकरपक्षः न युज्यते इति नैयायिकाशयः।

भाट्टाभिप्रायः

भाट्टास्तु मानान्तरनिरपेक्षं प्रमेयस्य परिच्छेद्यत्वात् उपमानातिरिक्तं प्रमाणं मन्यन्ते। तथाहि सादृश्यज्ञानं द्विविधम्। इन्द्रियसन्निकृष्टविशेष्यकं तदसन्निकृष्टविशेष्यकं चेति। आद्यं गोसदृशोऽयं गवयः इति ज्ञानम्। द्वितीयं एतत्सदृशी सा गौरिति ज्ञानम्। तत्र द्वितीयं ज्ञानमेव उपमितिः। सा च गोसदृशोऽयमिति गवयगतसादृश्यप्रत्यक्षात् गोपिण्डस्मरणसहकृतात् जायते इति गोसदृशोऽयमिति ज्ञानमुपमानमतिरिक्तं प्रमाणम्। गोसदृशोऽयं गवयः इति ज्ञानस्य न विलक्षणप्रमितित्वं सम्भवति इति तस्य नोपमितित्वम्। तस्य हि प्रत्यक्षत्वं सम्भवति। न च तर्हि नयनरश्मिनिपातमात्रेण तदु-त्पादापत्तिरिति शङ्क्यम्। गोपिण्डरूपपूर्वगृहीतांशस्मरणरूपसहकारिविरहादेव तदनुत्पादोपपत्तेः। अत एव सन्निकर्षमात्रेण सोऽयं देवदत्तः इति प्रत्यभिज्ञायाः अनुत्पत्तिः घटते। तस्मात् ग्रामीणस्य गवयं पश्यतः गोसदृशोऽयमिति यत् ज्ञानं जायते तत् उपमितिकरणम्। तस्मात् जायमानम् एतत्सदृशो गौरिति ज्ञानमुपमितिरिति न चास्य प्रत्यक्षत्वं सम्भवति, इन्द्रियासन्निकृष्टत्वात् गोः। नाप्यस्य पूर्वानुभूतस्मृतित्वम्, गोपिण्डमात्रस्य पूर्वमनुभूतत्वेऽपि गवयसादृश्यविशिष्टस्याननुभूतत्वात्। न च अयं स इति विपरीतप्रत्यभिज्ञावत् एतत्सदृशः स इति ज्ञानस्य प्रत्यक्षत्वमुपपादयितुं शक्यम्। यतः अस्ति वैषम्यमुभयोः। तत्तदन्तयोः एकार्थनिष्ठत्वात् इदमर्थतदर्थयोरभेदात् सन्निकृष्टविशेष्यकत्व-नियमभङ्गाभावेन प्रत्यभिज्ञायाः प्रत्यक्षत्वं सम्भवति। प्रकृते च गोरसन्नकृष्टत्वात् वर्तमानत्वस्य सन्दिग्धत्वात् प्रत्यक्षत्वमसम्भवत्स्वीकारम्, प्रत्यक्षस्य वर्तमानविशेष्यकत्वनियमात्। तस्मात्

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षाद्यनात्मकमेतादृशः सः इति विलक्षणप्रमितिजनकं गोसदृशोऽयमिति ज्ञानमुपमानाख्यमतिरिक्तं प्रमाणमेवेति। सादृश्यं च अर्थान्तरयोगिभिः सम्बन्धिसामान्यैरर्थान्तरस्य तादृशयोग एव। अत एव सामान्यभूयस्त्वलवत्त्ववशेन सादृश्यप्रकर्षाप्रकर्षे सुसदृशमीषत्सदृशमितिप्रतीतिविषयौ उपपद्येते। सादृश्यस्यातिरिक्तत्वे तदनुपपत्तेः। उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति, यथा गवयदर्शनं गोस्मरणस्य इति शाबरभाष्यम्मतम्।

भाट्टमतदूषणम्

सादृश्यं यदि प्रमाणान्तरम्, तर्हि तुल्यन्यायेन वै सादृश्यमपि प्रमाणान्तरमिति सप्तमप्रमाणापत्तिः। तद्विसदृशोऽयमिति ज्ञानात् जायमानस्य तद्विसदृशः सः इति ज्ञानस्य पूर्वोक्तरीत्या प्रत्यक्षत्वस्मरणत्वासम्भवात्। न च तस्य प्रकृतोपमानान्तर्भावः। तस्य सादृश्यग्राहित्वेन वैधर्म्याग्राहकत्वेन तदन्तर्भावासम्भवात्। न च तद्वैधर्म्यस्य तद्वृत्तिधर्माभावरूपस्यानुपलब्धिप्रमाणगम्यत्वात् नातिरिक्तत्वं शक्यशङ्कमिति वाच्यम्। एतद्वैधर्म्यस्य एतदवृत्तिधर्मत्वरूपतायाः सम्भवेन तस्य भावरूपस्य अनुपलब्ध्यविषयत्वात्। न च एतद्विधर्मा स इति प्रमितिरर्थापत्तिरेव, तद्विधर्मोऽयमिति प्रत्यक्षे जाते तत्र एतद्वैधर्म्यं विना तद्वैधर्म्यस्य अत्र अनुपपद्यमानत्वादिति वाच्यम्। तर्हि एतत्सदृशः सः इति ज्ञानस्यापि अर्थापत्तित्वापत्तेर्दुर्वारत्वात्। तस्मात् सादृश्यं न प्रमाणान्तरम्।

नैयायिकमतम्

नैयायिकास्तावत् एवमभिप्रयन्ति संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तस्य मानान्तरजन्यत्वात् उपमानरूपातिरिक्तप्रमाणफलत्वम्। गोसदृशो गवय इत्यतिदेशवाक्यं श्रुतवतः तादृशं तमरण्ये पश्यतः पूर्वानुभूतमतिदेशवाक्यार्थं स्मरतः पुंसः अयमसौ गवयपदवाच्यः इति प्रतीतिः जायते। अयमिति सन्निकृष्टव्यक्तिः भासते। असौ इति गवयत्वाक्रान्तसर्वभानम्। तत्र वाच्यवाचकभावज्ञानरूपोपमितिकरणस्य सादृश्यज्ञानरूपत्वात् उपमानत्वम्। तज्जन्यस्य शक्तिज्ञानस्य उपमितिरिति व्यवहारः।

इयं च प्रमितिः गवयप्रत्यक्षविरहिणो नोत्पद्यते इति न वाक्यमात्रजन्या (शाब्दबोधरूपा) पूर्वोत्पन्नविनष्टत्वात् वाक्यस्य पश्चाद्भाविसन्निकर्षेण मेलनं न सम्भवतीति नेयं वाक्येन्द्रियसन्निकर्षसमुच्चयजन्या। वाक्यस्मृतेः वाक्यार्थस्मृतेश्च सन्निकर्षेण सह मेलनसम्भवेऽपि न तावन्मात्रेण शक्तिप्रमितिः उत्पत्तुमर्हति। गवयदर्शनेऽपि तद्गतगोसादृश्यस्यानुपलम्भे अनुत्पादात्। वाक्यसन्निकर्षफलयोः वाक्यार्थस्मृतिसादृश्योपलम्भयोः समाहारजन्यत्वेऽपि शक्तिप्रमितेः न शाब्दबोधे प्रत्यक्षे वा अन्तर्भावः शक्यः प्रत्यक्षज्ञानजन्यस्यापि प्रत्यक्षे अन्तर्भावेन हेतुप्रत्यक्षशब्दप्रत्यक्षाधीनत्वात् अनुमानादेरपि प्रत्यक्षत्वप्रसङ्गः। तस्मात् इन्द्रियसन्निकर्षादि तत्तत्प्रमित्यसाधारणकारणसाहित्यस्यैव

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षत्वादिप्रयोजकत्वस्य वाच्यतया अयं गवयपदवाच्यः पश्चादुत्पन्नातिदेशवाक्यार्थस्मृतिसहकारेण असौ वाक्यपदवाच्यः इत्यपि शक्तिप्रमितेः सम्भवात् न तस्याः सन्निकर्षव्याप्यप्रत्यक्षरूपत्वम्। अपि तु उपमितिरूपत्वमेवेति।

अतिदेशवाक्यार्थविषयकशाब्दबोधः करणम्, अतिदेशवाक्यार्थस्मरणं व्यापारः, सादृश्यविशिष्टपिण्डदर्शनं सहकारीति साम्प्रदायिकाः वदन्ति। नवीनास्तु सहकारितया आवश्यकस्य सादृश्यविशिष्टपिण्डदर्शनस्यैव करणत्वं युक्तम्, तदतिरिक्तस्य कारणान्तरस्य कल्पने गौरवात् इति प्राहुः। अतिदेशवाक्यार्थस्मरणे सादृश्यविशिष्टपिण्डदर्शनव्यापारत्वस्य तज्जन्यत्वविरहादनुपपत्तिस्तु अतिदेशवाक्यार्थस्मरणस्य पूर्वतनशाब्दबोधजन्यत्वेऽपि तत्रोद्बोधकविधया सदृशपिण्डदर्शनस्यापि कारणत्वात् परिहर्तव्या। केचित्तु सादृश्यज्ञानमात्रं करणं, विशेषणज्ञानविधया तज्जन्यमतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्टपिण्डदर्शनं च द्वयमपि व्यापारः। अतिदेशवाक्यार्थस्मरणव्यापारकं सादृश्यविशिष्टपिण्डदर्शनं तु न करणम्, यत्र सादृश्यविशिष्टपिण्डदर्शनोत्तरमतिदेशवाक्यार्थशाब्दबोधः तत्र अतिदेशवाक्यार्थस्मरणापेक्षाविरहात् इत्याहुः।

तन्न सम्यक्। यत्र सादृश्यविशिष्टपिण्डदर्शनोत्तरमतिदेशवाक्यार्थशाब्दबोधः तत्र उपमितेरनङ्गीकारात्। तत्र तदुत्तरं पुनः सादृश्यविशिष्टपिण्डदर्शनम् ततः अतिदेशवाक्यार्थस्मरणं, तदुत्तरमेव उपमितेः स्वीकारात्।

उपमित्याकारविचारः

उदयनाचार्याः अयमसौ गवयशब्दवाच्यः इति मतिमुपमितिमाचक्षते। तत्र अयमिति गवयसामान्यभानम्। असाविति अतिदेशवाक्यश्रुतत्वभानम्। अथवा अयमिति प्रत्यक्षव्यक्तेः भानम्, असाविति गवयत्वाक्रान्तसकलव्यक्तिभानम् इति विवेकः। नवीनास्तु उपमितेः गवयः गवयपदवाच्यः इत्याद्याकारकत्वमिच्छन्ति। अयं गवयपदवाच्यः इत्याकारकत्वं च न स्वीकर्तुमुचितम्। तथा सति गवयव्यक्त्यन्तरस्य शक्तिग्रहाविषयस्य शाब्दबोधे भानानुपपत्तेः। केचित्तु गोसदृशो गवयः इत्यत्र सदृशपदोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहः गोसदृशो गवयपदवाच्यः इत्याकारः एव उपमितिस्वरूपः। तादृशग्रहश्च शाब्दबोधात्मक एव, न तु प्रमित्यन्तरमिति वदन्ति। तन्न, शाब्दबोधे पदजन्यपदार्थोपस्थितेः हेतुतया गवयत्वावच्छेदेन गवयपदवाच्यत्वविषयिण्याः उपमितेः गवयपदजन्यवाक्यत्वविशिष्टोपस्थितिं विना शाब्दत्वासम्भवात्। गोसादृश्यस्य गवयत्वस्य च प्रत्यक्षेण उपस्थितेः तुल्यत्वेऽपि गवयत्वजात्यपेक्षया गोसादृश्ये गौरवज्ञानस्य प्रतिबन्धकस्य सद्भावेन गोसादृश्यावच्छेदेन

In Public domain. Digitization Muthulakshmi Research Academy

गवयपदवाच्यत्वोपमितिः न जायते। गवयपदात् गवयत्वप्रकारकशाब्दबोधानुरोधेनापि गवयत्वावच्छेदेनैव गवयपदवाच्यत्वग्रहः उपमितिरूपः।

वैशेषिकमतम्

वैशेषिकाः पुनः अयं गवयपदवाच्यः इति ज्ञानस्य अनुभूतप्रत्यभिज्ञारूपत्वं स्वीकुर्वन्तः उपमानस्य मानान्तरत्वं प्रतिक्षिपन्ति। गवयपदवाच्यत्वानुभवस्य गोसदृशो गवयः इति अतिदेशवाक्यात् गोसदृशो गवयपदवाच्य इत्यर्थकात्, अयं गवयशब्दो गोसदृशवाची असति लक्षणादिवृत्यन्तरे प्राज्ञैः गोसदृशे प्रयुज्यमानत्वादित्यनुमानात् सामान्यमुखव्याप्त्यनुगृहीताद्वा सम्भवात्।

तन्मतदूषणम्

शब्देन अनुमानेन वा शक्तिग्रहः दुर्घटः। गोसादृश्यस्य गवयपदप्रवृत्तिनिमित्तत्वाभावात्। गवयत्वस्य तत्पदप्रवृत्तिनिमित्तस्य पूर्वमननुभूतत्वात्। न च गोसादृश्यं कुतो न गवयपदप्रवृत्तिनिमित्तमिति शङ्क्यम्। तस्य तथात्वे गोप्रतीतिविरहिणां गवयमात्रज्ञानवतां गवयव्यवहारानुपपत्तेः। तदुपपत्तये गवयत्वस्यापि तथात्वे अनेकशक्तिकल्पनाप्रसङ्गात्।

किञ्च वृद्धव्यवहारात् गवयत्वे एव गृहीतशक्तिकः अतिदेशवाक्यप्रयोक्ता स्वगृहीतां शक्तिं परं प्रतिबोधयितुं गोसदृशो गवय इति वाक्यं प्रयुङ्क्ते। अत एव तेन गोप्रतीत्यभावेऽपि पूर्वं गवयव्यवहारः कृतः। तत्र यथा का पृथिवीत्यत्र गन्धवती पृथिवी इति प्रयुक्तेऽपि प्रवत्तिनिमित्तस्य पृथिवीत्वस्य गन्धवत्वं ज्ञापकमेव न तु स्वयं प्रवृत्तिनिमित्तं तथा प्रकृते गोसदृशो गवयः इति प्रयोगेऽपि इति वा, किं वा सादृश्यमेव निमित्तमित्यन्यतरपक्षानिर्धारणात् गोसादृश्यप्रवृत्तिनिमित्तकत्वनिश्चयाभावात् गवयत्वप्रवृत्तिनिमित्तस्य ग्रहीतुमशक्यत्वात् न प्रमाणान्तरेण निर्वाहः सुकरः। तस्मात् शाब्दबोधात्मकं गवये गवयपदवाच्यत्वज्ञानमसम्भवि।

एवं गवयशब्दे गोसदृशवाचकत्वानुमानमपि न युज्यते, सादृश्यस्य निमित्तत्वविरहात्। गवयशब्दः गवयवाचकः असति वृत्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात् इति साध्यते चेत्, तर्हि हेत्वसिद्धिः। वृत्यन्तरं हि शक्यसम्बन्धरूपलक्षणा। यदि शक्तिग्रहः एव न जातः तदा वृत्यन्तरस्याप्यगृहीततया असति वृत्यन्तरे इत्यस्य ग्रहणं न सम्भवति।

किञ्च गवयस्याग्रहणे गवये प्रयुज्यमानत्वमपि दुर्ग्रहम्। गोसदृशो गवय इति सामानाधिकरण्यबलात् शक्तिः सुग्रहा इति तु न शक्यते वक्तुम्। यतः गोसदृशपदबलात् पिण्डमात्रे शक्तिग्रहो भवति, गवयपदस्य गवयपदवाच्यत्वपरत्वात्। गवये प्रयुज्यमानत्वादित्यत्र तावन्मात्रस्य विवक्षितत्वे साध्य-

In Public domain. Digitization Muthulakshmi Research Academy

वाचिपदेनापि तावदेव विवक्षणीयमिति सिद्धसाधनम्। तस्यार्थस्य अतिदेशवाक्यादेव सिद्धत्वात्। गवयत्वावच्छिन्ने प्रयुज्यमानत्वं हेतुः क्रियते चेत् हेतुत्वसिद्धिः।

अनुमानेन गतार्थत्वनिरासः

गवये गवयपदवाच्यत्वमनुमानगम्यमेव। हेतुश्च गोसादृश्यम्। तच्च प्रत्यक्षेण प्रतीयते। गोसादृश्ये गवयपदवाच्यत्वव्याप्तिग्राहकमतिदेशवाक्यम्। गोसदृशो गवयपदवाच्यः इत्यर्थकं हि तत्। गोसदृशोद्देशेन गवयपदवाच्यत्वं विदधाति। उद्देश्यविधेयभावस्थले असति बाधके उद्देश्यतावच्छेदकव्यापकत्वं विधेये भासते। अतः गोसादृश्यव्यापकत्वं गवयपदवाच्यत्वे बोधयदिदं वाक्यं व्याप्तिग्राहकं भवति। तस्मात् उपमिति प्रमेयमनुमानगम्यमेवेति पूर्वपक्षः।

समाधानं तु न ह्यतिदेशवाक्यतः प्रकृतापेक्षितलाभः। तस्य गवयपदार्थत्वेन व्याप्यतायाः गोसादृश्ये च व्यापकतायाः बोधकत्वेन वैपरीत्यात्। तद्धि वाक्यं को गवयपदार्थः इति प्रश्नसमाधानरूपम्। तथा च यो गवयपदार्थः स गोसदृशः इति यच्छब्दयोगबलात् प्रथमावगतगवयपदार्थत्वस्यैव व्याप्यत्वमवसीयते। ज्ञातस्यैव उद्देश्यत्वात् अज्ञातस्यैव विधेयत्वात्। गोसादृश्यस्य च व्यापकत्वमेव प्रतीयते इति न तेन गवयपदवाच्यत्वानुमानं शक्यम्।

अतिदेशवाक्यस्य लक्षणपरत्वात् अनुमानोपयोगित्वशङ्का तत्समाधानं च

को गवयपदार्थः इति प्रश्नवाक्यस्य किं लक्षणकः गवयपदार्थः इत्यर्थः। तदुत्तरस्य अतिदेशवाक्यस्य गोसदृशो गवयः इत्यस्य गोसादृश्यलक्षणकः इत्यर्थः। लक्षणस्य च हेतुत्वं गन्धवती पृथिवीत्यादौ दृष्टम् इति अतिदेशवाक्यबोधितगोसादृश्यलिङ्गकानुमितिविषय एव गवयपदशक्तिः, न तु मानान्तरवेद्या इति शङ्का।

तत्रेदं समाधानम् लक्षणस्य इतरव्यावृत्तिसाधकत्वं व्यवहर्तव्यतासाधकत्वं च दृष्टम्। तदा तस्या व्यतिरेकित्वमेव नान्वयित्वम् इति प्रकृतेऽपि व्यतिरेकदृष्टान्त एव वक्तव्यः। स च गजादिः। परन्तु तन्न सम्भवति, गवयपदवाच्यत्वसामान्याभावस्यासिद्धत्वात्। गजादौ केनाऽपि गवयपदं न प्रयुज्ये इति निश्चेतुमशक्यत्वात्। पदानामनेकार्थकत्वसम्भवादपि सोऽभावः असिद्धः। कतिपयैरप्रयुज्यमानत्वमात्रेण गवयपदवाच्यत्वविशेषाभावस्तु गोसादृश्याभावं व्यभिचरति, गवये एव वर्तमानत्वात् गन्धवत्वादिलक्षणेन व्यवहारसाधनं कथमिति चेत्, इत्थं पृथिवीत्वनिमित्तकतया पृथिवीपदवाच्यतासाधनं कथमिति चेत्, इत्थं पृथिवीत्वनिमित्तकतया पृथिवीपदवाच्या गन्धवत्वादित्येवम्। प्रकृते तु सामान्यतः गवयपदार्थस्यैव गोसादृश्यलक्षणकथनात् गवयत्वस्य प्रागननुभूतत्वेन तन्निमित्तकवाच्य-

In Public domain. Digitization Muthulakshmi Research Academy

तावन्तं मनसिकृत्य लक्षणप्रश्नासम्भवाच्च गवयत्वनिमित्तकतया गवयपदवाच्यत्वं साधयितुं न शक्यते इति वैषम्यम्। तस्मात् गवयपदवाच्यत्वमुपमानवेद्यमेवेति।

लिङ्गप्रश्ने अतिदेशवाक्येन उत्तरम् इति पक्षनिरासनम्

गवयपदार्थः किं लिङ्कः इति प्रश्ने अतिदेशवाक्येन उत्तरम्। गवयपदवाच्यतायां किं लिङ्गमिति लिङ्गसामान्यविषयकः प्रश्नः। गोसादृश्यं लिङ्गमिति तदुत्तरम्। अत्र अन्वयदृष्टान्तोऽपि सुलभः इति चेत्, न। गवयपदवाच्यत्वज्ञानाभावेन तत्र लिङ्गप्रश्नायोगात्। गवयपदवाच्यत्वज्ञानं कुतो नास्तीति चेत्, इत्थं लिङ्गविदुषः एव लिङ्गविशेषप्रश्नो जायते। न हि ज्ञाने जाते ज्ञानेच्छा भवति। लिङ्गे अज्ञाते लिङ्गज्ञेयं गवयपदवाच्यत्वं न ज्ञातुं शक्यमिति। न च लिङ्गज्ञानं विनापि तज्ज्ञानं सुकरम्। गवयशब्दः किञ्चिद्वाचकः शिष्टैः प्रयुज्यमानत्वादिति लिङ्गेनैव तस्य ज्ञातत्वात्। किञ्चिद्वाचकत्वज्ञाने सति तुल्यवित्तिवेद्यतया कस्यचित् गवयशब्दवाच्यत्वमपि ज्ञातमेवेति लिङ्गे ज्ञाते लिङ्गप्रश्नो न युज्यते।

ननु गवयशब्दः सप्रवृत्तिनिमित्तकः साधुशब्दत्वात् इति सामान्यतः प्रवृत्तिनिमित्ते अवगते तद्विशेषानुमापकलिङ्गजिज्ञासा सम्भवतीति चेत्, न। प्रवृत्तिनिमित्तविशेषमजानतः तत्र किं लिङ्गमिति-विशेषरूपेण प्रश्नासम्भवात्। प्रत्युत किं प्रमाणमित्येव प्रश्नोदयात्। अनुमानैकवेद्यत्वस्यानिर्धारणात्। अतः को गवयपदार्थः इति प्रश्नस्य गवयपदप्रवृत्तिनिमित्तं किमित्येवार्थः। गवयत्वरूपस्य प्रवृत्तिनिमित्तस्य साक्षात् दर्शयितुमशक्यत्वात् गोसादृश्यरूपं तदुपलक्षणं वक्ता निर्दिशति। श्रोता च गोसादृश्यस्य निमित्तत्वे गौरवम्, निमित्तन्तरकल्पने च प्रतीतगुपुरुषविषये क्लृप्तेन निमित्तेन कल्प्यस्य विरोधः इति तर्कबलेन निमित्तजिज्ञासुः गवये गोसादृश्यदर्शने सति उपलक्षणबलात् तत्र यत् गवयत्वं साक्षात्कृतं तत्प्रवृत्तिनिमित्तकत्वं गवयशब्दस्य उपमानात् निर्धारयति। तस्मात् उपमानं प्रमाणान्तरम्।

प्रवृत्तिनिमित्तसाधकानुमानानां निरासः

१. (गवयत्वप्रत्यक्षे जाते) इदं सामान्यं गवयशब्दप्रवृत्तिनिमित्तं गोसादृश्यसमनियतत्वात् इत्यनुमाने दृष्टान्तासिद्धिः, गवयत्वप्रकारकप्रमाविषयत्वे व्यभिचारः, अप्रयोजकत्वाच्च।

२. गवयशब्दः एतत्प्रवुत्तिनिमित्तकः गोसादृश्याप्रवृत्तिनिमित्तकत्वे सति तत्समनियत-प्रवृत्तिनिमित्तकत्वादित्यनुमाने दृष्टान्तासिद्धिः, समनियतधर्मान्तरमादाय अर्थान्तरञ्च।

३. गवयशब्दः गवयत्वप्रवृत्तिनिमित्तकः गवयत्वेतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्ति-निमित्तकत्वादित्यनुमाने च दृष्टान्तासिद्धिः। एवं नानार्थकशब्दस्य अतिदेशवाक्याधीनशक्तिग्रहस्थले असम्भवि च तदितराप्प्रवृत्तिनिमित्तकत्वाभावात्। किञ्च एतादृशहेतुज्ञानव्याप्तिज्ञानादिविरहेऽपि

In Public domain. Digitization Muthulakshmi Research Academy

प्रवृत्तिनिमित्तनिर्णयस्यानुभवसिद्धत्वात् नानुमानवेद्यं प्रवृत्तिनिमित्तम्। उपमिनोमीत्यनुव्यवसायबलादपि उपमानजन्नयायाः उपमितेः प्रमित्यन्तरवैलक्षण्यं सिद्ध्यति।

यथा साधर्म्यस्थले शक्तिग्रहः नैयायिकैः स्वीक्रियते, तथा वैधर्म्यस्थलेऽपि सः स्वीक्रियते। न च तर्हि नैधर्म्यज्ञानस्य प्रमाणान्तरतापत्तिः शङ्क्या। ज्ञातशक्तिकपदसमभिव्याहृततदर्थजिज्ञासाशमनार्थवाक्यान्तर्गतपदार्थस्य वाच्येऽर्थे पुनरनुसन्धानमुपमितिकरणमुपमानमिति उभयानुगतलक्षणनिर्वचनसम्भवात्।

इत्थं संक्षेपतः उपमानप्रमाणस्वरूपं नैयायिकाभिमतं परपक्षप्रतिक्षेपपुरस्सरं पूर्वाचार्यरचितग्रन्थालोडनेन निरूपितम्। तत्र दोषाः गुणैकपक्षपातिभिः विद्वद्भिः क्षन्तव्याः इति शम्।

सहायकग्रन्थसूची

१. न्यायसिद्धान्तमुक्तावली (सव्याख्या)
२. न्यायसूत्रम् (सव्याख्यम्)
३. वैशेषिकसूत्रम् (सव्याख्यम्)
४. न्यायकुसुमाञ्जलिः (विस्तरसहितः)
५. तत्त्वचिन्तामणिः (माथुरीसहितः)
६. प्रकरणपञ्जिका
७. मानमेयोदयः
८. शास्त्रदीपिका
९. शाबरभाष्यम्

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणानां श्रुतिमूलकत्वम्

डा.चिर्रावूरि श्रीरामशर्मा

सुविदितमेव समेषां विदुषां सर्वं प्रमाणाधीनमिति यदि प्रमाणं दोषग्रस्तं तर्हि प्रमेस्याऽपि तत्वमेव। तत्र प्रमाणानां बहूनां सत्वेऽपि तत्तद्दर्शनेषु तेषां गणनं भिन्नरूपेण दृश्यते। प्रत्यक्षमेकं चार्वाकाः, अनुमानमपि बौद्धाः, शब्दोऽपीति आर्हताः, उपमानमपीति नैयायिकाः, अर्थापत्तिरनुपलब्धिश्चेति मीमांसकाः, ऐतिह्यादिकमपीति पौराणिकाः इत्यादि रूपेण। तत्र पूर्वमीमांसायां सर्वं श्रुतिमूलकमेव अभ्युपगच्छन्ति। श्रुतावपि 'एतानि प्रमाणानि' इति साक्षात्प्रमाणपरिगणनं न श्रूयते। तथा सति दर्शनान्तरसिद्धानि उपजीव्य विचारोऽयं प्रवर्तत इति सामान्यसिद्धोऽर्थः। सर्वदर्शनेषु च इयमेव रीतिः स्वप्रमेयानुगुणाः पदार्थाः तत्र प्रतिपाद्यन्ते, अन्ये च यथाऽवसरं स्वाविरुद्धतया वर्तमानं स्वीक्रियते च। यथा जगतः प्रकृतिमूलत्वप्रतिपादने बद्धादराणां सांख्यानां कालस्य स्वयम् अप्रतिपादनेऽपि दर्शनान्तरप्रतिपादितस्य स्वीकारः। सत्येवं पूर्वमीमांसायां प्रमाणानां विषये का वा सङ्गतिरिति चेत् वेदवाक्यार्थो यागादिः विहितः धर्मः इति धर्मनिरूपणप्रस्तावे प्रतिपादकस्य वेदस्य प्रामाण्यविषये पराक्रान्तं सूरिभिः। तत्र धर्मस्य प्रत्यक्षाविषयत्वं निरूपयन् प्रत्यक्षस्वरूपम् अर्थाल्लक्षणं प्रतिपादयति सूत्रकार एव स्वयम्। तत्र यद्यपि लक्षणं न निर्दुष्टमत एव सूत्रस्थयोः सत्तत्पदयोः व्यत्यासपाठः वृत्तिकारेण कृतः। तदुक्तम् भट्टपादैः -

असामर्थ्यं च यत्त्वस्य वृत्तिकारेण लक्षणे।
तत्सम्प्रयोग इत्येवं पाठान्तरमुदाहृतम्।।

अयमर्थः - प्रत्यक्षस्य धर्मे अनिमित्तत्वं ब्रुवता सूत्रकारेण "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानस्योपलम्भनत्वात्" इत्यसूत्रि। वृत्तिकारेण इदं सूत्रद्वयत्वेन व्याख्यातम्। तत्र प्रथमभागेन प्रत्यक्षलक्षणं प्रतिपाद्य द्वितीयभागे न च तस्य धर्मे अनिमित्तत्वं च प्रतिपादितम्। यथा श्रुतसूत्रे अतिव्याप्त्यादिपरिहाराय सत्तत्पदव्यत्यासेन पाठान्तरं कल्पितमिति। एतादृशं व्याख्यानं न युक्तमिति इतः प्रागेव -

वर्ण्यते सूत्रभेदेन येन प्रत्यक्षलक्षणम्।
तेन सूत्रस्य सम्बन्धो वाच्यः पूर्वप्रतिज्ञया।।
लक्षणस्याभिधानन्तु केनांशेनोपयुज्यते।
किमर्थं चानुमानादेर्लक्षणं नाऽत्र कथ्यते।। इत्यादिना निरूपितम्।

विश्रान्त प्रवाचकः, गौतमी संस्कृतविद्यापीठम्, राजमहेन्द्रवरम्.

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणानां लक्षणं प्रमाणानि इयन्ति इति च सूत्रकारेण न कथितम्। तर्हि तेषामभाव इति न मन्तव्यम्। यथा अस्मिन् सूत्रे प्रत्यक्षमनिमित्तमिति वदता प्रत्यक्षं प्रमाणमिति स्वीकृतम्। एवमनुमानादेरपि तत्र सूत्रे स्वीकरणं दृश्यते एव, 'विरोधे त्वनुमानं स्यात्' इत्यादौ। एवञ्च यद्यपि साक्षाद्वचनैः मीमांसा-सूत्रेषु प्रत्यक्षादीनां प्रामाण्यमुत लक्षणं नोक्तम्। तथापि दर्शनान्तरप्रसिद्धानां प्रमाणानामत्रापि ग्राह्यत्वं स्वीकृतमिति मते अत्रैको विशेषः श्रुतिसम्मतस्यैव स्वीकरणे कृतयत्नानां मीमांसकानां मते केषां प्रमाणानां श्रुतिनिर्देशो वर्तत इति विचारणीयम्। सूत्रेषु निर्दिष्टत्वे तेषां श्रुतिसम्मतत्वं वर्तते इति ज्ञायते एव। प्रत्यक्षसूत्रे प्रत्यक्षस्य निर्देशः, एवं 'विरोधे त्वनुमानं स्यात्' इत्यादौ अनुमानस्य, तद्व्यपदेशात् नामधेयत्वं निश्चीयते, तत्र व्यपदेशशब्देन उपमानप्रमाणं स्वीक्रियते स्म। शब्दस्य नित्यतां वेदस्य च अपौरुषेयत्वञ्च सम्पाद्य इतरेभ्योऽपि प्रमाणेभ्यः शब्दस्य प्रामाण्यं साधितमेव। एवञ्च नैयायिकसिद्धानि चत्वारि प्रमाणानि श्रुतिमूलकानीति। तानि च प्रत्यक्षानुमानोपमानशब्दा इति। प्रक्रिया तु भिन्ना स्यान्नाम, लक्षणानि च भिन्नानि भवन्तु। परन्तु चत्वारि तान्येतानि ''तत्र साक्षादिन्द्रियसम्प्रयोगजं ज्ञानं प्रत्यक्षम्'' इति लक्षणं शास्त्रदीपिकायाम्। श्रुतौ तु 'सूर्यां यः प्रत्यक्षं विद्यात् स एतत्प्रतिगृह्णीयात्' इति मन्त्रे ''यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेत् पुरास्य वषट्कारात् प्रत्यक्षा एव देवता यजति'' इति ऐतरेयब्राह्मणे च प्रत्यक्षशब्दः मानसिकप्रत्यक्षपरः। ''एते वै देवाः प्रत्यक्षं यद्ब्राह्मणाः'' इति ब्राह्मणे चाक्षुषप्रत्यक्षपरः इति भेदः, एवमनुमानं प्रमाणम् 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इत्यादौ अनुमानं सूत्रकारेण स्वीकृतम्।

तत्र स्वार्थानुमानस्य स्वप्रतिपत्तिमात्रेण सिद्धत्वात् परार्थानुमाने वाक्यं साधनं सत् तदवयव-पञ्चकरूपमिति नैयायिकाः। उक्तञ्च - ''तच्च पञ्चतयं केचिद्द्वयमन्ये, वयं त्रयम्। उदाहरणपर्यन्तं यद्वो-दाहरणादिकमिति।'' वयं मीमांसका इत्यर्थः। तत्र प्रतिज्ञाहेतूदाहरणोपनयनिगमैः पञ्चावयवं वाक्य-मनुमानमिति अक्षपादीयाः।

१. अनित्यः शब्दः इति प्रतिज्ञा, २. कृतकत्वात् इति हेतुः, ३. यत्कृतकं तदनित्यं दृश्यते यथा घटादि इत्युदाहरणम्, ४. कृतकश्च शब्दः इत्युपनयः, ५. तस्मादनित्यः इति निगमनम्, (शास्त्रदीपिको-दाहृतम्) अयमतिविस्तरः इति सौगताः उदाहरणोपनयात्मकं द्व्यवयवं वदन्ति 'यत्कृतकं तदनित्यं यथा घटादि, कृतकश्च शब्दः तस्मादनित्यः' इति भाष्यकारः। 'यत्कर्म तत्फलवत्, होमोऽपि कर्म तेनापि फलवता भवितव्यम्' इति भाष्यकारप्रयोगः । तयोः अस्मिन् शास्त्रे सूत्रकारकल्पत्वेन त्र्यवयव-त्वमेव मीमांसामते अनुमानस्य। अस्य श्रुतिमूलकत्वमारुणकेतुककाठके ''स्मृतिः प्रत्यक्षमैतिह्यम्, अनुमानश्चतुष्टयम्। एतैरादित्यमण्डलं सर्वैरेव विधास्यते'' इत्यत्र अनुमानस्य प्रामाणतया पाठः आम्नायते। तत्र अनुमीयते स्मृतिवचनमनेनेति व्युत्पत्या आचारः अर्थः स्वीकृतः। भवतु तथापि अनुमानप्रामाण्यं विना तन्न सिध्यतीति इदं श्रुतिवचनमनुमानप्रामाण्यप्रतिपादने मूलं भवति।

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयं प्रमाणं शब्दः। स च लोकवेदभेदेन द्विविधः। लोके शब्दः उच्चारयित्रादिप्रामाण्याधीनः। वेदस्तु स्वतस्सिद्धः अत एव तस्यापौरुषेयत्वादिकं साधितं मीमांसकैः। वेदे शब्दः अपौरुषेयः। स च बोधकत्वादबाधितत्वात् च स्वत एव प्रमाणम्। तत्र सर्वस्याऽपि वेदस्य शब्दरूपत्वात् बोधकत्वात् च प्रामाण्यं सिद्ध्यति। तस्य च नित्यत्वं - ''वाचा विरूप नित्यया'' इत्यादौ आम्नातम्।

उपमानस्यापि चतुर्थस्य पृथक् प्रमाणत्वं सूत्रकारेण 'तद्व्यपदेशात्' इत्यत्र उपमानमेव व्यपदेश-शब्देन गृहीतमिति बोध्यम्। सोमाभावे पूतीकं विदधता वेदेन सोमसादृश्यमेव विहितमिति उपमान-स्यापि वेदमूलकत्वं, 'यथा वै श्येनः' इत्यादि उपमानप्रयोगश्च। एतदतिरिक्ततया मीमांसकैः प्रमाणद्वयं प्रतिपादितम् अर्थापत्तिः, अनुपलब्धिश्चेति। दृष्टार्थापत्तौ दृष्टस्य ग्रहणेन प्रतीतिः लभ्यते इति श्रुतार्थापत्ति-विषये एव शब्दप्रयोगः इष्यते। ''दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यर्थकल्पना'' इति भाष्यम्। तत्र श्रुतार्थापत्तिविषये -

पीनो दिवा न भुङ्क्ते चेत्येवमादि वचः श्रुतौ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते ।।

इत्यारभ्य अर्थगोचरत्वशब्दगोचरत्वपक्षौ प्रतिपाद्य अर्थगोचरत्वे अवैदिकताप्रसक्तिं निरूप्य शब्दगोचरत्व-पक्षे च श्रुतवचनार्थतां निरस्य दिवा वाक्येन रात्रिप्रभृतिपदार्थानुपस्थितिं तेषामनन्वितत्वं ''तस्मात् वाक्यान्तरेणाऽयं बुद्धिस्थेन प्रतीयते'' इति वचनेन अर्थापत्तिं संस्थाप्य-

न ह्यनुच्चारिते वाक्ये प्रत्यक्षं तावदिष्यते।
नाऽनुमानं न चेदं हि दृष्टं तेन सह क्वचित्।।

इत्यादिवचनैः प्रत्यक्षानुमानादावनन्तर्भावं निरूप्य पृथक्प्रमाणत्वं स्थापितं वार्तिके ।

तत्प्रयोजनं च -

स्मृत्या श्रुतिर्या परिकल्प्यतेऽस्मिन् लिङ्गादिभिर्या विनियोजिका च।
फलादिभिर्यत् परिपूरणश्च सम्बन्धदृक् तत्र न काचिदस्ति।।

तत् सर्वमित्याद्यसमञ्जसं स्यात् न चेदियं स्यादनुमानतोन्या इति अनुमितश्रुतिकल्पने विश्व-जिदादौ अश्रुतफलके फलसम्बन्धकल्पने च इदमेव प्रमाणं कल्प्यते इति श्रुतिमूलकत्वं साधितम्। ''प्रायशश्चानया वेदे व्यवहारो व्यवस्थितः।'' इति वार्तिके च प्रतिपादितश्च। एवं विलक्षणस्यास्य प्रमाणस्य पृथक्प्रमाणतां निरूप्य तुष्यतु दुर्जन इति न्यायेनाऽस्याऽपि प्रमाणस्य अनुमानलक्षणलक्षि-तत्वेऽपि शब्दार्थतामात्रेण 'अनु पश्चात् मानम्' इति योगमाश्रित्य तदन्तर्भावः स्वीक्रियते चेत् अस्तु तथेति च प्रतिपादितं भट्टपादैः - ''एवं स्वभावाप्यनुमानशब्दं लभेत चेदस्ति यथेप्सितं नः'' इति

In Public domain. Digitization Muthulakshmi Research Academy

वचनेन अस्तु अस्य च श्रुतिमूलकत्वं भट्टपादैरेव व्याकरणाधिकरणे १.३.२४ तमे सूत्रे पूर्वपक्षे महाभाष्यपस्पशाह्निकप्रोक्तस्य तिरस्करणं कुर्वद्भिरुक्तं तथा ''चत्वारि वाक्परिमिता पदानि'' इति यानि तावदोहकारमहाव्याहृत्यादिचतुष्टयबाहुल्यप्रयोजनानुसरणेन नैरुक्तैरप्यक्षरवर्णसाम्यानि ब्रूयादितिवत् प्रपञ्चितम्। न तत्र व्याकरणस्य कश्चिदधिकारः। यत्तु नामाख्यातोपसर्गनिपातचतुष्टयानुगतं वैयाकरणमतमाश्रितं तदपि चतुष्टयस्य लोकसिद्धत्वादेव नातीवव्याकरणापेक्षम् इति भाष्यमतं प्रतिपाद्य - ''एतद्विषयत्वे च वर्ण्यमाने'' ''तुरीयं वाचो मनुष्या वदन्ति'' इत्यसम्बद्धमेव स्यात्। चतुर्णामपि पदजातानां मनुष्यैरुच्यमानत्वात्। तस्मादयमस्य मन्त्रस्याऽर्थः पौर्वापर्यसङ्गतो वर्ण्यते। चत्वारि वाक्परिमिता पदानि इति यैर्वाक्पद्यते गम्यते तानि चत्वारि प्रत्यक्षानुमानोपमानार्थापत्त्याख्यानि प्रमाणान्यभिधीयन्ते। तत्र यानि प्रतीकविधिप्राकृतवैकृतवाक्यसारूप्यदृष्टानुपपद्यमानादिप्रभवैः अनुमानोपमानार्थापत्त्याख्यैः त्रिभिः मन्यन्ते तानि तत्सिद्धत्वादेव नेङ्गयन्ति नोच्चारयन्ति। यस्तु भागः तैरशक्यः प्रतिपादयितुं तं तुरीयं प्रत्यक्षसमधिगम्यम् अध्येतारो मनुष्या वदन्ति समामनन्तीत्यर्थः। षट् प्रमाणीमध्यात् च प्रमाणद्वयं वाक्यपदत्वात् अपोधृतम्। अभावस्य तावत् अभावविषयत्वादेव वाक् पदं न भवति। आगमस्य पुनः वागात्मकत्वात्पद्यमानवागाश्रितस्य पदत्वाश्रयणमनुपपन्नम् । ''प्रत्यक्षपक्षनिक्षिप्तत्वात्पृथक्त्वेनानिर्देशः'' इति १.३.२४ सूत्रवार्तिके एतच्छ्रुतिमूलकत्वमर्थापत्तेः।

अनुपलब्धिः

तत्र बहुविचार्य अभावशब्दवाच्यत्वात् प्रत्यक्षादेश्च भिद्यते।

प्रमाणानामभावो हि प्रमेयाणामभाववत्।
अभावो वा प्रमाणेन स्वानुरूपेण मीयते।
प्रमेयत्वात् यथा भावः तस्मात् भावात्मकात् पृथक्।

इति निरूप्य - 'कर्माणि सर्वाणि फलैस्समस्तैः सर्वैः यथावच्च यदङ्गकाण्डैः। न सङ्गतानीह परस्परं च नाङ्गं तदेतत् प्रभवं क्रतूनाम्।' अयमर्थः दर्शादिक्रतुषु श्रुतिविहिताङ्गातिरेकेण अङ्गान्तरायाते फलान्तराभावे च आगमाभाव एव प्रमाणमस्तीति। आगमाभावः वचनानुपलब्धिरिति यावत्। एवं न होतारं वृणीते दीक्षितो न ददातीत्यादौ निषेधाच्च अङ्गत्वाभाव एव वचनादपि प्रतिपाद्यते। सत्येवं सम्भवैतिह्ययोः अपि पृथक्प्रमाणता भवतु इति चेत् ''ततोऽधिकं यद्वयमिष्टमन्यैः भेदो न तस्येत्यपि सिद्धये तत्'' इत्युक्त्वा एतयोः पूर्वोक्तप्रमाणान्तर्भावश्च सुनिरूपितः। एवञ्च - एतत्प्रमाणषट्कस्य श्रुतिमूलकत्वं यथामति विवृतम्। श्रुतिसिद्धत्वादेव न्यायरत्नाकरे पार्थसारथिमिश्रैः अभावप्रकरणसमाप्तौ - ''तस्मात् षडेव प्रमाणानि न न्यूनानि नाधिकानि वेति'' इति प्रोक्तमिति शम्।

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणमीमांसा

विद्वान् हित्लळ्ळि सूर्यनारायणनागेन्द्रभट्टः

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्धधारिणे।।

१.दर्शनानि

दृश्यत इति दर्शनमिति व्युत्पत्त्या दर्शनशब्दो ज्ञानपरः। दृश्यतेऽनेनेति व्युत्पत्त्या दर्शनशब्दो ज्ञानसाधनपरः। प्रकृते द्रष्टृभेदेन विविधं ज्ञानं तत्साधनञ्चेति द्वयमपि विवक्षितम्। लोके प्रत्येकस्यापि दर्शनं तत्साधनञ्च प्रायेणाभिमतमिति दर्शनानां सङ्ख्या न सङ्ख्यातुं शक्या। तथापि सर्वेषां दर्शनं न ज्ञेयमिति ज्ञेयदर्शनस्य सङ्ख्या ज्ञातुं शक्या।

१.१.दर्शनानां द्वैविध्यम्

आस्तिक-नास्तिकभेदेन दर्शनानि द्विविधानि। चार्वाक-सौगतादीनि नास्तिकदर्शनानि, यत्र वेदप्रामाण्यं नाङ्गीक्रियते। न्यायवैशेषिकयोः साङ्ख्ययोगयोः पूर्वोत्तरमीमांसयोः वेदप्रामाण्यस्वीकारेण तान्यास्तिकदर्शनानीति व्यवहारः।

२.प्रमाणम्

सर्वदर्शनसङ्ग्रहे चार्वाकदर्शनमारभ्य शार्वाकरदर्शनपर्यन्तं षोडशदर्शनानि समग्राहिषत। तेषु सर्वेषु प्रेमयविवरणं प्रमाणविवरणपूर्वकं क्रियते। यद्यपि प्रमाकरणं प्रमाणमिति प्रमाणलक्षणं सर्वेषु दर्शणेषु समानम्, तथापि प्रमालक्षणं न समानमिति तत्र विवादो विद्यते।

२.१.प्रमाणसंख्या

तत्र चार्वाकदर्शनं प्रत्यक्षस्यैव प्रामाण्यं स्वीकरोति। सौगतमार्हतञ्च दर्शनमनुमानस्यापि प्रामाण्यमुररीकरोति। वैशेषिकदर्शनं विहाय रामानुजादीनि शाबरपर्यन्तानि सर्वाणि दर्शनानि प्रत्यक्षानुमानाभ्यां सह शब्दस्यापि प्रामाण्यं स्वीकुर्वन्तीति प्रमाणत्रयवादीनि। न्यायदर्शने उपमानस्यापि पृथक् प्रामाण्यं स्वीकृतमिति प्रमाणचतुष्टयवादिनो नैयायिकाः। पूर्वमीमांसादर्शनं भाट्टप्राभाकर-भेदेन प्राधान्येन् द्विविधमिति तद्विषये पार्थक्येन वक्तव्यम्। प्राभाकराः कथितेन प्रमाणचतुष्टयेन सहार्थापत्तिमपि स्वीकुर्वन्ति। भाट्टास्तु प्रमाणपञ्चकेन सहानुपलब्धिमपि प्रमाणं मन्यन्ते। वेदान्तदर्शनं

निदेशकः, ब्रह्मविद्यासंस्थानम्, स्वर्णवल्ली, कर्णाटकराज्यम्.

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणविषये भाट्टमतमेव पुरस्करोति। पौराणिकाः सम्भवैतिह्ययोः पृथक् प्रामाण्यं वदन्ति। तदुक्तं मानमेयोदये -

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धो वैशेषिको द्वौ
भासर्वज्ञ सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति ।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात् ।।

एतद्व्यतिरेकेणापि लोकाख्यं नवमम्, आर्षञ्च दशमं प्रमाणमिति केषाञ्चिन्मतं प्रकरणपञ्चिका-व्यख्यायामस्ति।

अत्र प्रमाणविषये वक्तव्ये पद-वाक्य-प्रमाणज्ञेनाचार्येणेत्यादि शाबरभाष्यवाक्यमीक्षत्यधि-करणगतं स्मर्यते। तद्व्याख्यायां रत्नप्रभायां व्याकरण-मीमांसा-न्यायनिधित्वात् पद-वाक्य-प्रमाणज्ञत्व-मित्युक्तम् । अत्र पदशास्त्रं व्याकरणम्, वाक्यशास्त्रं मीमांसा, प्रमाणशास्त्रं न्याय इत्यभिप्रायः प्राचीनानामवगम्यते। किन्तु सर्वमपि दर्शनं प्रमाणविषये नैयायिकमुखावलोकनमविधाय स्वातन्त्र्येणैव विवरणं करोति ।

३.मीमांसा

मानपूजायामित्यस्माद् धातोर्मानेर्जिज्ञासायामिति वररुचिवार्तिकेन जिज्ञासार्थकोऽयं शब्दः लक्षणया पूजितविचारार्थे प्रयुज्यते। अत एवाचार्य वाचस्पतिमिश्रैः पूजितविचारवचनो मीमांसाशब्द इत्युक्तम् । विचारे पूजितत्वञ्च परमपुरुषार्थहेतुभूतसूक्ष्मपातमार्थनिर्णयफलकत्वमिति पर्यष्कारि। परमपुरुषार्थत्रिवर्गेषु धर्म एवेति तत्र सर्वत्रापि जैमिन्युक्तदिशा धर्मविचार एव क्रियते।

३.१.मीमांसायां प्रमाणानि

धर्माख्यं प्रमेयं विस्तरेण विचारयितुं प्रवृत्ताया मीमांसाया भाट्टप्राभाकरभेदेन द्विविधायाः प्रमाणविषये विद्यते मतभेदः । प्राभाकराः प्रत्यक्षानुमानशब्दोपमानार्थापत्तिभेदेन प्रमाण पञ्चकवादिनः। भाट्टा अभावमपि स्वीकृत्य प्रमाणषट्कमुररीकुर्वते। तदुक्तम् -

प्रत्यक्षमनुमानं च शाब्दं चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः।।

३.२.धर्मप्रमाणानि

धर्मप्रमाणानां विषये विवरणेनापि मीमांसायाश्चारितार्थ्येऽपि प्रसङ्गात् प्रमाणानां लौकिकानां

In Public domain. Digitization Muthulakshmi Research Academy

विषये कथनम् । अष्टौ धर्मप्रमाणानि - विधिः अर्थवादः मन्त्रः स्मृतिः आचारः नामधेयम् वाक्यशेषः सामर्थ्यश्चेति। सर्वाणीमानि वेदावलम्बीनि । अतो वेदप्रामाण्यप्रतिपादनमात्रेणापि मीमांसायाः प्रयोजनं सिध्यति। किन्तु वेद एव धर्मे प्रमाणम्, तदन्यत् प्रमाणं नेति तुं सर्वेषां प्रमाणानां, धर्मलक्षणस्य च विवरणमपेक्षितम् । तदित्थम् -

३.३.धर्मलक्षणम्

'चोदनालक्षणोऽर्थो धर्मः' इत्यत्र जिज्ञासाधिकरणे कर्तव्यत्वेन प्रतिज्ञातो धर्मविचारो विषयः। स कर्तव्यो न वेति संशयः। अलौकिके धर्मे लक्षणप्रमाणयोरसम्भवात् विचारो न कर्तव्य इति पूर्वपक्षः । धर्मे लक्षणप्रमाणयोः सम्भवात् विचारः कर्तव्य इति परपक्षः ।

अत्र धर्मो निष्प्रमाणक इति, स प्रत्यक्षादिप्रमाणक इति, स चोदनाप्रमाणक इति त्रयः पक्षाः। उत्तरोत्तरेण पूर्वपूर्वस्य निरासः । लक्षणासम्भवात् धर्मो निष्प्रमाणक इति वक्तव्यम् । जैमिनिना चोदनालक्षणो धर्म इति कथिते, एकयैवोक्त्या निष्प्रमाणकत्वप्रत्यक्षादिप्रमाणकत्वपक्षयोरुभयोरपि निरासः । चोदनाप्रमाणकत्वपक्षमात्रमवशिष्यते ।

चोदनालक्षणा इत्यत्र द्वेधा विग्रहः। चोदनैव लक्षणं प्रमाणं यस्य, चोदना लक्षणमेव यस्येति। तत्र चोदनैव लक्षणं यस्येति विग्रहेण चोदनाव्यतिरिक्तस्य प्रत्यक्षादेर्धर्मे प्रामाण्यं निराक्रियते। चोदना लक्षणमेव यस्येति विग्रहेण चोदनाया अप्रामाण्यशङ्का निराक्रियते । तथा च धर्मस्य चोदना-प्रमाणकत्वेन लक्षणप्रमाणयोः सम्भवाद् धर्मविचारः कर्तव्यः इति सिध्यति ।

३.४.चोदनाशब्दार्थः

चोदनाशब्दस्यार्थो भाष्यकारैः, क्रियायाः प्रवर्तकं वचनमिति, विवृतः । प्रयाजादीति-कर्तव्यताकयागादिक्रियाप्रवृत्त्यनुकूलव्यापाराख्यप्रवर्तनाबोधकलिङादिप्रत्ययघटितवचनं चोदना । तदुक्तम् -

किमाद्यपेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ ।
तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिन् चोदनोच्यते ।।

३.५ स्वतः प्रामाण्यम्

ननु वेदः पौरुषेयोऽपौरुषेयो वा । नाद्यः, सुगतादिवाक्यवत् तस्याप्रामाण्यापत्तेः । न द्वितीयः तस्याप्तोच्चरितत्वाभावेऽप्रामाण्यापत्तेः । अतो वेदैकदेशभूतचोदना न प्रमाणमिति शाङ्कायाम्, मीमांसको ज्ञानानां स्वतः प्रामाण्यं स्थापयति । ज्ञानस्य प्रामाण्यमप्रामाण्यं च स्वत एवेति सांख्याः ।

In Public domain. Digitization Muthulakshmi Research Academy

उभयमपि कारणदोषादिनेति तार्किकाः । अप्रामाण्यं स्वतः, प्रामाण्यं परत इति सौगताः । प्रामाण्यं स्वतः, अप्रामाण्यं परत इति मीमांसकाः । तदुक्तं वार्तिके -

स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते ।।

तथा च ज्ञानप्रामाण्यस्य स्वतस्त्वात् प्रामाण्यकारणं नापेक्ष्यते । अप्रामाण्यमेव तु कारणाधीनम् । तच्च कारणं ज्ञानानुत्पत्तिः, उत्पन्नस्य ज्ञानस्य संशयात्मकता, उत्तरकाले बाधकप्रत्ययान्तरोत्पत्तिः, करणे दोषवत्ताज्ञानं च । प्रकृते वेदस्य कर्तृस्मरणाभावादियुक्तिनिचयेनापौरुषेयत्वस्य स्थापयिष्यमाणत्वात् न करणदोषज्ञानम् । नापि वेदवाक्यं संशयात्मकं ज्ञानमुत्पादयति । नापि वेदवाक्यजन्यज्ञानस्य बाधकज्ञानं कदाचित् कस्यचिज्जायते । न वा ज्ञानमेव नोत्पद्यते । अतोऽप्रामाण्यकारणत्वेन सम्भावितानां मध्ये कस्याप्यनुपलम्भात् अप्रामाण्यशाङ्कायाः दूरापास्तत्वेन स्वतः प्रामाण्यं निरपवादं तिष्ठति।

३.६.चोदनाप्रामाण्यपरीक्षा

एवं चोदनानिमित्तकं धर्मस्य ज्ञानमिति प्रतिज्ञामात्रेणोक्तम्, न तु युक्तिभिः साधितम्। किं चोदनैव निमित्तम्, उतान्यदपि निमित्तमस्ति, उत नेत्येवं परीक्षणं प्रतिज्ञायते तस्य निमित्तपरीष्टिः इति सूत्रेण ।

तत्र प्रत्यक्षादीनां प्रामाण्यं लोकसिद्धमिति तेषामपि धर्मज्ञानं प्रति निमित्तत्वं भवितुमर्हति। अतश्चोदनैव प्रमाणमिति चोदनासूत्रेण प्रदर्शिता प्रतिज्ञा नोपपद्यते इत्याक्षेपे प्राप्ते, धर्मज्ञानं प्रति प्रत्यक्षमनिमित्तमिति दर्शयति भगवान् सूत्रकारः ।

४. प्रत्यक्षप्रमाणम्

'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्' इति सूत्रम् । अत्र प्रत्यक्षं लक्षयित्वा तस्य धर्मं प्रत्यनिमित्तत्वं प्रदर्श्यते । इन्द्रियाणामर्थेन साकं सम्बन्धे विद्यमाने पुरुषस्य या बुद्धिः जायते तत् प्रत्यक्षम् । यतस्तत् तत्सम्प्रयोगजमतस्तस्य विद्यमानोपलम्भनत्वम् । तथा च प्रत्यक्षं अनिमित्तं विद्यमानोपलम्भनत्वात् इति ज्ञेयम् ।

५. वृत्तिकारमतम्

एवं भाष्यकारस्य श्रीशवरस्वामिनो मतं विवृतम् । किन्तु वृत्तिकारेणोपवर्षाख्येनान्यथा व्याख्यातम् । भाष्यकारः प्रमाणपरीक्षामुक्तवान्, किन्तु वृत्तिकारस्तदपरीक्षां प्रतिजानाति। यथा

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षादीनि न परीक्ष्यन्ते, तथा तदन्तर्गतं शास्त्रमपि न परीक्ष्यते । यदि प्रामाण्यपरीक्षा कारणान्तरेण क्रियते, तर्हि तदपि कारणान्तरेण परीक्ष्यम्, तदपि तथेत्यनवस्था। तस्मात् प्रामाण्यस्य स्वतस्त्वावश्यकत्वात् प्रत्यक्षादिवच्चोदना प्रमाणमेवेति परीक्षा न कर्तव्या।

ननु प्रत्यक्षादीनि परीक्ष्याणि, व्यभिचारात्। शुक्तिकायामिदं रजतमिति जायमानस्य प्रत्यक्षस्य प्रामाण्यव्यभिचारित्वात् तन्मूलकानामनुमानादीनामपि प्रामाण्यं व्यभिचरेदेव। अतोऽपरीक्ष्यैव प्रवर्तमानो निःश्रेयसाद् विहन्येत, अनर्थं च प्राप्नुयाद् इति प्रत्यक्षादिकं परीक्ष्यमेवेति प्राप्ते,

उच्यते। रजतं दृष्ट्वा रजतमिति जायमानं प्रत्यक्षं न व्यभिचरति । यत्तु शुक्तिं दृष्ट्वा रजतमिति ज्ञानं तत् प्रत्यक्षमिति नोच्यते । अयथार्थज्ञानं तत् प्रत्यक्षाभास इत्युच्यते । अतः प्रत्यक्षादिकं न परीक्ष्यम् इति वृत्तिकारः ।

५.१.प्रत्यक्षलक्षणम्

आभासासङ्कीर्णं प्रत्यक्षलक्षणं प्रतिपादयितुं सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् इति प्रत्यक्षसूत्रं प्रवृत्तम् । यद्विषयं ज्ञानमुत्पद्यते, इन्द्रियाणां तेनैव विषयेण सम्प्रयोगे पुरुषस्य या बुद्धिर्जायते, तत् सत्प्रत्यक्षमिति ज्ञेयम् । अन्यसम्प्रयोगे सति, अन्यविषयकं यज्ज्ञानमुत्पद्यते, न तत् प्रत्यक्षम् । यद्विषयकज्ञानं तदन्यसम्प्रयोगे न जायते, तत् तत्सम्प्रयोगजन्यम्, विपरीतमन्यत् ।

शुक्तौ रजतं पश्यताऽपि रजतसम्प्रयुक्तं मे चक्षुरित्येव चिन्त्यते । अतस्तत्सम्प्रयोगस्यातत्सम्प्रयोगस्य च विवेको न भवेत् कदापि कस्यापीति शङ्कायामिदं समाधानम् -

यत्र पूर्वज्ञानानन्तरं न तदेवं, किन्तु मिथ्याज्ञानमिति बाधकं ज्ञानान्तरमुत्पद्यते, तत्र पूर्वविज्ञानमन्यसम्प्रयोगजम्। यत्र तु न तथा, तत् तत्सम्प्रयोगजमिति ज्ञेयम् । यत्रोत्तरकालं बाधकं ज्ञानान्तरं नोत्पद्यते, तत्र पूर्वज्ञाने मिथ्यात्वं करणदोषादिना ज्ञेयम्। तदुक्तम् - यस्य च दुष्टं करणम्, यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययो नान्यः।

५.२.अनुमानम्

अत्र स्वाभाविकः सम्बन्धो व्याप्तिरित्युक्त्वा तद्विवरणायोपाधिलक्षणमुक्तम् । साध्य समव्याप्तत्वे सति साधनाव्यापकत्वमुपाधिः। अत्र गुरवः सकृद्दर्शनेन व्याप्तिर्गम्यत इत्याहुः। तर्कलक्षणम्, तर्काङ्गपञ्चकम्, आत्माश्रयादयो दोषाः इत्यादीन् विवृत्य, व्याघातावधिराश इति न्यायमतं निरस्यते। सौगतान् चार्वाकान्निरस्य प्राभाकरोक्तगृहीतग्राहिता निराक्रियते। अनुमानस्य द्वैविध्यं त्रैविध्यं वेत्युक्त्वा

In Public domain. Digitization Muthulakshmi Research Academy

व्यतिरेकिणं कौमारिला नेच्छन्तीति प्रदर्श्यते । व्यतिरेकिणि चिदानन्दमतं भिद्यते। प्रकारान्तरेणानुमानस्य द्वैविध्यमुक्त्वा, परार्थानुमानस्थले पञ्चावयवान् निरस्य त्र्यवयवाः स्वीक्रियन्ते । सौगतास्तु द्व्यवयववादिनः।

ज्ञातविशेषणः बाधितविशेषणः अप्रतीतविशेषणोति प्रतिज्ञाभासाः । तत्र बांधित विशेषणौ बाधकप्रमाण भेदेन षट्प्रकारः । असिद्धः विरुद्धः अनैकान्तिकः असाधारणश्चेति चत्वारो हेत्वाभासाः। दृष्टान्ताभासो द्विविधः साधर्म्यवैधर्म्यभेदात्। तत्राद्यः साध्यहीनः साधनहीनः उभयहीनः आश्रयहीनश्चेति चतुर्विधः । वैधर्म्येऽपीमे भेदाः।

५.३.शब्दः

व्युत्पत्तिप्रकारः प्रकरणेऽत्र प्रदर्श्यते । अन्विताभिधानं निरस्य अभिहितान्वयः स्वीक्रियते। आकाङ्क्षा योग्यता संनिधिश्चेति त्रीणि सहकारिकारणानि । तात्पर्यमपि चतुर्थं केचिदिति वेदान्तपरिभाषाकारः । पौरुषेयापौरुषेयभेदात् शब्दो द्विविधः इति मीमांसकाः । वैदिकशब्द एव शब्दप्रमाणमिति गुरवः।

५.४.उपमानम्

गवि गवयसादृश्यज्ञानमुपमितिः । तार्किकोक्तमुपमानं मीमांसकैर्निराक्रियते ।

५.५.अर्थापत्तिः

अविरोधापादनमर्थापत्तिः । तस्या अनुमाने नान्तर्भावः । दृष्टश्रुतभेदेन सा द्विविधा । गुरुमते तु द्वैविध्यं न स्वीक्रियते ।

५.६.अनुपलब्धिः

अनुपलम्भः सत्तामात्रेण बोधकः। प्रमाण-स्मरणभेदेनानुपलम्भो द्विविधः। अभावः प्रत्यक्ष इति तार्किकाः। अभावोऽधिकरणात्मक इति प्राभाकराः।

प्रमाणषट्कव्यतिरेकेण सम्भवः ऐतिह्यम् इत्यादि नाङ्गीक्रियते मीमांसकैः। तत्र रामायणमप्युल्लिख्यते ।

६.उपसंहारः

एवं सङ्क्षेपेण मीमांसकसम्मतप्रमाणविचारः प्रकरणाद्यनुरोधेन दर्शितः । अस्य विस्तरस्तु वार्तिके विद्यते । सूरिभिस्तत्र पराक्रान्तमित्युपरम्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

अद्वैतवेदान्तशास्त्रे प्रत्यक्षविचारः

(वेदान्तपरिभाषानुसारेण)

डा. श्रिष्टि लक्ष्मीकुमारशर्मा

अद्वैतवेदान्तिभिः प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिभेदेन षट् प्रमाणान्यभ्युपगतानि प्रमेयसाधकतया। तत्र तार्किकैरिव 'प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम्'[1] इत्येव प्रत्यक्षप्रमाणलक्षणमुक्तं वेदान्तिभिः। प्रत्यक्षप्रमायाः अतिरिक्तलक्षणाऽभावे प्रत्यक्षप्रमाणजन्यज्ञानरूपत्वे तत्प्रमा, तत्प्रमाणयोः परस्पराश्रयत्वप्रसङ्गः। अतः प्रत्यक्षप्रमाणलक्षणज्ञानाय प्रत्यक्षप्रमालक्षणमवश्यं निरूपणीयम्। तत्र न्यायसूत्रकाराः "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्"[2] इति प्रत्यक्षज्ञानस्य लक्षणं प्रत्यपीपदन्। तत्र च अनुमित्यादावतिव्याप्तिवारणाय इन्द्रियार्थसन्निकर्षजन्यमिति। इच्छादौ अतिव्याप्तिवारणाय ज्ञानमिति। रूपमिति ज्ञानं रस इति ज्ञानमिति शब्दतादात्म्यापन्नार्थविषयकज्ञाने शब्दस्यापि व्यपदेशकर्मत्वेन, तद्वारणायाव्यपदेश्यमिति भ्रमेऽतिव्याप्तिवारणाय अव्यभिचारीति, संशये अतिव्याप्तिवारणाय व्यवसायात्मकमिति दलानां सार्थक्यं न्यायवार्तिके[3] वर्णितम्। एतदनुसारेणैव इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति प्रत्यक्षज्ञानस्य लक्षणं तर्कसङ्ग्रहादौ वर्णितम्। केचित् ज्ञानाकरणकं ज्ञानं प्रत्यक्षं, ज्ञानकरणाजन्यज्ञानं प्रत्यक्षम्, ज्ञानाजन्म ज्ञानं प्रत्यक्षम्[4] इति प्रत्यक्षप्रमायाः लक्षणं वर्णयन्ति। तत्र अनुभवस्य संस्कारं जनयित्वा उपरतत्वपक्षे स्मृतिं प्रत्यकारणत्वात्, स्मृतौ संस्काररूपैक-कारणत्वात् स्मृतौ ज्ञानाकरणकज्ञानत्वस्य, ज्ञानाजन्यज्ञानत्वस्य च सत्वेन तत्र अतिप्रसङ्गः। सविकल्पक-प्रत्यक्षे विशेषणज्ञानजन्यत्वस्य सत्वेनाऽव्याप्तिः। ज्ञायमानलिङ्गस्य अनुमितिकरणत्ववादिमते अनुमितेः लिङ्गजन्यत्वेन ज्ञानकरणाजन्यत्वात् तत्राऽतिव्याप्तिः। अतः एतेषां प्रत्यक्षप्रमालक्षणत्वमयुक्तम्। इन्द्रियार्थसन्निकर्षजन्यत्वन्तु ईश्वरीयज्ञाने अव्याप्तम्, अनुमित्यादौ पर्वतादेरपि ज्ञानस्य इन्द्रियार्थसन्निकर्ष-जन्यत्वेन तत्र अतिव्याप्तम्। अतः का नाम प्रत्यक्षप्रमा इति सुदृढमेव विचारणीयमिति प्रत्यक्षप्रमायाः विचारः वेदान्तपरिभाषादिग्रन्थेषु प्रवर्तितः। तदिह वेदान्तपरिभाषाग्रन्थानुसारेण तत्र तद्व्याख्यानुसारेण च केचित् प्रत्यक्षविचारसम्बन्धिनः विषयाः प्रस्तोतुमिष्यन्ते। तत्र वेदान्तिनां प्रत्यक्षप्रमालक्षणमेव व्याख्यातव्यम्। किन्तु वेदान्तिनां नैयायिकादीनाञ्च केषुचिद्विषयेषु मतभेदानां सद्भावात् वेदान्तिभिः असाधारणतया प्रतिपाद्यमानाः प्रत्यक्षविचारसम्बद्धाः विषयाः केचित् प्राधान्येन प्रस्तूयन्ते।

वेदान्तिनां प्रत्यक्षविचारसम्बद्धाः असाधारणविषयाः -

उपाचार्यः, संस्कृतविभागः, श्रीगोरंट्ल वेङ्कन्नप्राच्यकलाशाला, तिम्मसमुद्रम्, प्रकाशंजिल्ला, आन्ध्रप्रदेशः ।

In Public domain. Digitization Muthulakshmi Research Academy

१. प्रत्यक्षप्रमा चात्र चैतन्यमेव ''यत्साक्षादपरोक्षात् इति श्रुतेः''[५] इत्युक्तत्वात् श्रुत्यनुसारेण प्रकृतः वेदान्तिनां प्रत्यक्षविचारः। तार्किकास्तु जडस्याऽपि ज्ञानवत्वेन अजडात्मधर्मस्य इन्द्रियार्थसन्निकर्षोत्पन्नस्य ज्ञानस्य प्रत्यक्षत्वम् अथवा प्रत्यक्षप्रमारूपत्वमाशेरते । वेदान्तिनस्तु केवलं वृत्तेः जडत्वात् ''कामः सङ्कल्पः'' इत्यादि श्रुतौ धीशब्दशब्दितायाः अन्तःकरणवृत्तेः केवलायाः प्रमात्वमस्वीकृत्य वृत्तिप्रतिबिम्बित-चैतन्यस्य प्रमात्वं प्रतिपादयन्ति। अत एव ''अन्तःकरणवृत्तौ ज्ञानत्वोपचारात्'' इत्युक्तं विवरणे।[६]

२. तार्किकाः मनः अणु पञ्चभूतादिविलक्षणं नित्यं निरवयं वर्णयन्ति। वेदान्तिनस्तु अन्तः करणं मनः सावयवं सादिद्रव्यत्वहेतुना अनुमिमते । सादिद्रव्यत्वं च 'तन्मनो सृजत' इति श्रुतिसिद्धम्। अतो न हेत्वप्रसिद्धिः। तार्किकमते मनः निरवयत्वेन अपरिणामि। अत एव ते चित्तवृत्तेः ज्ञानत्वमनभ्युपगम्य आत्मधर्मत्वमेव तस्याभ्युपगच्छन्ति। वेदान्तिनां मनस्सृष्टेः श्रुतिसिद्धत्वेन अन्तःकरणस्य सादित्वेन, सावयवत्वात् अन्तःकरणस्य परिणामशीलत्वात् तत्परिणामस्य वृत्तेः विरलतेजोवयवरूपत्वेन अतिस्वच्छतमचैतन्यप्रतिबिम्बोद्ग्राहित्वात् वृत्तिप्रतिबिम्बितचैतन्यस्य ज्ञानत्वम्।[७] तस्यैव अबाधित-विषयकत्वे प्रमात्वं च निर्बाधम्।

३. वेदान्तिमते मनसः इन्द्रियत्वं नास्ति। मनसः इन्द्रियत्वप्रतिपादकश्रुतिस्मृत्यनुभवानामभावात्। 'मनष्षष्ठाणीन्द्रियाणि' इति स्मृतेः सद्भावेऽपि तस्याः इन्द्रियगतषट्त्वसंख्यापूरकत्वे प्रामाण्येऽपि इन्द्रियत्वेऽप्रामाण्यात्। मनसः इन्द्रियत्वाभावेऽपि 'यजमानपञ्चमा इडां भक्षयन्ति' इत्यादौ अनृत्विजो यजमानस्य पञ्चत्वसंख्यापूरकत्वस्येव इन्द्रियगतषट्त्वसंख्यापूरकत्वस्य हेतोः सद्भावेऽपि बाधकाभावात्। अतश्च मनोगतमिन्द्रियत्वं स्मार्तं, 'नक्षत्राणामहं शशी' इतिवत् अप्रामाणिकमेव। नैयायिकास्तु 'मनः इन्द्रियं ज्ञानकरणत्वात् चक्षुर्वत्' इति अनुमानेन इन्द्रियत्वं साधयन्ति। किन्तु 'इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः' इति कठश्रुतौ चकार बलात् ''मनस्सर्वेन्द्रियाणि च'' इति मुण्डकश्रुतेश्च मनसः अनिन्द्रियत्वम्।[८] एवं च वेदान्तिमते मनो विहाय चक्षुरादेरेव प्रत्यक्षप्रमाकरणत्वम्। ततश्च अन्तःकरणस्य अनिन्द्रियत्वे 'अह'मित्यादिप्रत्यये अहङ्कारमिश्रात्मनः कथं प्रत्यक्षता। अहङ्कारस्य = मनसः इन्द्रियत्वे-नाऽतीन्द्रियत्वात् इति शङ्का, मनसः अनिन्द्रियत्वेनैव समाधानं च सङ्गच्छेयाताम्।[९]

४. लोके प्रत्यक्षपदस्य ज्ञाने, विषये, प्रमाणे च प्रयोगात् ज्ञाननिष्ठप्रत्यक्षत्वे प्रयोजकं, विषयनिष्ठप्रत्यक्षत्वे प्रयोजकं च अनिरूप्य प्रत्यक्षप्रमाणनिरूपणं क्लिष्टमित्याशयेन वेदान्तिनः पृथक्प्रयोजकं सङ्गिरन्ते। प्रमाणचैतन्ये विषयावच्छिन्नचैतन्याऽभेदः, घटादौ विषये प्रमात्रभेदश्च इति तार्किकादिविलक्षणतया वेदान्तिभिरेव नूतनतया व्यवस्थापितम्।[१०] युक्तम् चैतत्। अनुमित्यादिभ्यः अपामारं प्रकटतातिशयशालिनि

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षज्ञाने विषयचैतन्याभेदमन्तरा न तत्र (प्रत्यक्षज्ञाने) प्राकट्यं सम्भवति, तथा विषये प्रमात्रभेदमन्तरा न प्रत्यक्षविषये प्राकट्यं सिद्ध्यत्यनुमेयादिविलक्षणतया। अतः इदमपि वेदान्तिमते असाधारणतया परिगणनीयम्।

५. किञ्च सुरभिचन्दनमिति अलौकिकचाक्षुषं प्रत्यक्षमिति तार्किकाः। चन्दनांशस्य दूरतः चक्षुषा भानेऽपि सौरभांशे घ्राणेन सन्निकर्षाभावात् ज्ञानलक्षणया सौरभस्य भानमिति, अलौकिकसन्निकर्षात् लौकिकचाक्षुषसन्निकर्षाच्च अलौकिकसौरभविषयकं प्रत्यक्षजातीयं चाक्षुषमेव जायते इति ते अभ्युपगच्छन्ति। परं वेदान्तिनः सौरभांशे परोक्षवृत्तिं चन्दनांशे चाक्षुषवृत्तिश्च स्वीकृत्य उभयविधवृत्त्यवच्छिन्नचैतन्यस्य सत्वात् विशिष्टज्ञानत्वं समर्थयन्ति।[११]

६. एकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोः अभ्युपगमे तयोः जातित्वं साङ्कर्यात् न स्यात् इति शङ्कायां, जातित्वोपधित्वपरिभाषायाः सकलप्रमाणागोचरतया तयोः जातित्वाभावं वेदान्तिनः इष्टापत्तिविषयं मन्यन्ते। समवायासिद्ध्या ब्रह्मभिन्नसकलप्रपञ्चस्य अनित्यतया च नित्यत्व समवेतत्वघटितजातिलक्षणस्य असम्भवं च मन्यन्ते।[१२]

७. शुक्तिरजतादौ भ्रमे देशान्तरीयरजतस्य उपस्थापनाय नैयायिकाः ज्ञानलक्षणाप्रत्यासत्तिं स्वीकुर्वन्ति। किन्तु वेदान्तिनः ज्ञानस्य प्रत्यासत्तित्वे तत एव अनुमेयत्वाभिमतवह्न्यादेः प्रत्यक्षत्वापत्तौ अनुमानाद्युच्छेदापत्तिः इति दूषयित्वा तादृशभ्रमस्य अनिर्वचनीयरजतादिविषयकत्वं वर्णयन्ति।[१३]

८. प्राभाकरमते इदं रजतमिति भ्रमे इदमिति एका अनुभवात्मिका वृत्तिः रजतमिति स्मरणात्मिका वृत्तिः इति वृत्तिद्वयम्। वेदान्तिमते तु वृत्तिद्वयप्रतिबिम्बितस्य चैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्वीकारात् प्रवर्तकैकज्ञानोपपत्तिः।[१४]

९. किञ्च नैयायिकैः सविकल्पकं निर्विकल्पकं चेति प्रत्यक्षं द्वेधा विभक्तम्। किन्तु नैयायिकाभिमतं सविकल्पकं विशिष्टवैशिष्ट्यावगाहि विशेषणज्ञानजन्यञ्च। वेदान्त्यभिमतं सविकल्पकं तु विशिष्टवैशिष्ट्यावगाह्येव, न विशेषणज्ञानजन्यम्, उक्तमते विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणतायाः अनभ्युपगमात्।[१५] अयं गौः इति प्रत्यक्षस्थले गोत्वगवोः एकेन्द्रियग्राह्यत्वेन सकृत् वृत्तिद्वयस्य चैतन्ये प्रतिफलनात्। भिन्नेन्द्रियसन्निकर्षाभ्यां वृत्तिद्वयजननेऽपि सकृत् चैतन्यांशे वृत्तिद्वयप्रतिफलनात् विशिष्टैकज्ञानसम्भवात्। निर्विकल्पकज्ञानमपि न तार्किकोक्त दिशा प्रकारताविशेष्यतासंसर्गताशून्यज्ञानम्। किन्तु वेदान्तिमते संसार्गानवगाहिज्ञानम्, शब्दजन्यं प्रमात्मकसन्निहितवस्तुविषयकं च। एवञ्च तत्त्वमसीत्यादौ तत्त्वपदलक्ष्यार्थभूत अखण्डचैतन्यरूपाश्रयविषयकम्, सोऽयं देवदत्तः देवदत्तस्वरूपाऽभेदविषयकप्रमात्मकं

In Public domain. Digitization Muthulakshmi Research Academy

तस्यैवापरोक्षभ्रमनिवर्तकत्वात्। शब्दजत्वेन तस्य ज्ञानस्य तात्पर्यविषयकत्वम्, प्रत्यक्षत्वेन सन्निहितार्थ-विषयकत्वं च सिद्ध्यति।

१०. 'तत्त्वमसि' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि महावाक्यलक्षणवाक्यानामखण्डार्थप्रतिपादकत्वम्।

११. जीवसाक्षिप्रत्यक्षम्, ईश्वरसाक्षिप्रत्यक्षम्।

१२. भ्रमप्रक्रियोपपादकप्रयोजकानि।

तदिह प्रधानतया विचारणीयेषु प्रत्यक्षप्रमाणलक्षणनिरूपणाय मुख्यतया ज्ञानगतप्रत्यक्षत्व-प्रयोजकस्य, विषयगतप्रत्यक्षत्वप्रयोजकस्य भ्रमप्रमासाधारणस्य निरूपणं कर्तव्यम्। ततः प्राक् वेदान्तिमतानुसारेण प्रत्यक्षप्रमालक्षणं च निरूपणीयम्। अतः तदेव आदौ विधीयते।

प्रत्यक्षप्रमालक्षणम्

'प्रत्यक्षप्रमा चाऽत्र चैतन्यमेव' (पृ.३५) इति वेदान्तपरिभाषा वचनम्। प्रत्यक्षत्वम् अथवा साक्षात्त्वं जातिरूपमिति वक्तुं न शक्यते। तादृशजातेः 'पर्वतो वह्निमान्' इत्याद्यनुमितौ सन्निहितपर्वतांशे तार्किकमते अभावेन अव्याप्तेः। वेदान्तिमते च जडेषु वृत्तिषु ज्ञानत्वाभावेन ज्ञानस्वरूपस्य ब्रह्मणः एकत्वेन तद्वृत्तिसाक्षात्वे 'एकव्यक्तिमात्रवृत्तिस्तु न जातिः' इति जातिबाधकसद्भावेन प्रत्यक्षत्वस्य जातित्वं न युज्यते। किञ्च निश्चयत्वाऽभाववति प्रत्यक्षसंशये साक्षात्वम्, साक्षात्वाभाववति अनुमित्यादौ निश्चयत्वं, द्वयोस्तु साङ्कर्यं प्रत्यक्षात्मकनिश्चये अस्तीति साक्षात्वस्य सङ्करग्रस्तत्वेन जातित्वायोगात्। अतः प्रत्यक्षप्रमास्वरूपं दुर्निरूपमिति चेत् 'चैतन्यमेव प्रत्यक्षप्रमेत्युक्तम्।'[१६] एवं च प्रत्यक्षत्वस्य जातित्वेन उपाधित्वेन वा अस्वीकारात्, अनुमित्यादावपि पर्वतांशे, ज्ञानस्य स्वांशे - ज्ञानांशे प्रत्यक्षत्व-स्वीकारात् नाऽव्याप्तिः। वह्न्यंशे तु परोक्षवृत्यभिव्यक्तचैतन्यस्यैव सत्त्वात्, तत्र चैतन्यस्य परोक्षवृत्तिमात्र-व्यक्तत्वेन, प्रमाणचैतन्यभिन्नत्वाभावेन वृत्तिनिर्गमाऽभावेन वृत्यवच्छिन्नचैतन्याभिन्नत्वाभावात् नातिप्रसङ्गः। एवमन्तःकरणवृत्यवच्छिन्नं चैतन्यं भ्रमप्रमासाधारणं प्रत्यक्षज्ञानम्। तदेव अबाधितविषयकं सत् प्रत्यक्षप्रमेत्युच्यते।

नन्वेवं मनसः इन्द्रियत्वग्राहकप्रमाणाभावेन अनिन्द्रियत्वे सुखादिज्ञानस्य इन्द्रियजन्यत्वाभावेन तस्य साक्षात्कारत्वं न स्यात् । नहि इन्द्रियजन्यत्वं प्रत्यक्षत्वे प्रयोजकम्। इन्द्रियजन्यत्वस्यैव प्रत्यक्ष-प्रयोजकत्वे अनुमित्यादेरपि ज्ञानस्य परमते मनोरूपेन्द्रियजन्यतया प्रत्यक्षत्वापत्तेः। ईश्वरज्ञानस्य इन्द्रियाजन्यत्वेन साक्षात्वानापत्तेश्च। तर्हि वेदान्त्यभिमतं प्रत्यक्षत्वप्रयोजकं किमित्युक्ते परिभाषाकारैः ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकम् अथवा विषयगतस्य प्रत्यक्षत्वस्य प्रयोजकमिति शिष्यं पृष्ट्वा[१७] ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं प्रत्यक्षप्रमाणनिर्णयोपयोगितया एवमभ्यधायि।

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानगतप्रत्यक्षत्वप्रयोजकम् 'प्रमाणचैतन्यस्य विषयचैतन्याभेदः' (पृ.४७) इति। तथाहि "सर्वगतं चैतन्यं विषयेण, प्रमाणेन-प्रमया-वृत्या, ज्ञानाश्रयेण प्रमात्रा च व्याप्तं भवति।" तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्। अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्। अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्।[१८] तत्र अन्तःकरणस्य अणुत्वे प्रणष्टक्रियाश्रयस्य तस्य दूरवर्तिध्रुवादिदेशपर्यन्तं गमने तदवच्छिन्नस्य जीवस्याऽपि गतत्वेन निर्जीवत्वापत्या, विभुत्वे निष्क्रियत्त्वापत्या च अन्तःकरणं मध्यमपरिमाणवत् इत्यास्थेयम्। अथापि देहवन्मन्दगामित्वे तस्य झटिति चैतन्यप्रतिफलकत्वाभावात् विषयावभासानुपपत्तिः। अतः अन्तःकरणस्य तेजो रूपद्रव्यत्वमास्थेयम्। तस्य च अन्तरवस्थितत्वेन स्वतः बहिर्निर्गमनाभावेन विषयदेशव्यापिनीं परिणामात्मिकां वृत्तिं विना प्रत्यक्षोत्पादनत्वाप्रसक्तौ चक्षुरादिद्वारा तत्साधनीयम्।[१९] यथाहि तटाकोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य चतुष्कोणाद्याकारं भजते, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। सः परिणाम एव वृत्तिरित्युच्यते।[२०] एवं च पूर्वोक्तरीत्या घटादिः तदाकारवृत्तिश्च बहिरेकत्र देशे समवहिते। अतः तदुभयावच्छिन्नं चैतन्यं = विषयवृत्युपहितं चैतन्यं एकमेव। न च घटाद्याकारवृत्तेः घटस्य च चैतन्यं प्रति उपाधित्वे तयोरुपाध्योः भिन्नत्वेन उपधेययोः वृत्तिघटात्मकविषयोपहितचैतन्ययोरपि भिन्नत्वात् वृत्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः' इति ज्ञानगतं प्रत्यक्षत्वं कथं सङ्गच्छत इति वाच्यम्। भेदजनकयोरप्युपाध्योः भिन्नदेशस्थत्व एव उपधेयभेदसम्पादकत्वात्। उपाध्योरेकदेशस्थयोः उपधेयभेदासम्पादकत्वात्।[२१] अत एव मठावच्छिन्नघटावच्छिन्नाकाशयोः परस्परं भिन्नत्वेऽपि मठान्तर्वर्ति घटावच्छिन्नाकाशः मठावच्छिन्नाकाशात् न भिद्यते इति साधु मूले उक्तम्।[२२] तत्र मठघटात्मकोपाध्योरेकदेशस्थत्वात्। एवं च पूर्वोक्तन्यायेन घटाकारवृत्युपहितचैतन्ये घटादिविषयचैतन्याभेदोऽस्तीति ज्ञानगतप्रत्यक्षत्वप्रयोजकसमन्वयः। ततश्च अयं घटः इति प्रतीतौ घटाकारांशे ज्ञानस्य साक्षात्त्वं सिध्यति।

'अहं सुखी'त्यादिप्रत्यक्षे सुखाकारवृत्युपहितचैतन्यस्य सुखाद्यवच्छिन्नचैतन्याऽभिन्नत्वात् सुखांशे तादृशज्ञानस्य प्रत्यक्षत्वम्।

'पर्वतो वह्निमान्' इत्यादौ वह्न्यनुमितौ अन्तःकरणस्य चक्षुराद्यसन्निकर्षात् बहिर्निर्गमनाभावेन वह्निविषयिण्याः परोक्षवृत्तेः अन्तःकरणदेशस्थत्वेन, दूरवर्तिवह्निदेशगमनाभावात् विषयतद्विषयवृत्योः उपाध्योः एकदेशस्थात्वाभावेन अन्तःकरणवृत्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्याभेदाभावेन वह्न्यंशे ज्ञानस्य नास्त्यपरोक्षत्वम्।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिन्नेव ज्ञाने पर्वतांशे तदाकारायाः अपरोक्षवृत्तेरभ्युपगमात् वृत्यवच्छिन्नविषयावच्छिन्न-चैतन्ययोरभेदेन पर्वतांशे पर्वतज्ञानस्य प्रत्यक्षत्वमेव। अनुव्यवसायः पर्वतं पश्यामि वह्निमनुमिनोमीत्येव दृश्यते। 'पक्षः साध्यवान्' इति पूर्णज्ञानस्य अनुमितित्ववादि तार्किकमते तु पर्वतमनुमिनोमीति अनु-व्यवसायापत्तिः।[२३]

नन्वेवम् 'अहं पूर्वं सुखी आसम्' इत्यतीतसुखस्मृतौ सुखतदाकारवृत्योः अनुभववेलायामन्तः-करणात्मकैकदेशवृत्तित्वेन तदवच्छिन्नचैतन्ययोरभेदजनकत्वात् स्मृतौ प्रत्यक्षप्रमालक्षणस्य अतिव्याप्तिः स्यात्। अतः उपाध्योरेकदेशस्थत्वस्येव एककालिकत्वस्याऽपि उपधेयभेदप्रयोजकत्वमास्थेयम्। एवं च सुखाकारवृत्तेः अनुभववेलायां सत्वेऽपि स्मर्यमाणतादशायामभावान्नातिप्रसङ्गः। अथवा प्रमाणचैतन्यस्य वर्तमानविषयाभेदः इति विषये वर्तमानत्वघटितं प्रयोजकमास्थेयम्।[२४]

नन्वेवम् 'अहं पुण्यवान्' इति सुखित्वादिलिङ्गकानुमितौ, त्वं पुण्यवानिति आप्तोक्तशब्दजन्यज्ञाने वा अतिव्याप्तिः। धर्माधर्मयोर्वर्त्तमानत्वेन तदुपहितवृत्तेः अनुमितिरूपायाः शाब्दायाश्च अन्तःकरण-देशस्थत्वेन विषयविषयोपहितवृत्तिचैतन्ययोः अभेदसम्पादकत्वेन धर्माधर्मादिविषयकपरोक्षवृत्तौ धर्माद्यव-च्छिन्नचैतन्याभेदात्। अतः 'प्रमाणचैतन्ये योग्यवर्तमानविषयचैतन्याभेदः' इति प्रयोजकमास्थेयम्। धर्माधर्मादेः नित्यपरोक्षज्ञानविषयत्वस्य स्वभावसिद्धत्वात् तत्र योग्यतायाः अभावात् न तदीयज्ञाने ज्ञानगतप्रत्यक्षत्वप्रयोजकप्रसङ्गः।[२५]

ननु सुखस्य वर्तमानतादशायां 'त्वं सुखी'ति वाक्यजन्यज्ञाने अपरोक्षत्वस्य प्रसङ्ग इति चेन्न, इष्टापत्तेः। 'दशमस्त्वमसी'त्यादाविव तत्र ज्ञाने शब्दजन्ये अपरोक्षत्वस्य इष्टत्वात्।[२६]

नन्वेवमपि घटकारचाक्षुषवृत्तिदशायां चैतन्ये घटाकारवृत्तेः घटस्य इव घटगतपरिमाणस्याऽपि ईश्वरीयमायावृत्तिग्राह्यस्य वर्तमानोपाधित्वेन तेषामेकदेशस्थत्वात् घटकारवृत्यवच्छिन्नचैतन्ये वर्तमान-घटात्मकविषयावच्छिन्नचैतन्याभेदस्येव परिमाणावच्छिन्नचैतन्याऽभेदस्यापि सत्त्वेन तादृशाज्ञानस्य परिमाणांशेऽपि प्रत्यक्षत्वं स्यात्। अतः तदाकारवृत्यवच्छिन्नज्ञानस्य तदिन्द्रिययोग्यवर्तमानविषयाव-च्छिन्नचैतन्याभिन्नत्वं ज्ञानगतप्रत्यक्षत्वप्रयोजकमास्थेयम्। एवञ्च घटाकारमात्रचाक्षुषवृत्तिदशयां परिमाणात्मकविषयस्य ईश्वरीयमायावृत्तियोग्यत्वेपि तदिन्द्रियावेद्यत्वात् तदिन्द्रिययोग्यवर्तमानविषय-चैतन्याऽभिन्नत्वस्य प्रमाणचैतन्येऽभवात् न ज्ञाने परिमाणांशे प्रत्यक्षत्वम्।[२७]

एवमपि चैत्रस्य घटाकारपरोक्षवृत्तिदशायां मैत्रस्याऽपि घटांशे प्रत्यक्षज्ञानापत्तिः। चैत्रीयघटा-कारवृत्त्यवच्छिन्नचैतन्ये मैत्रीयेन्द्रिययोग्यवर्तमानविषयस्याऽप्युपाधित्वेन तादृशविषयावच्छिन्न-

In Public domain. Digitization Muthulakshmi Research Academy

चैतन्याभेदस्य सद्भावात्। अतः तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याऽभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य तत्तदंशे प्रत्यक्षत्वमिति मले परिष्कृतम्।[२८] एवं च यस्य यदिन्द्रियं तदिन्द्रिययोग्यवर्तमानचैतन्याभिन्नत्वस्य विषयतत्तदाकारवृत्त्यवच्छिन्नचैतन्ये सद्भावदशायामेव तस्य तस्य प्रत्यक्षत्वे प्रयोजकत्वात् मैत्रीयघटस्य विषयस्य चैत्रेन्द्रियग्राह्यत्वाभावान्नातिप्रसङ्गः । न वा घटाकारचाक्षुषवृत्तिदशायां घटाकारस्पार्शनप्रसङ्गः। तत्तदिन्द्रियेत्यादि प्रयोजकस्य तत्तदाकारवृत्तिघटितस्याऽभावात्।

नन्वेवमस्य ज्ञानगतप्रत्यक्षत्वप्रयोजकस्य इदं रजतमिति भ्रमात्मकज्ञानेऽव्याप्तिः। पूर्वसिद्धस्य रजतात्मकस्य विषयस्य अभावेन तस्य च तत्तदिन्द्रिययोग्यवर्तमानविषयत्वाभावेन तादृशविषयावच्छिन्नचैतन्याभिन्नत्वस्य रजताकारवृत्त्यवच्छिन्नचैतन्ये अभावात्। न च ज्ञानलक्षणया देशान्तरीयरजतस्य उपस्थितिः। तदङ्गीकारे च अनुमेयवह्नेरपि तत एव भानेन अनुमानप्रमाणोच्छेदापत्तेः। देशान्तरीयरजतस्य भाने तस्य अपरोक्षत्वभङ्गापत्तेः। रजतं साक्षात्करोमीत्यनुव्यवसायविरोधाच्च। न च पुरोवर्त्यनुभवरजतस्मरणयोरेव रजतार्थिप्रवर्तकत्वमिति वाच्यम्। विशिष्टैकज्ञानस्यैव प्रवर्तकत्वात्। तस्मात् इदं रजतमित्यत्र ज्ञाने अपरोक्षत्वसिद्धिः कथमितिचेदुच्यते। इदं रजतमित्यत्र चक्षुसन्निकर्षात् इदमाकारवृत्तौ उत्पन्नायामिदमवच्छिन्नचैतन्ये प्रमातुः लोभवशात्, नेत्रगतकाचादेर्दोषात् च अन्तःकरणे क्षुब्धे शुक्तित्वे अज्ञाते शुक्तित्वप्रकारिका अविद्या इदमवच्छिन्नचैतन्यनिष्ठा तदानीं रजताकारेण रजतज्ञानाकारेण क्रमेण परिणमते।[२९] रजताकाराऽविद्या परिणाम्युपादानम्। इदमवच्छिन्नं चैतन्यं विवर्तोपादनम्।[३०] तत्र रजतं सदसद्विलक्षणत्वेन अनिर्वचनीयम्। प्रतिभासकालमात्रवर्तित्वात् प्रातिभासिकं च। प्रातिभासिकरजतस्य च इदमवच्छिन्नचैतन्यनिष्ठतया, न्यायमते सुखाश्रयतया आत्मनः सुखादिसाक्षत्कारे अवच्छेदकीभूतदेहेनैव, चैतन्यावच्छेदकीभूतेन इदमा रजतादेः तादात्म्यम्। अतः रजतमिदन्त्वेन प्रतिभाति। एतच्च रजतमिदमाकारवृत्त्युपहिते साक्षिणि अध्यस्तमिति तेनैव प्रतिभासः। इदमाकारवृत्तेः यदेव चैतन्यमवभासकं तदैव रजताकाराऽविद्या वृत्तिसहकारेण रजतस्याप्यवभासकम्। ततश्च तदाकारवृत्त्यवच्छिन्नज्ञानस्य रजताकाराऽविद्यावृत्त्यवच्छिन्नज्ञानस्य, इदमाकारान्तःकरणवृत्त्यवच्छिन्नज्ञानस्य च तत्तदिन्द्रिययोग्यवर्तमान इदमात्मकविषयावच्छिन्नचैतन्याभिन्नत्वात् ज्ञानगतप्रत्यक्षत्वप्रयोजकमिति यद्यपि प्रातिभासिकरजतज्ञाने सङ्गमयितुं शक्यते। तत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य इत्येव उक्तत्वात्, तत्तदाकारान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्याऽस्य तदाकराऽविद्यावृत्त्यवच्छिन्नचैतन्यस्य च तत्पदेन ग्रहीतुं शक्यत्वात्। तथापि तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नेत्यादिपूर्वोक्तप्रयोजके इन्द्रियपदस्य सद्भावेन मनसश्च अनिन्द्रियत्वात् सुखादिविषये इन्द्रिययोग्यत्वाभावेन पूर्वोक्तज्ञानगतप्रत्यक्षत्वप्रयोजकस्य सुखादिज्ञानेऽव्याप्तिः।

In Public domain. Digitization Muthulakshmi Research Academy

एवमन्तःकरणतद्धर्मादीनां केवलसाक्षिवेद्यानामिन्द्रिययोग्यविषयत्वाभावेन पूर्वोक्तप्रत्यक्षप्रयोजकस्य तत्र अव्याप्तिः। अतः मूलोक्तं ज्ञानप्रत्यक्षत्वप्रयोजकमन्यथा परिष्कृतं शिखामणिव्याख्यायाम्।[११]

तत्तत्साक्षिजन्यतत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यतत्तत्साक्षिजन्यतत्तदाकारवृत्त्युपहितविषयावच्छिन्नचैतन्याऽभिन्नत्वं तत्तद्विषयांशे प्रत्यक्षत्वम्। एवञ्च घटाकारवृत्तिसाक्षिजन्यघटाकारान्तःकरणवृत्त्यवच्छिन्नचैतन्ये तत्तदिन्द्रिययोग्यचक्षुरिन्द्रिययोग्यतत्साक्षिजन्यतदाकारघटाकारान्तःकरणवृत्त्युपहितविषयावच्छिन्नचैतन्याऽभिन्नत्वस्य सत्त्वात् घटाद्यंशे तत् ज्ञानस्य प्रत्यक्षत्वम्। सुखाद्याकारवृत्त्यवच्छिन्नज्ञाने तु केवलसाक्षियोग्यसुखाकारवृत्त्युपहितसुखात्मकविषयावच्छिन्नचैतन्याभेदस्य सत्त्वात्, सुखज्ञाने सुखांशे प्रत्यक्षत्वं निर्बाधम्। एवं तत्तत्साक्षिवेद्येषु सर्वेषु समन्वयः। रजताकाराऽविद्यावृत्तिसाक्षिजन्यरजताकारवृत्त्यवच्छिन्नचैतन्ये तु तत्साक्षियोग्य इदमाकार ऐन्द्रियकवृत्तिसाक्षिजन्यरजताकारवृत्त्युपहित इदंविषयावच्छिन्नचैतन्याभिन्नत्वस्य सत्वात् रजतभ्रमे रजतांशे प्रत्यक्षत्वोपपत्तिः।

विषयगतप्रत्यक्षत्वप्रयोजकम्

'घटादेर्विषयस्य प्रत्यक्षत्वन्तु प्रमात्रभिन्नत्वम्' (पृ.६५) इति परिभाषाकारवचनम्। पूर्वोक्तज्ञानगतप्रत्यक्षत्वस्य घटादौ विषये अव्याप्तेः पृथक् प्रयोजकान्तरं निरूपितम्। प्रत्यक्षत्वं तु इत्यत्र तु शब्दः लक्षणान्तरव्यावर्तकः। इन्द्रियजन्यज्ञानविषयत्वस्य, स्वजनकेन्द्रियसन्निकर्षाश्रयत्वस्य वा न विषयगतप्रत्यक्षप्रयोजकत्वम् अनुमितेः मनेन्द्रियजन्यत्वेन इन्द्रियजन्यज्ञानविषये परमाण्वादौ अतिव्याप्तेः। अतः विषयस्य प्रमात्रभिन्नत्वमेव विषयप्रत्यक्षत्वम्। यद्यपि प्रमाता इत्युक्ते अन्तःकरणावच्छिन्नचैतन्यम्, तदभेदस्य विषयावच्छिन्नचैतन्य एव सत्वात् प्रमातृचैतन्याभिन्नविषयावच्छिन्नचैतन्यविषयत्वं घटादेः विषयस्य प्रत्यक्षत्वे प्रयोजकमिति वक्तव्यम्। तथापि प्रमातृचैतन्याभेदस्य विषयचैतन्ये सिद्धे विषयचैतन्यावच्छेदकीभूते विषयेऽपि तत् अयत्नसिद्धमिति भावेन विषयस्यापरोक्षत्वं संविदभेदात् - इति (पृ.६५) विवराणोक्ते 'विषयस्य प्रमात्रभेदः' इति सूक्तम्।

ननु 'अहमिदं पश्यामि' इति प्रमातृप्रमेययोः भेदग्राहके अनुभवे सति विषये प्रमात्रभेदः दुर्घटः। कथञ्चिद्विषये प्रमात्रभेदे उपपादितेऽपि 'अहं मनुष्यः' इतिवत् 'अहं घटः' इति प्रतीत्यापत्तेः।[१२] अतः प्रमात्रभेदः विषये सम्यक् निर्वक्तव्यः। प्रमात्रभेदो नाम न तावदैक्यम्। किन्तु विषये प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः । तत्र घटादेः स्वावच्छिन्नचैतन्ये अध्यस्ततया घटादिविषयचैतन्यसत्तैव घटादिसत्ता। अधिष्ठानसत्तातिरिक्तायाः आरोपितसत्तायाः अनङ्गीकारात्। विषयचैतन्यश्च एकदेशस्थोपाधीनां

In Public domain. Digitization Muthulakshmi Research Academy

भेदाजनकत्वमिति पूर्वोक्तनियमानुसारेण प्रमातृचैतन्यमेव भवति। घटस्य घटाकारवृत्तेः अन्तःकरणस्य इति त्रयाणां घटाद्यवच्छिन्नचैतन्यदेशे वर्तमनत्वात्। ननु अन्तःकरणपरिणामात्मकवृत्तेः घटाद्यवच्छिन्न-चैतन्यव्यापित्वस्य चक्षुरादिद्वारा वृत्तिनिर्गमेन उपपन्नत्वेऽपि अन्तःकरणस्य स्वदेशस्थत्वेन विषयदेश-गमनाभावात् अन्तःकरणस्य विषयसम्बन्धाभावेन कथं विषयावच्छिन्नचैतन्ये अन्तःकरणावच्छिन्न-चैतन्याभेदलक्षणप्रमात्रभेदः इति चेत् उच्यते। अन्तःकरणवृत्तेः अन्तःकरणपरिणामतया परिणाम्युपादा-नातिरिक्तोपादेयस्याऽभवात् वृत्तेः विषयदेशव्यापित्वे तदुपादानस्य अन्तःकरणस्याऽपि विषयदेश-व्यापित्वस्य अत्यन्तसिद्धतया विषयावच्छिन्नचैतन्ये प्रमात्रभेदः सूपपादः। ततश्च घटादिविषयचैतन्याव-च्छेदकीभूते घटादिविषयेऽपि प्रमात्रभेदः सिध्यति।[३४]

अनुमित्यादिस्थले तु अन्तःकरणस्य वह्न्यादिदेशनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यानात्मकत्वात् वह्न्यादिविषयसत्ता प्रमातृसत्तातो भिन्नेति प्रमातृसत्ताऽतिरिक्तसत्ताकत्वस्यैव विषये वह्न्यादौ सत्त्वेन तत्तच्छून्यत्वाभावान्नातिव्याप्तिः।[३५]

नन्वेवमपि अनुमितिशाब्दादिविषये धर्माधर्मादौ अतिव्याप्तिः। विषयधर्माधर्मयोः, अन्तःकरणस्य तदवच्छिन्नदेशे वर्तमानत्वेन धर्माधर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्माधर्मादिसत्तायाः प्रमातृसत्ताऽनतिरेकात् धर्माधर्मादौ प्रत्यक्षत्वापत्तिः । अतः योग्यत्वं विषयविशेषणम् । नैयायिकादिमत इव धर्माधर्मदिः स्वभावतः अयोग्यत्वात् न तयोः प्रत्यक्षत्वापत्तिः।[३६]

एवमपि 'रूपी घटः' इति प्रत्यक्षस्थले परिमाणाकारवृत्त्यभावदशायामपि परिमाणस्य प्रत्यक्षत्वा-पत्तिः। घटे रूपस्येव परिमाणस्याऽपि सत्त्वेन रूपावच्छिन्नचैतन्यस्य परिमाणावच्छिन्नचैतन्यस्य चैकत्वेन रूपावच्छिन्नचैतन्यस्य प्रमात्रभिन्नत्वे परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नत्वेन परिमाणादिसत्तायाः प्रमातृसत्तातिरिक्तसत्ताकत्वाऽभावात्। अतः तत्र तदाकारवृत्त्युपहितत्वं प्रमातरि विशेषणं देयम्। एवं च स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यविषयत्वं विषयगतप्रत्यक्षत्वे प्रयोजकम्। रूपाकारवृत्तिदशायां परिणामाकारवृत्तेरभावेन अभेदप्रतियोगिनि प्रमातरि स्वाकारवृत्त्युप-हितत्वस्य परिणामाकारवृत्त्युपहितत्वस्य प्रमातरि अभावान्नातिव्याप्तिः।[३७]

वृत्तावव्याप्तिवारणप्रक्रिया

नन्वेवं सति अस्य लक्षणस्य वृत्तावव्याप्तिः। वृत्तेः वृत्यन्तराभ्युपगमे तस्याप्यन्या वृत्तिरिति सजातीयानन्तपदार्थकल्पनाधाराविश्रामाभावलक्षणा अनवस्था प्रसज्येत। वृत्तिगोचरवृत्यन्तरानभ्युपगमे तु वृत्याकारवृत्त्युपहितत्वस्य प्रमातरि अभावात् स्वाकारवृत्त्युपहितत्वघटितनिरुक्तविषयप्रत्यक्षलक्षणस्य

In Public domain. Digitization Muthulakshmi Research Academy

अभावादव्याप्तिः। न च 'वृत्तिः स्वविषया ज्ञानत्वात् आत्मस्वरूपनित्यज्ञानवत्' इत्यनुमानेन वृत्तेः स्वविषयत्वसिद्ध्या वृत्तिगोचरवृत्यन्तरविषयत्वस्य प्रमातरि अभावेऽपि स्वविषयत्वस्य वृत्तौ सत्त्वेन स्वविषयवृत्त्युपहितप्रमात्रभेदात्मकलक्षणस्य सत्त्वेन वृत्तौ नाव्याप्तिरिति वाच्यम्। पूर्वोक्तानुमाने वृत्तौ ज्ञानत्वाभावेन स्वरूपासिद्धेः। वृत्तिलक्षणज्ञानत्वस्य हेतुत्वे तु दृष्टान्ते ब्रह्मस्वरूपज्ञाने वृत्तित्वस्याभावात् साधनवैकल्यम्। उभयसाधारणस्य ज्ञानत्वस्य अभावात्। न च ज्ञानपदवाच्यत्वमुभयसाधारणम्। चक्षुरादेरपि करणव्युत्पत्या ज्ञानपदवाच्यत्वेन व्यभिचारात्। "वृत्तिः न स्वविषया जडत्वात्" घटवदिति सत्प्रतिपक्षानुमानम्। किञ्च वृत्तेः स्वविषयत्वे आत्मवत् स्वप्रकाशत्वापत्तिः। न चेष्टापत्तिः आत्मैव स्वप्रकाशः इति सिद्धान्तभङ्गापत्तेः।[३८] न च "वृत्तिरपि स्वप्रकाशा प्रकाशाव्यभिचारित्वावगमात् आत्मवत्" इत्यनुमानेन वृत्तेः स्वप्रकाशत्वसिद्धिरिति वाच्यम्। स्वप्रकाशत्वरूपसाध्याभाववति सुखादौ प्रकाशाव्यभिचरित्वावगमरूपहेतोः सद्भावेन व्यभिचारात्। न च तत्रापि स्वप्रकाशत्वमिष्टमेवेति वाच्यम्। स्वप्रकाशात्मसम्बन्धे नैवान्येषां प्रकाशोपपत्तौ अनेकस्वप्रकाशकल्पने गौरवात्। 'आत्मैवास्य ज्योतिः' इति श्रुतिविरोधाच्च। ततश्च स्वविषयवृत्त्युपहितत्वस्य प्रमातरि विशेषणत्वेन लक्षणसङ्गमनेऽपि वृत्तेः स्वविषयत्वे स्वप्रकाशत्वापत्त्या स्वाकारवृत्त्युपहितत्वघटितस्य विषयप्रत्यक्षलक्षणस्य वृत्तौ अव्याप्तिः सुदृढैव इति शिखामणिव्याख्यातृभिः कश्चन पूर्वपक्षः उपक्षिप्तः।[३९]

तस्येदं तैरेवोक्तं समाधानम् - अस्ति तावत् घटमहं जानामि इति वृत्तिगोचरानुभवः। स च न वृत्यन्तरम्, वृत्यन्तराभ्युपगमे अनवस्थापातात्। न च चैतन्यमेव वृत्तिविषयकानुभवः, तथा सति व्यवहितपदार्थस्याऽपि भानापत्तेः। तादृशानुभवस्य सन्निहितप्रकारकत्वे घटादिगतपरिमाणादेरपि साक्षात्कारप्रसङ्गात्। ननु परिमाणस्य सत्त्वेऽपि तदाकारवृत्तेः अभावेन प्रकाशव्यभिचारे प्रसक्ते आवरणभङ्गार्थं परिमाणादौ वृत्तेः अभ्युपगमः इति चेत्, एवमपि सुखादौ वृत्तिं विनाऽपि चैतन्येनैव प्रकाशात् सुखादौ वृत्तेः नैरर्थक्यप्रसङ्गः। यदि च वृत्त्युपहितप्रमात्रभेदे सत्येव सुखस्य प्रत्यक्षत्वमिति सुखादिप्रत्यक्षत्वोपपत्तये वृत्तिरास्थेया। यदि वा स्वरूपचैतन्यस्य नित्यस्य नाशायोगात् वृत्तिनाशलक्षणसंस्कारस्य स्मृत्युपयोगिनः सम्पादनार्थं तत्र वृत्तिः आस्थीयेत तत् सुखादिवृत्ताविव घटादिवृत्तावपि तुल्यम्। एवञ्च 'वृत्तिः स्वविषया अन्याप्रकाश्यत्वे सति (स्वसजातीयवृत्यन्तराविषयत्वे सति) प्रकाश्यमानत्वात् चिद्दृश्यत्वात् आत्मवत्' इति अनुमानमेव वृत्तेः स्वविषयत्वे प्रमाणम्। तथा च घटमहं जानामिति वृत्तिगोचरानुभवे ज्ञानात्मिकायाः वृत्तेः वृत्तिं विना केवलचित्प्राकाश्यत्वे व्यवहितपदार्थविषयभानादिदोषपरम्परया स्वात्मकवृत्तिवेद्यत्वं स्वस्याः वृत्तेः अवश्यमभ्युपगन्तव्यम्।

नन्वेवमपि पूर्वक्तानुमाने आत्मत्वमुपाधिः स्यात्। स्वविषयत्वरूपसाध्यव्यापकत्वस्य आत्मान्तर्भावेण, अन्याप्रकाश्यत्वविशिष्टप्रकाश्यमानत्वरूपसाधनाधिकरणे वृत्तौ आत्मत्वाभावसत्त्वेन

In Public domain. Digitization Muthulakshmi Research Academy

साधनाव्यापकत्वात् आत्मत्वमुपाधिः इति चेत्। अत्र शिखामणिकाराणामित्थं समाधानम्। ''सर्वं ज्ञानं गुणः गुणत्वव्याप्यजातिमत्वात्'' इत्यनुमानजन्यायां सर्वं ज्ञानं गुणः इत्यनुमितौ सर्वज्ञानान्तःपातिनः अनुमितिरूपज्ञानस्याऽपि उद्देश्यत्वेन विषयत्वात् स्वविषयत्वमात्मत्वरूपोपाधिव्यभिचारि इति नैयायिकैरप्यभ्युपगतम्। एवञ्च स्वविषयत्वाधिकरणे अनुमितौ आत्मत्वरूपोपाधेरभावात् साध्यव्यापकत्वभङ्गात् नात्मत्वस्योपाधित्वम्। नापि वृत्तिः न स्वविषया जडत्वात् इति प्रतिरोधानुमानेन वृत्तौ स्वविषयत्वाभावसिद्धिः। जडायामपि अनुमितौ स्वविषयत्वस्य परैरभ्युपगमात्। न च वृत्तेः स्वविषयत्वे स्वप्रकाशत्वापत्तिः। तन्मात्रस्य जडत्वात्। अत एव स्वावच्छिन्नचैतन्यप्रकाश्यत्वमभ्युपगम्यते।[४०] तस्मात् वृत्तेः चैतन्य सहकारितया अवश्याङ्गीकरणीयत्वात्, अनवस्थाभयेन वृत्तेः ज्ञाने स्वात्मकवृत्तेः सहायापेक्षणात् स्वविषयत्वस्य सिद्धतया स्वविषयवृत्त्युपहितप्रमातृसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यविषयत्वं विषयगतप्रत्यक्षत्वे प्रयोजकमिति शिवम्।

निबन्धान्तटिप्पण्यः

१. वे.प.पृ.३४	२. न्या.सू.१.१.४	३. न्या.वा.पृ.२०३-२०६
४. शि.व्या.पृ.३४-३५	५. वे.प.पृ.३५	६. वे.प.पृ.३७
७. वे.प.पृ.३७	८. वे.प.४३-४४	९. वे.प.पृ.४३
१०. वे.प.पृ.४७	११. वे.प.पृ.५८	१२. वे.प.पृ.६०-६२
१३. वे.प.पृ.११७	१४.	१५. वे.प.शि.व्या.पृ.७७
१६. वे.प.मणि.पृ.३६	१७. वे.प.पृ.४६	१८. वे.प.पृ.४७
१९. वे.प.शि.व्या.पृ.४९	२०. वे.प.पृ.४९	२१. वे.प.पृ.५०
२२. वे.प.पृ.५१	२३. वे.प.पृ.५६	२४. वे.प.पृ.५२
२५. वे.प.पृ.५३,५४	२६. वे.प.पृ.५४	२७. वे.प.शि.व्या.पृ.६३
२८. वे.प.पृ.६४	२९. वे.प.पृ.११८	३०. वे.प.पृ.१२२
३१. वे.प.शि.व्या.पृ.६४	३२. वे.प.पृ.६६	३३. वे.प.शि.व्या.पृ.६६
३४. वे.प.पृ.६७	३५. वे.प.पृ.६८	३६. वे.प.पृ.६८
३७. वे.प.पृ.६९		

In Public domain. Digitization Muthulakshmi Research Academy

आयुर्वेदेऽङ्गीकृतानि प्रमाणानि

डा. एस्.वेणुगोपालन्

आहारनिद्राभयमैथुनानि सामान्यमेतत्पशुभिर्नराणाम्।
ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिस्समानाः।।

इति सूक्त्यनुसारमितरेभ्यो जन्तुभ्यः आत्मानमेतेन ज्ञानेनैव पृथक्करोति मानवजातिः। सामान्यात्कृमिकीटादारभ्य ब्रह्मपर्यन्तस्य समग्रस्याऽपि वस्तुजातस्य परिच्छिद्यज्ञानेन मोक्षपर्यन्तमृच्छति मानवः। तत्तद्विषयप्रतिपादकानि तत्वानि यानि, तेषां यथावत्परिज्ञानं मोक्षसाधनमिति तत्वविदः। 'तत्वज्ञानान्निश्श्रेयसोऽधिगम' इति स्मृतेः। ततश्च येन तत्वं दृश्यते तद्दर्शनमिति सिद्ध्यति। दृश्धातोः ज्ञानार्थकत्वस्वीकारे दर्शनं, दृष्टिः इति व्युत्पत्या ज्ञानमित्यर्थोऽपि लभ्यते। ज्ञानेनैव हि सर्वं विचारयितुं शक्यते। ततश्च शान्तचित्ताः जितेन्द्रियाः तपस्विनः दिव्यचक्षुषः प्राचीनाः भारतीयाः ऋषिप्रवराः निखिलं पदार्थजातं करतलामलकवत् प्रत्यक्षीकुर्वाणाः विचारविवेकशीलाश्च भूत्वा मानवसमुदायस्य श्रेयसे कल्याणाय च यानि तत्वानि, यांश्च सिद्धान्तान् बुद्धियुक्तिसहितान् तत्वज्ञानप्राप्तिसाधनभूतान् आविर्भावयामासुः, ते तत्प्रतिपदकग्रन्थाश्च दर्शनसंज्ञया व्यवह्रियन्ते। ततश्चास्य जटिलप्रश्नपूर्णस्य सरहस्यस्य निगूढतमस्य प्रपञ्चस्य सर्वासां समस्यानां समाधानप्रदर्शकः तत्वस्वरूपतज्ज्ञानसाधनतत्फलभूतमोक्षादिस्वरूपतत्प्रमाणादिनिरूपणपरः ग्रन्थजात एव दर्शनशब्दभाग्भवति। दर्शनानां मुख्यं प्रयोजनन्तु वैयक्तिकव्यवस्था, स्वीयपवित्रतासम्पादनद्वारा समाजव्यवस्थापरिपालनं, तदर्थं पवित्रपरिवारव्यवस्थापरिरक्षणं, तद्द्वारा धर्मार्थकाममोक्षाख्यपुरुषार्थप्राप्तिरिति बुद्धिमतां सुसंस्कृतचित्तानां भारतीयानां विश्वासः। बृहदारण्यकेऽपि[1] जातमात्रस्यापि पुरुषस्य पुत्रैषणा, वित्तैषणा, परलोकैषणा इति एषणात्रयं भवतीति दृश्यते। तत्र पुत्रैषणा, वित्तैषणा इति आद्ये द्वे साधनकोटौ अन्तर्भवतः। परलोकैषणा तु फलकोटौ अन्तर्भवति। मानवानां लौकिकजीवने प्रवृत्तौ यत्फलीभूतं परिवाररक्षणं तत् साधनीभूते एषणाद्वये अन्तर्भूतम्। तन्मूलकश्च समाजस्वास्थ्यं परलोकैषणायाम् अन्तर्भूतम्। एतदेव प्रयोजनमूरीकृत्य मान्यैः मन्वादिभिः पूर्वतनैः स्मृतिकारैः शास्त्रकारैश्च समाजव्यवस्थायै नियमः कृतः। तत्सिद्ध्यर्थं कुटुम्बरक्षणे नियमा अपि विहिताः। एतत्परिपालनेन समाजव्यवस्थां परिपालयन्तः ते ऋषयः तन्नियमान् धर्मशास्त्रत्वेन व्याहरन्। तदाचरणं धर्मोत्पत्तेः कारणमित्यपि अब्रुवन्। तेषु कामन्दक्यादिनीतिशास्त्रम् अर्थप्रधानम्, अर्थोत्पत्तिप्रधानफलकम्। वात्स्यायनीयं कामशास्त्रम् अनिन्दित-

---

उपाचार्यः (संस्कृतम्), श्री जयेन्द्र सरस्वती आयुर्वेदकलाशाला, चेन्नै.

In Public domain. Digitization Muthulakshmi Research Academy

काामप्रधानं सुखमयजीवनप्रधानफलकम्। जैमिन्यादिप्रणीतं मीमांसादर्शनं धर्मकर्मब्रह्मस्वरूपविशेष-विचारफलकम्। एवमेव चरकादिमुनिप्रणीतमिदमायुर्वेददर्शनं पुरुषार्थचतुष्टयप्राप्तिसाधनीभूतशरीर-स्वास्थ्यप्रधानफलकमिति इमानि दर्शनानि मानवजीवनस्य अत्यन्तमुपकारीणि भवन्ति। तथा च आयुर्वेदस्य स्वरूपं सङ्ग्रहेण परिशील्य तत्र प्रमाणानां प्रभावः कियान् भवतीति अधुना यथावकाशं परिशील्यते।

आयुर्वेदो नाम चिकित्साशास्त्रम्। चिकित्सा च सचेतनशरीरस्य आरोग्यरक्षणाय, व्याधि-प्रशमनाय च प्रवृत्ता। तदुक्तम् 'स्वस्थस्यस्वास्थ्यसंरक्षणम् आतुरस्यविकारप्रशमनञ्च'[2] आयुर्वेदस्य लक्ष्यमिति। सचेतनशरीरं 'पुरुष'संज्ञया आयुर्वेदे निर्दिष्टम्। पुरुषः षड्धात्वात्मकः भवति। पञ्चमहा-भूतानि तथा आत्मेति षड्धातवः। उक्तं च सुश्रुते, 'पञ्चमहाभूतशरीरिसमवायः पुरुष' इति। अस्मदादीनां शरीरं पृथिव्यादिपञ्चमहाभूतात्मकम्। तथा च पार्थिवांशबहुलत्वात् तत्पार्थिवमिति गृहीतं शास्त्रकारैः। तदेतच्छरीरं दोषधातुमलमूलम्। दूष्यन्ते रसादयः धातवः एभिः, अथवा दूषयन्ति रसादीन् इति वा व्युत्पत्या वातः, पित्तम्, कफ इति इमे त्रयोऽपि दोषसंज्ञां भजन्ते। एवमेव रसः, रक्तम्, मांसं, मेदः, अस्थि, मज्जा, शुक्रम् इति सप्तधातवः निसर्गजाः, धारयन्ति देहमिति व्युत्पत्या धातुसंज्ञां लभन्ते। तथैव मलिनीकरणात् मलाः इति अन्वर्थसंज्ञया व्यपदिश्यन्ते मलमूत्रस्वेदाः त्रयोऽपि। तथा च दोषाः, धातवः, मला इति त्रयोऽपि एते शरीरस्य मूलम्। पञ्चमहाभूतेभ्यः शरीरेदोषधातुमलाः आरब्धाः। एवं सङ्क्षेपेण आयुर्वेददर्शनानुसारेण पुरुषगतमूलतत्वानि। तथा च ''समदोषः समाग्निश्च समधातुमलक्रियः।''

'प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते'[3] इति स्वस्थलक्षणमुच्यते। दर्शनेऽस्मिन् उपात्ताः सर्वेऽपि सिद्धान्ताः वैशेषिकदर्शने आदृतानां पदार्थानां, साङ्ख्यप्रतिपादितानां तत्वानां च यथोपयोगं समवलम्बेन निश्चिताः सन्ति। एवञ्च आयुर्वेदस्य सिद्धान्तविवरणसमये वैशेषिकसाङ्ख्ययोः सिद्धान्तानां यथासम्भवम् उद्धरणम् आयुर्वेदे, विशेषतः चरकसंहितायां कृतं दृश्यते। परन्तु आयुर्वेदसिद्धान्तानां सम्यग्बोधनार्थं वैशेषिकसाङ्ख्ययोः सिद्धान्तानां यावद्विवरणमपेक्षितं तावदत्र नोपलभ्यते, यतः आयुर्वेदमधिजिगमिषता जनेन वैशेषिकसाङ्ख्ययोः ज्ञानं पूर्वमेव सम्पादितं स्यादित्यङ्गीकृत्य आयुर्वेद-शास्त्रकाराः स्वशास्त्रप्रतिपादने प्रवर्तन्ते। अतः आयुर्वेदज्ञानार्थं तयोः दर्शनयोः यथावज्ज्ञानमपेक्षित-मेवास्ति।

आयुर्वेदे इतरदर्शनानां विचारः

दर्शनेषु सृष्ट्युत्पत्तिविषयको विचारः, एवमात्मविचारश्च प्रधानो भवति। चरके सूत्रस्थाने

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमाध्याये काणादानां षण्णां पदार्थानां वर्णनं कृतं दृश्यते। परन्तु क्रमभेदः आयुर्वेदे दृश्यते; 'सामान्यम्, विशेषः, गुणः, द्रव्यम्, कर्म, समवाय'श्चेति। अत्र नैयायिकानामभावाख्यः पदार्थः सिद्धान्तस्यास्य अनावश्यकत्वात् नाद्रियते। एवमेव चरके शारीरस्थानस्य प्रथमेऽध्याये साङ्ख्यतत्वानि विशेषेण विचारितानि दृश्यन्ते। तत्र पञ्चविंशतितत्वानि आत्मसहितानि साङ्ख्ये, अत्र तु चतुर्विंशतिकः पुरुषः वर्णितः, अष्टधातुकी प्रकृतिः, दशेन्द्रियाणि, मनः, पञ्चार्थाः इति चतुर्विंशतितत्त्वानि। अत्र आत्मनः पृथङ्निर्देशो नास्ति। अव्यक्ते एव तस्यान्तर्भाव इति चरकटीकाकारस्य चक्रपाणिदत्तस्य मतम्। अत्र सम्यक्परिशीलने इदं ज्ञातं भवेत् यत् चरकाचार्याः कापिलसाङ्ख्यानुयायिनः, न तु ईश्वरकृष्णस्य। सत्कार्यवाद, त्रिगुणकर्तृत्वादिविचारः यथा कारिकासु सविस्तरं प्रतिपादितः, न तथा चरके।

सुश्रुते तु प्रायः ईश्वरकृष्णस्य मतमवलम्ब्यते। एतेनैव कारणेन चरकमतं, सौश्रुतात्किञ्चिदिव भिन्नं दृश्यते। तथा च सुश्रुतीयं साङ्ख्यं चरकसाङ्ख्याद् भिन्नम्। तथाहि साङ्ख्ये 'पुरुषः' अगुणः विभुश्च। आयुर्वेदे तु प्रकृतिसंसर्गात् पुरुषस्य सगुणत्वम्, असर्वगतत्वञ्च। तत्र साङ्ख्ये अहङ्कारात् पञ्च ज्ञानेन्द्रियाणि सञ्जातानि, आयुर्वेदे तु पञ्च महाभूतेभ्यः पञ्चेन्द्रियाणामुत्पत्तिः वर्णिता। तत्र साङ्ख्ये प्रकृतिरेव सर्वोत्पत्तौ कारणम्, आयुर्वेदे तु स्वभावः, ईश्वरः, कालः, यदृच्छा, नियतिः, परिणामश्चेति षट्कारणानि निर्दिष्टानि। चरके शारीरस्थाने पञ्चमेऽध्याये योगदर्शनोल्लेखोऽपि दृश्यते। यथा वा साङ्ख्यसिद्धान्तः आयुर्वेदस्य मूलं तथा योगदर्शनस्यापि मूलम्। सुश्रुते शारीरशास्त्रस्य प्राधान्यप्रसङ्गेन उक्तं, यथा 'इदं शारीरशास्त्रं भिषजामुपयुक्तं, तथा योगाभ्यासिनामपि' इति। तेनेदं ज्ञायते यत् आयुर्वेदीयशारीरशास्त्रं योगशास्त्रेणापि आदृतमिति। चरके मानसिकरोगेषु चिकित्सार्थं समाधिरित्येकः उपायः कथितोऽस्ति। समाधिर्नाम विषयेभ्यो मनो निवर्त्य तस्य परमात्मनि नियमनमेव। अयं योगस्यैव सिद्धान्तः। तदास्तां तावत्; प्रकृतमनुसरामः।

आयुर्वेदेऽङ्गीकृतानि प्रमाणानि

आयुर्वेदे प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, युक्तिः इति पञ्च प्रमाणानि आद्रियन्ते। अत्र चरकाचार्यस्य युक्तिरूपं प्रमाणमिदं तस्य टीकाकारेण चक्रपाणिदत्तेन अनुमाने एव अन्तर्भाव्यमिति मन्यते। तथा च आयुर्वेदे यथा न्यायशास्त्रस्य प्रमाणपद्धतिरङ्गीकृता, तथैव साङ्ख्यशास्त्रस्यापि। चरके केषुचित्स्थलेषु प्रत्यक्षम्, अनुमानम्, आप्तवचनमिति साङ्ख्यानुसारं प्रमाणत्रयं निर्दिष्टम्। उपमानमिति चतुर्थं तु न्यायशास्त्रादुपाहृतम्। पञ्चमं युक्तिरिति तु चरकाचार्याणामेव स्वशास्त्रे प्रतितन्त्रसिद्धान्त इव निर्दिष्टमिति दृश्यते। तत्र प्रत्यक्षप्रमाणविषयकेष्वनेकेषु वचनेषु प्रधानवचनमिदम्; तथा च चरके शारीरस्थाने इन्द्रियोत्पत्तिप्रकरणे -

In Public domain. Digitization Muthulakshmi Research Academy

या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्तते।
याति सा तेन निर्देशं मनसा च मनोभवा।।[४]

इति प्रत्यक्षं निरुच्यते। एवमेव 'पञ्चेन्द्रियबुद्धयः चक्षुर्बुद्ध्यादिकाः'[५] इत्यपि दृश्यते। तत्र व्याख्याया-मसाधारणकारणेनेन्द्रियेण व्यपदिष्टाः बुद्धयः इति इन्द्रियबुद्धयः। चक्षुषा असाधारणेन कारणेन जनिता बुद्धिः चक्षुर्बुद्धिः। एवं श्रोत्रादिषु बोध्यमिति व्याख्याति। एवमेव 'मनो मनोऽर्थो बुद्धिरात्माचेति अध्यात्मद्रव्यगुणसङ्ग्रहः, शुभाऽशुभप्रवृत्तिनिवृत्तिहेतुश्च'[६] इति पठ्यते । तत्र व्याख्यायां; मनोर्थः वक्ष्यमाणः 'मनसस्तु चिन्त्यमर्थः'[७] इत्यनेन बुद्धिरिह मनोबुद्धिर्विवक्षितेति। एवमेव -

आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते।
व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते।।[८]

इति श्लोकान्तरं दृश्यते। तत्र च व्याख्यायाम् 'इह च प्रत्यक्षफलरूपाऽपि बुद्धिः प्रत्यक्षशब्देनाभिधीयते। तथैव लोकव्यवहारात्। परमार्थतस्तु यतो भवति इन्द्रियादेः ईदृशी बुद्धिः तत्प्रत्यक्षम्' इति। एवमेव अन्यत्र 'प्रत्यक्षं तु खलु तत् यत् स्वयमिन्द्रियैर्मनसा चोपलभ्यते'[९] इति श्रूयते। तत्र व्याख्यायाम्; स्वयमिन्द्रियैः मनसा च इत्यनेन यदात्मना इन्द्रियैः चक्षुरादिभिः अव्यवधानेन गृह्यते रूपादि तत्प्रत्यक्षमिति बाह्यप्रत्यक्षं गृह्णाति। मनसा च इत्यनेन च मनसा अव्यवधानेन यदुपलभ्यते सुखदुःखादि, तच्च मानसं प्रत्यक्षं गृह्णाति इति। एवमेव अन्यत्र 'अथ प्रत्यक्षम्। प्रत्यक्षं नाम तत् यदात्मना चेन्द्रियैश्च स्वयमुपलभ्यते। तत्र आत्मप्रत्यक्षाः सुखदुःखेच्छाद्वेषादयः। शब्दादयस्तु इन्द्रिय प्रत्यक्षाः'[१०] इति दृश्यते। तत्र व्याख्यायाम्; 'आत्मना इति मनसा, तेन मानसप्रत्यक्षसुखाद्यमवरुद्ध्यते। इन्द्रियैश्च इत्यनेन बाह्यं प्रत्यक्षं गृह्यते। स्वयमुपलभ्यते इति साक्षादुपलभ्यते। अनेन च इन्द्रियव्यापारे सत्यपि यदनुमानविज्ञानं तदसाक्षात्कारित्वात् न प्रत्यक्षमिति' दर्शयति। तत्र लौकिकप्रत्यक्षे षड्विधसन्निकर्षः न्यायशास्त्रे यः प्रसिद्धः सः आयुर्वेदेऽपि तथैव अङ्गीक्रियते। तथा च पूर्वनिर्दिष्टे 'आत्मेन्द्रियमनोऽर्थानाम्' इत्यस्मिन् श्लोके व्याख्याकारः - 'सन्निकर्षादिति सम्बन्धात्, स च सम्बन्धः संयोगः, समवायः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवेतसमवायः, तद्विशेषणविशेष्यभावलक्षणो बोद्धव्यः' इति ब्रवीति। अत्र विशेषतया सामान्यलक्षण-ज्ञानलक्षण-योगलक्षणलक्षणे अलौकिकसन्निकर्षे एकं विशिष्टमुदाहरणं चरके सूत्रस्थाने एवोपलभ्यते। तथा च योगिनां यदतीन्द्रियविषयकं ज्ञानं भवति तद्योगजसन्निकर्षेण भवति। योगाभ्यासजनितः धर्मविशेषः यः सः योगजसन्निकर्षः। एतस्मात् योगजसन्निकर्षात् आकाशपरमाण्वादि निखिलपदार्थज्ञानं भवति। यथा पातञ्जले योगसूत्रे 'परमाणुपरम-महात्वान्तोऽस्य वशीकारः' इत्युच्यते तथा। तथा च चरके आयुर्वेदावतरणप्रकरणे एवं पठ्यते -

In Public domain. Digitization Muthulakshmi Research Academy

प्रादुर्भूतो मनुष्याणामन्तरायो महानयम्।
कः स्यात्तेषां शमोपायः इत्युक्त्वा ध्यानमास्थिताः।
अथ ते शरणं शक्रं ददृशुः ध्यानचक्षुषा।।[११] इति।

अत्र वर्णितं शक्रदर्शनमेतादृशयोगजसन्निकर्षजन्यमेव भवितुमर्हति। टीकाकर्तुः चक्रपाणेरभिप्रायोऽपि एतादृश एव।

इन्द्रियोत्पत्तिविषये आयुर्वेदसिद्धान्तः

चरके, सुश्रुते च इन्द्रियाणां भौतिकत्वमङ्गीकृतम्। वैशेषिके यथा केवलभौतिकत्वसिद्धान्तः सः आयुर्वेदस्य असम्मतः, अत्र हि सर्वाण्यपि इन्द्रियाणि पाञ्चभौतिकानि। इन्द्रियस्य पञ्चमहाभूतघटितत्वेऽपि एकैकस्मिन् इन्द्रिये एकैकस्य महाभूतस्य अंशः अधिको वर्तते। तथा च पाञ्चभौतिकं घ्राणेन्द्रियं पृथिव्याः अधिकेनांशेन घटितम्। एवमेव रसनायां जलाधिक्यं, चक्षुषि तेजोऽधिक्यं, त्वचि वाय्वाधिक्यं, श्रोत्रे आकाशाधिक्यम् च वर्तते। घ्राणादिषु पार्थिवाद्यंशानामाधिक्यात् तैः स्वतुल्ययोनिगन्धादिगुणाः गृह्यन्ते इत्यायुर्वेदसम्मता उपपत्तिः। इयञ्च इन्द्रियाणामेकाधिकभौतिकत्वसिद्धान्त इति संज्ञया ज्ञेया । तदिदमेवमुच्यते । 'तत्रानुमानगम्यानां पञ्चमहाभूतविकारसमुदायात्मकानामपि सताम् इन्द्रियाणां तेजः चक्षुषि, खं श्रोत्रे, घ्राणे क्षितिः, आपो रसने, स्पर्शनेऽनिलो विशेषेणोपपद्यते' इति। तत्र व्याख्याने हि, 'सम्प्रति वैद्यकसिद्धान्तेन पाञ्चभौतिकानामपि चक्षुरादीनां यथा तैजसत्वादि व्यपदेशो भवति, तदाह तत्रेत्यादि ...एतदुक्तं भवति - पाञ्चभौतिकत्वेऽपि तेजोऽधिकत्वात् चक्षुः तैजसं व्यपदिश्यते। एवम् घ्राणादिष्वपि पृथिव्याद्यधिकत्वेन पार्थिवत्वादिव्यपदेशः' इति। एवमेव 'एकैकाधिकयुक्तानि खादीनामिन्द्रियाणि तु'[१२] इत्यत्र व्याख्याने, 'एकैकाधिकपदेन पञ्च अपि पाञ्चभौतिकानि, परं चक्षुषि तेजोऽधिकम् इत्यादि उक्तम् सूचयति' इति उच्यते। एवमेव सुश्रुतेऽपि 'भौतिकानि च इन्द्रियाण्यायुर्वेदे वर्ण्यन्ते तथा इन्द्रियार्थाः'[१३] इति दृश्यते। तत्र व्याख्याने डल्हणेनाऽपि 'इन्द्रियाणि श्रवणस्पर्शनदर्शनरसनघ्राणानि भौतिकानि।' तथाचोक्तम्, पञ्चभूतात्मकत्वेऽपि -

खं श्रोत्रे, स्पर्शने वायुः, दर्शने तेज उत्कटम्।
सलिलं रसने भूमिः घ्राणे, तज्ज्ञैः निरूपितम्।।

इति च प्रोच्यते । एवमेव अत्रैव सुश्रुते -

इन्द्रियेणेन्द्रियार्थं हि स्वं स्वं गृह्णाति मानवः।
नियतं तुल्ययोनित्वात् नाऽन्येनान्यमिति स्थितिः।।[१४]

In Public domain. Digitization Muthulakshmi Research Academy

इत्यपि दृश्यते। एवमेव ज्ञानोत्पत्तौ न्यायवैशेषिकप्रक्रिया या 'आत्मा मनसा संयुज्यते' इति वर्तते, सा आयुर्वेदस्यापि सम्मतैव। अत्र हि विशेषतया अयं सिद्धान्तः प्रवर्त्यते यत् अत्र आयुर्वेद केवलद्रष्टुः आत्मनः विचारः निष्प्रयोजनत्वात् न प्रपञ्च्यते। पञ्चमहाभूतानामात्मनश्च समुदायरूपः यः कर्मपुरुषः स एव आयुर्वेदस्य विषयः। ज्ञानं, सुःखदुःखे च अस्यैव कर्मपुरुषस्य सम्भवन्ति। अत्र हि प्रत्यक्षज्ञानम् आत्मेन्द्रियमनोऽर्थानां सन्निकर्षादुत्पद्यते। प्रकृतिसंसर्गात् पुरुषस्याऽपि सत्वादित्रिगुणवत्वं सुःख-दुःखादिभोक्तृत्वञ्च आयुर्वेदे स्वीक्रियते। निर्गुणोऽपि पुरुषः प्रकृतिसंसर्गात् सगुणः सम्पद्यते इत्यभिप्रेत्य आयुर्वेदीयैः साङ्ख्यात् भिन्नं मतं प्रतिपादितम्।

आयुर्वेद अनुमानम्

अनुमानविषये चरके विमानस्थाने 'अनुमानं खलु तर्को युक्त्यपेक्षः'[१५] इत्युक्तम्। तत्र टीकाकारः इत्थं परिष्करोति - 'तर्कोऽत्राप्रत्यक्षज्ञानम्। युक्तिः = सम्बन्धः अविनाभावः इत्यर्थः। तेन अविनाभावजं परोक्षज्ञानमनुमानमित्यर्थः' इति। एवमेव चरके सूत्रस्थाने तिंस्रैषणीयाध्याये एवं दृश्यते-

प्रत्यक्षपूर्वं त्रिविधं त्रिकालश्चानुमीयते।
वह्निर्निगूढो धूमेन मैथुनं गर्भदर्शनात्।।
एवं व्यवस्यन्त्यतीतं बीजात् फलमनागतम्।
दृष्ट्वा बीजात् फलं जातमिहैव सदृशं बुधाः।।[१६] इति।

तत्र व्याख्यायां; 'प्रत्यक्षपूर्वमिति = व्याप्तिग्राहकप्रमाणपूर्वकम्; त्रिविधमित्यनेन अनुमान-त्रैविध्यं दर्शयति, तेन कार्यात् कारणानुमानं, यथा गर्भदर्शनात् मैथुनानुमानम्। तथा कारणात् कार्यानुमानं यथा बीजात् सहकारिकारणान्तरयुक्तात् फलानुमानम्। तथैव अकार्यकारणभूतानां च सामान्यतो दर्शनादनुमानम्, यथा धूमात् वर्तमानक्षणसम्बन्धात् अग्न्यनुमानमित्येतत्त्रिविधमनुमानं गृहीतं भवति' इति। एतस्मात् वचनात् अत्र त्रिविधमनुमानं स्वीकृतमिति दृश्यते। १) कार्यात् कारणानुमानम्, २) कारणात् कार्यानुमानम्, ३) अकार्यकारणभूतानां सामान्यतो दर्शनादनुमानम्। अत्र कारणात् कार्यानुमानम् 'पूर्ववत्' इत्याख्यमनुमानम्, कार्यात् कारणानुमानं 'शेषवत्' इत्याख्यम्। इतरत् सर्वं सामान्यतो दृष्टमित्यस्मिन् प्रभेदे च अन्वेति। आयुर्वेदे 'पूर्ववत्' इत्यादि त्रितयमेव अनुमानं स्वीकृतमिति दृश्यते। तत्र हेतुविषये चरके विमानस्थाने वादमार्गज्ञानार्थं कानिचित् पदानि गृह्यन्ते। तत्र परार्थानुमानस्य प्रतिज्ञादि पञ्चावयवानां, तथा सव्यभिचारः, अहेतुः इत्यादि हेत्वभासानां च वर्णनं कृतं दृश्यते, तत्र 'सव्यभिचारं नाम यत् व्यभिचरणम्। यथा भवेदिदमौषधं तस्मिन् व्याधौ यौगिकमथवा न इति। सव्यभिचारं नाम व्यभिचारयुक्तो हेतुः। अस्मिन् व्याधौ इदमौषधं योग्यं

In Public domain. Digitization Muthulakshmi Research Academy

भवेन्न वा इति यः अनिश्चयः स एव सव्यभिचारमित्यर्थः।'[१७] एवमेव 'अहेतुः' इत्यपि। तत्र अहेतुर्नाम त्रिविधः, प्रकरणसमः, संशयसमः, वर्ण्यसमश्चेति। तत्र प्रकरणसमः इत्थं - यः पक्षः स एव हेतुः यदा भवति तदा प्रकरणसमः अहेतुः भवति। यथा - शरीरादन्य आत्मा नित्य इति प्रतिज्ञा, शरीरान्यत्वादिति हेतुः। शरीरान्यत्वं तु पक्षे उक्तमेव। तेनात्मनो नित्यत्वं न सिद्ध्यति, यतः पक्षे एव अत्र हेतुर्भवति। प्रकरणं नाम पक्षः। तेन समो हेतुः प्रकरणसमः। इदश्च न्यायशास्त्रे सत्प्रतिपक्षः यथा तथैव दृश्यते। संशयसमो यथा - य एव संशयहेतुः स एव संशयच्छेदहेतुः। अत्र यः हेतुः साध्यसाधकत्वेन उपन्यस्तः सः साध्याभावस्यापि साधको भवति इति संशयसमः, यथा- 'अयमायुर्वेदैकदेशम् आह, किन्वयं चिकित्सकः स्यात्? न वा? इति संशये परो ब्रूयात्, यस्मादयम् आयुर्वेदैकदेशमाह, तस्माच्चिकित्सकोऽयमिति। न च संशयच्छेदहेतुं विशेषयति। एष च अहेतुः। न हि य एव संशयहेतुः स एव संशयच्छेदहेतुर्भवति, ततोऽयं संशयसमो भवति।'[१८] वर्ण्यसमः अहेतुर्यथा - पक्षे यथा साध्यं सन्दिग्धमस्ति तथैव दृष्टान्तेऽपि साध्यं सन्दिग्धमेव यत्र अस्ति तत्र वर्ण्यसमः अहेतुर्भवति। यथा - बुद्धिः अनित्या अस्पर्शत्वात् शब्दवदिति। अत्र बुद्धौ पक्षे अनित्यत्वं यथा सन्दिग्धं तथैव दृष्टान्ते शब्देऽपि अनित्यत्वं सन्दिग्धमेवास्ति। दृष्टान्ते साध्यस्य वृत्तित्वं निश्चयेन भवेत्, 'निश्चितसाध्यवान् सपक्ष' इति नियमात्। वर्ण्यं नाम साध्यम्। सन्दिग्धसाध्यवत्तया दृष्टान्तस्य वर्ण्यसमो अहेतुर्भवति। तदुच्यते चरके; 'वर्ण्यसमः नाम अहेतुः, यो हेतुः वर्ण्याविशिष्टः, यथा कश्चित् ब्रूयात्, अस्पर्शत्वात् बुद्धिरनित्या, शब्दवदिति, अत्र वर्ण्यः शब्दः, बुद्धिरपि वर्ण्या, तदुभयवर्ण्याविशिष्टत्वाद्वर्ण्यसमोऽपि अहेतुः।'

तत्र उपमानम् आयुर्वेदे यथा- 'औपम्यं नाम यदन्येन अन्यस्य सादृश्यमधिकृत्य प्रकाशनं, यथा दण्डेन दण्डकस्य, धनुषा धनुःस्तम्भस्य इष्वासेन आरोग्यदस्य'[१९] इति। तथा च अयमर्थः, अन्येन प्रसिद्धेन अन्यस्य अप्रसिद्धस्य सादृश्यमधिकृत्य उपपादनम्। संज्ञासंज्ञिसम्बन्धप्रतीतिः उपमानस्य फलम्। एवमेव दण्डेन प्रसिद्धेन दण्डकस्य कुलालस्य दण्डवतः अप्रसिद्धस्य साधर्म्यात् उपपादनम्, तथैव इष्वासेन = इषुमोक्षकेण धनुषा अनतिविप्रकृष्टे लक्ष्ये यथा वा प्रयोगः सिद्ध्यति, प्रयोक्ता प्रयुञ्जानो नापराध्यति, तथैव आरोग्यदेन सद्वैद्येन वैद्यगुणैः आतुरं चिकित्सता नापराध्यते इति।

शब्दप्रमाणं यथा - आप्तवाक्यं शब्द इति शब्द लक्षणं सर्वतन्त्रसाधारणम्। तत्र आयुर्वेदे प्रमाणमिदमितरेभ्यः प्रमाणेभ्यः अतिवेलमाद्रियते, तद्यथा चरके सूत्रस्थाने सप्तमाध्याये आत्म-परलोक-आस्तिकत्वप्रतिपादनावसरे, 'तत्र बुद्धिमान् नास्तिक्यबुद्धिं जह्यात्, विचिकित्सां च। कस्मात्? प्रत्यक्षं हि अल्पम्, अनल्पम् अप्रत्यक्षमस्ति। यदागमानुमानयुक्तिभिः उपलभ्यते। यैरेव तावत् इन्द्रियैः प्रत्यक्षमुपलभ्यते, तान्येव सन्ति च अप्रत्यक्षाणि'[२०] इति ब्रवीति आचार्यः।

In Public domain. Digitization Muthulakshmi Research Academy

एवमेव अन्यत्र एकादशेऽध्याये -

रजस्तमोभ्यां निर्मुक्ताः तपोज्ञानवलेन ये।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा।।
आप्ताः शिष्टाः विबुद्धास्ते तेषां वाक्यमसंशयम्।
सत्यं, वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः।।[२१]

इति प्रमाणमिदं सुस्पष्टमाद्रियते। एवमेव विमानस्थानेऽपि तत्र 'आप्तोपदेशो नाम आप्तवचनम्, आप्तो हि अवितर्कस्मृतिविभागविदो निष्प्रीत्युपतापदर्शिनश्च। तेषामेवं गुणसंयोगाद्यद्वचनं तत्प्रमाणम्। अप्रमाणं पुनः मत्तोन्मत्तमूर्खरक्तदुष्टादुष्टवचनमिति।'[२२]

आयुर्वेदेऽस्मिन् शब्दः वाक्यापरनामा चतुर्विधः -१) दृष्टार्थः, २) अदृष्टार्थः, ३) सत्यः, ४) अनृतश्चेति चरके[२३] दृश्यते। यस्य शब्दस्य इहैवार्थो दृश्यते सः शब्दः दृष्टार्थ इत्युच्यते, 'त्रिभिः हेतुभिः प्रज्ञापराधादिभिः (असात्म्येन्द्रियार्थसंयोगः, प्रज्ञापराधः, परिणामश्चेति त्रयो हेतवः दोषप्रकोपणे) दोषाः प्रकुप्यन्ति' इति वाक्यस्यार्थः इहैव लोके द्रष्टुं शक्यः इति दृष्टार्थः अत्र शब्दः। यस्य वाक्यात्मकस्य शब्दस्य अर्थः अनुमानादिनैव गम्यते, यथा- 'अस्ति प्रेत्यभावः', 'अस्ति मोक्षः' इत्यादिः सः अदृष्टार्थः। सत्यो नाम यथार्थः शब्दः यथा आदित्यः प्रकाशते, सन्ति आयुर्वेदोपदेशाः, सन्ति साध्यानां व्याधीनां सिद्ध्युपायाः इत्यादयः। सत्यविपरीतस्तु अनृतः, यथा 'वह्निः अनुष्णः' इत्यादिः।

एतावता साङ्ख्यवैशेषिकन्यायादिदर्शनेषु दृष्टानि प्रमाणानि अस्माभिः अत्र प्रदर्शितानि।

अधुना आयुर्वेदैकलभ्यं शास्त्रस्यास्य प्रतितन्त्रसिद्धान्ततया निरूप्यमाणं विशिष्टं प्रमाणान्तरम् उच्यते युक्तिः इति व्यपदेशेन। तथा च चरके सूत्रस्थानस्यैकादशोऽध्याये 'युक्तिः' इति पृथक्प्रमाणं चरकाचार्यैः प्रतिपादितं दृश्यते। बहुकारणयोगजान् भावान् या बुद्धिः पश्यति सा युक्तिः इति तत्स्वरूपम्।

बुद्धिः पश्यति या भावान् बहुकारणयोगजान्।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया।।

तथा च बुद्धिर्नाम ज्ञानम्। येन कारणेन बहुकारणयोगजः भावः उपलभ्यते तज्ज्ञानं युक्तिः। अनेन एवं भवितव्यमित्येवं रूपः ऊहः युक्तिः इति चरकटीकाकारस्य चक्रपाणेः मतम्। तथा हि जलं, कर्षणसंस्कृता भूमिः, बीजं, ऋतुश्चेति चतुष्टयं तस्य सम्भवे हेतुः। नैकेन कारणेन केनापि सस्यं सम्भवति, चतुर्णां कारणानां संयोगेन सस्यमुत्पद्यते। एवं बहुभिः मिलितैः कारणैः किञ्चित्कार्यं भवतीति यज्ज्ञानं तद्युक्तिसंज्ञकम्। जल-बीज-कर्षण-कालसंयोगं दृष्ट्वा कृषीवलस्य यद्भाविसस्य ज्ञानं जायते, तद्युक्तिः इति संज्ञितम्। तदुच्यते चरके -

In Public domain. Digitization Muthulakshmi Research Academy

जलकर्षणबीजर्तुसंयोगात् सस्यसम्भवः।
युक्तिःषड्धातुसंयोगात् गर्भाणां सम्भवस्तथा।।
मध्यमन्थनमन्थानसंयोगादग्निसम्भवः।
युक्तियुक्ता चतुष्पादसंपद्व्याधिनिबर्हिणी।।[२४] इति।

एतादृशज्ञानमनुमानमेव न अनुमानाऽतिरिक्तमिति चरकटीकाकर्तुरभिप्रायः। युक्तिर्नाम अविनाभावः, साध्यसाधनयोः नियमेन साहचर्यमित्यपि अर्थः चक्रदत्तेन अन्यत्र[२५] सूचितः। तेन युक्तेः अनुमाने एव अन्तर्भावो भवेत्। न्यायशास्त्रे युक्तेः पृथक् प्रमाणत्वेन उल्लेखो न दृश्यते। शान्तरक्षितेन विदुषा युक्तिः प्रमाणान्तरमिति स्वीकृतं, चरकमतस्य मण्डनमपि कृतम्। तत्र अनुमानयुक्त्योः पार्थक्यमेवं प्रदर्श्यते यत् अनुमाने यथा दृष्टान्तो भवति, तथा युक्तौ न भवति। एकः कारणकलापः योगस्वरूपः अन्यस्माद्योगाद्भिन्न एव भवति, तज्जन्यं कार्यमपि अनन्यसाधारणमेव। एवं सर्वस्याऽपि स्वस्ववैशेष्यात् तज्ज्ञानाय दृष्टान्तो नैव विद्यते। अत एव युक्तेः अनुमानाद्भिन्नत्वमिति शान्तरक्षिताशयः। आधुनिकविज्ञाने experiment इत्युच्यमानस्य प्रयोगसंज्ञकस्य प्रमाणस्य युक्तिप्रमाणेन साम्यं दृश्यते। अतः युक्तिः नाम प्रयोग इत्यपि केचित् मन्वते। यथा वा तत्तच्छास्त्रेषु स्वस्वसिद्धान्तनिरूपणोपयोगीनि प्रमाणानि स्वीकृतानि दृश्यन्ते यथा मीमांसकानां अर्थापत्तिप्रमाणं, साहित्यकाराः, प्रतिभाप्रमाणं, तान्त्रिकाः चेष्टाख्यप्रमाणं स्वीकुर्वन्ति तद्वदेव वैद्यके बहुकारणसंयोगेन एकः कार्यविशेषः भवतीति योगस्य, तन्नाम भेषजयोजनायाः विशेषत्वात् युक्तिः इति पृथक् प्रमाणं चरकाचार्याः सम्मन्यन्ते। एतदेवाश्रित्य चिकित्सायामपि 'युक्तिव्यपाश्रयचिकित्सा' इति व्यपदेशेन विशिष्टां पद्धतिमाचरन्ति आयुर्विदः इति एतावता आयुर्वेदादृतानि पञ्चापि प्रमाणानि यथामति यथावकाशं निरूपितानि भवन्तीति शम्।

निबन्धान्तटिप्पण्यः

१.बृ.आ.३.९.१	२.च.सू.३०.२६	३.सु.सू.१५.४१
४.च.शा.१.३०	५.च.सू.८.१२	६.च.सू.८.१३
७.च.सू.८.१६	८.च.सू.११.२०	९.च.वि.४.४
१०.च.वि.८.३९	११.च.सू.१.१६,१७	१२.च.शा.१.२४
१३.सु.शा.१.१४	१४.सु.शा.१.१५	१५.च.वि.४.४
१६.च.सू.११.२१,२२	१७.च.वि.८.४५	१८.च.वि.८.४५-५७
१९.च.वि.८.४२	२०.च.सू.११.७	२१.च.सू.११.१८,१९
२२.च.वि.४.४	२३.च.वि.८.३८	२४.च.सू.११.२३-२५
२५.च.वि.४.६		

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणसामान्यनिरुक्तिः

डा. के. विश्वनाथः

सुविदितमेवैतत् सर्वेषामेव वादिनां यत् प्रमा नाम काचित् अबाधितविषयिणी प्रतितिः अस्ति इति तस्याः असाधारणं कारणं किञ्चित् प्रमाणशब्दवाच्यमस्ति इति च। प्रमाणेयत्तां प्रति विप्रतिपन्नाः अपि वादिनः प्रमाणस्य अस्तित्वे परं नैव विप्रतिपयन्ते। तत्र किमिदं प्रमाणं नाम? किमस्य स्वरूपं? किं वा लक्षणं? इति सामान्यविचारः कश्चित् प्रस्तूयते।

प्रमाणशब्दो हि भगवता न्यायभाष्यकारेण वात्सायनेन एवं व्युत्पादितः 'उपलब्धि साधनानि प्रमाणानि इति समाख्यानिर्वचनसामर्थ्यात् बोद्धव्यम्। प्रमीयते अनेन इति करणार्थाभिधानः हि प्रमाणशब्दः'[१] इति।

अयमभिप्रायः - 'माङ् माने शब्दे च'[२] इत्यस्मात् धातोः प्रोपसर्गकात् प्रमाशब्दः यथार्थज्ञानवाची तावत् निष्पन्नः। तस्याः प्रमायाः असाधारणे कारणे प्रमाणशब्दः प्रयुज्यते निरूढ्या। योगः अपि तत्र प्रदर्शयितुं शक्यः। 'करणाधिकरणयोः च'[३] इति सूत्रेण करणार्थे विवक्षिते 'ल्युट् च'[४] इति सूत्रेण ल्युट्प्रत्ययस्य करणे प्रमाणशब्दस्य निष्पत्तेः। प्रकृतिप्रत्ययार्थस्वरूपयोगिकार्यस्याऽपि सम्भवात् इति।

यद्यपि अनया व्युत्पत्या ज्ञानकारणमित्येतावानेव अर्थः लभ्यते, स च न विवक्षितः ज्ञान-सामान्यसाधनेषु इन्द्रियसन्निकर्षादिषु प्रमाणशब्दाप्रयोगात्, तथापि भगवता भाष्यकारेण एव 'तद्विशेषसमाख्यायाः अपि तथैव व्याख्यानम्'[५] इति वाक्येन प्रत्यक्षादिशब्दानामपि करणव्युत्पत्तिमेव दर्शयित्वा पुनः 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यम्, अव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्'[६] इति प्रत्यक्षसूत्रव्याख्यानावसरे विशिष्टकारणवाची प्रत्यक्षशब्दः इति 'यत् प्रत्यक्षज्ञानस्य विशिष्टं कारणं तत् उच्यते'[७] इति भाषणात् तत्सामान्येन प्रमाणशब्दस्यापि कारणविशेषः एव अर्थः इति शक्यते वदितुम्।

विशिष्टकारणशब्देन च असाधारणं कारणमेव अभिप्रेतमिति प्रतिपादयन्ते वार्तिककाराः। तेषां वाक्यं 'यत् प्रत्यक्षस्य असाधारणं कारणं तत् अभिधीयते'[८] इत्यस्मिन् अर्थे उपोद्बलकं भवति। ततश्च तत्सामान्यात् प्रमायाः असाधारणं कारणमेव प्रमाणशब्दस्य अर्थः इति लभ्यते। असाधारण-कारणता च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणता इति परिष्कारे प्रमात्वावच्छिन्न-कार्यतानिरूपिता कारणता अत्र लभ्यते इति कृत्वा प्रमाणस्य स्वरूपमिदमेव यत् एतादृशकारणताश्रयः

। उपाचार्यः, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः.

In Public domain. Digitization Muthulakshmi Research Academy

इति एतादृशकारणत्वं च लक्षणमिति सिद्धं भवति। प्रमाणशब्दप्रतिपाद्यस्तु दर्शितः एव। यदि च स्वरूपविशेषजिज्ञासा तर्हि प्रत्यक्षादिकं एव स्वरूपमिति लब्धमेवास्ति।

न्यायमञ्जरीकाराः जयन्तभट्टाः तावत् 'अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम्'[९] इति वाक्येन यथार्थज्ञानजनककारणसमुदायरूपा सामग्री एव प्रमाणमिति प्रतिपादयन्ति।

ननु च अत्र पूर्वोक्तया रीत्या प्रमीयते अनेन इति व्युत्पत्या प्रमाणशब्दः प्रमाकरणे अर्थे वर्तते। करणं च 'साधकतमं करणम्'[१०] इति पणिनीयसूत्रोक्तरीत्या अतिशयितं साधनमेव भवति। साधकतममित्यादिसूत्रे तमबः ग्रहणात्। तमबश्च 'अतिशायने तमबिष्ठनौ'[११] इति सूत्रेण 'अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः'[१२] इति वृत्तिविवृतेन अतिशयविशिष्टस्य स्वार्थस्य विवक्षणे एव विधानात्। ततश्च यानि कारणानि सन्ति तेषु एकमतिशयितं कारणमेक एव करणशब्दस्य अर्थः स्यात्।

यदि च सामग्री प्रमाणशब्दवाच्या स्यात् तर्हि सकलकारणकलापरूपायाः तस्याः एकत्वात् किमपेक्षया अतिशयः वक्तुं शक्यते। न च अन्येभ्यः अतिशयः साम्प्राप्तः। कारणेषु हि अतिशयितं कारणमेकं भवति नतु कारणाकारणयोः। यथा हि द्वयोः विदुषोः एकः अतिशयं भजते नतु विद्वद्विदुषोः अयमतिशयितः विज्ञानी इति वक्तुं युक्तमिति।

अपि च कस्मिन् विषये सामग्र्याः करणत्वमुच्यते यावता प्रमाविषयः कर्मभूतः सामग्र्यामन्तर्भूत एव। यावता प्रमाविषयः एव कर्मकारकमपि। ततश्च करणमेव भवेत्। एवञ्च प्रमायाः विषयः एव न स्यात्।

किञ्च कर्तृकारकस्यापि सामग्र्यामेव अन्तर्भूतत्वात् प्रमाता अपि न सिध्येत् । प्रमाणजनितप्रमायाः आश्रय एव हि प्रमाता उच्यते। स च इदानीं सामग्र्यां प्रमाणे एव लीनः नाऽतिरिक्तोऽस्ति।

किञ्चातः? यदि कर्मकर्त्रादिकारकं पृथक् न निर्देष्टुं शक्यते तर्हि अर्थवति प्रमाणे प्रमाता प्रमेयं प्रमितिः इति अर्थवन्ति भवन्ति चतसृषु च एवं विधासु अर्थतत्वं परिसमाप्यते[१३] इति भाष्योक्तदिशा वस्तुचातुर्विध्यभङ्गप्रसङ्गः। एकस्यैव प्रमाणस्य इदानीं निरूपणात्।

लौकिकाः अपि हि दीपेन पश्यामः आलोकेन अवलोकयामः चक्षुषा निरीक्षामहे इत्याद्यमेव व्यवहारं कुर्वन्ति न तु सामग्र्या पश्यामः इत्येवमादिकं व्यवहारं कुर्वन्ति।

अतश्च सामग्र्याः कारणत्वमेव नास्ति किमुत करणत्वम्। अतः प्रमाणत्वं न तरां वक्तुं शक्यते इति महानाक्षेपः।

In Public domain. Digitization Muthulakshmi Research Academy

अत्रेदं मञ्जरीकृतां समाधानम्। एकैकस्य कारणस्य तावत् कार्योत्पत्तौ अतिशयः न वक्तुं शक्यः सर्वेषामेव कार्यजनने व्याप्रियमाणत्वात्। न च व्यापारवत्वातिशय इति वाच्यम्; प्रत्यक्षादौ तादृश व्यापरस्य संयोगादिरूपस्य विषयेऽपि सत्वेन करणत्वाऽऽपत्तौ ज्ञानस्य निरालम्बनत्वापत्तेः तदवस्थत्वात्।

नापि सहसैव कार्यजनकत्वमतिशयः इति युक्तः। यतः सोऽपि कस्याञ्चित् अवस्थायां करणस्य इव कर्मणः अपि शक्यते वक्तुम्। यथा अविरलजलधरधारा प्रबन्धवद्धान्धकारानिवहे बहुलनिशीथे सहसामेव स्फुरता विद्युल्लतायाः आलोकेन कामिनी ज्ञानमादधानेन तज्जन्मनि सातिशयत्वमवाप्यते एवमितरकारकसमूहसन्निधाने सत्यपि अन्तरेण विषयविशेषं तद्दर्शनं न जायते सम्पन्नमात्रे तस्मिन् तु भवति इति कर्मकारकस्य अपि अतिशययोगात् कर्मत्वं स्यात्। ततश्च पूर्वोक्तः एव दोषः।

तस्मात् फलोत्पादाऽविनाभावित्वमवश्यतया कार्यजनकत्वमतिशयः वक्तव्यः। स च न एकस्य कारणस्य सम्भवति इति सामग्र्याः एव करणत्वं वक्तव्यं भवति। सम्पन्नायां सामग्र्यां प्रमायाः उत्पादे तदाश्रयरूपकर्तुः तद्विषयरूपस्य प्रमेयस्य च मुख्यत्वसम्भवात् सामग्र्यधीनात्मलाभवतोः तयोः सामग्र्यपेक्षया अतिशयवत्वाऽसम्भवात्।

यत्तु इदमुक्तं सामग्र्याः एकत्वेन इतरकारणापेक्षया अतिशयासम्भवः इति। तत्तु, सामग्रीदशायामपि कारकाणां तद्वारकाणामनपायात् तदपेक्षयाऽपि अतिशयः सम्भवति इति प्रतिवक्तुं शक्यते। कारणसाकल्यरूपसामग्रीदशायामपि एकैककारणस्वरूपस्य अनपायात्।

यद्यपि च इयं सामग्री कारणैः समुदितैः जाता अतिरिक्ता इति वक्तुं शक्यते यथा तन्तुपटलजातः पटः ततः अतिरिक्तः तथाऽपि पृथगवस्थितेषु स्थालीजलज्वलनतण्डुलादिषु समुदायप्रतीतेः अयावत्समुदितेषु च सत्वात् तथैव उपलम्भात् च पृथक्तया प्रतीतिः अस्त्येव इति सामग्र्याः करणत्वमितरकारणापेक्षया अतिशयश्च वक्तुं शक्यत एव।

यदपि च दीपेन पश्यामि इत्यादयः व्यपदेशाः एकैकस्य कारणस्य करणतां तृतीयाविभक्तिनिर्देशात्प्रतिपादयन्ति इति तदपि सामग्रीधर्ममतिशयं दीपादौ अध्यारोप्य व्यपदेशाः इति वक्तुं सुशकम्। यथा स्थाल्या पचति काष्ठेन पचति इत्यादयः व्यपदेशाः इति समाधातुं शक्यम्।

अतः फलमव्यभिचारिणीमविसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणमिति साध्वेव उक्तमिति।

अपरे पुनः एवमभिप्रयन्ति[१४] सामग्री नाम समुदितानि कारणानि इति अविवादम्। यदि सा कारणेभ्यः अतिशयवती उच्येत तर्हि एवमुक्तं स्यात् यत् पृथगवस्थितानि कारणानि कर्मकर्त्रादि-

In Public domain. Digitization Muthulakshmi Research Academy

व्यपदेशभाञ्जि भवन्ति। तान्येव समुदितानि सामग्रीपदवाच्यानि समुदायिभ्यः अतिशयं भजन्ते करणशब्दभाञ्जि च इति। न युक्तिमत् भाति तत्। अतः एवं वक्तव्यं कर्मकर्तृव्यतिरिमक्तव्यभिचारिणीमर्थोपलब्धिं विदधत् कारणं प्रमाणशब्दवाच्यम्। ईदृशस्यैव च प्रमाणस्य/करणस्य तृतीयया निर्देशः चक्षुषा पश्यामि दीपेन पश्यामि इत्यादौ उल्लेखः भवति इति अभ्युपगन्तव्यम्।

इयञ्च व्यवस्था ज्ञानक्रियायां तत्र कर्मकर्तृकरणानां त्रयाणामेव कारकाणां वर्तमानत्वात्। पाकादिक्रियायान्तु आधारादिकारकाणि अपि सन्ति इति तेभ्यः अपि व्यतिरिक्तं कारणमेव तासु क्रियासु करणं वाच्यम् भवति इति।

परन्तु अत्र तमबर्थः अतिशयः कः इति तु वक्तव्यम्। लोके हि विस्मृत्यापि अहं मया पश्यामि घटं घटेन पश्यामि इत्यादयः प्रयोगाः न क्रियन्ते अपि तु दीपेन अहं घटं पश्यामि इत्यादयः एव। तर्हि इदं सम्पन्नं यत् करणविभक्तिनिर्देश्यस्य दीपादेः कर्मकर्त्रादि वैलक्षण्यं तावत् अस्ति अनुभवसिद्धम् । इदमेव च वैलक्षण्यमतिशयः भविष्यति तृतीया निर्देश्यस्य।

एवञ्च सति अर्थचातुर्विध्यमस्मिन् पक्षे साधुतरमुपपद्यते। अयमेव पक्षः साधीयान् इति। तर्हि अस्मिन् पक्षे संशयविपर्ययरहितार्थबोधविधायिकारणं करणं प्रमाणशब्दं च इति स्थितम्। इदमेव च भाष्यादौ प्रमाणशब्देन तत्र तत्र व्यवहृतमिति च उपोद्धलकमस्य पक्षस्य मन्यन्ते इति शम्।

निबन्धान्तटिप्पण्यः

१. न्या.भा.१.१.३
२. बृ.धा.रू.३८६
३. पा.सू.३.३.११७
४. पा.सू.३.३.११५
५. न्या.भा.१.१.३
६. न्या.भा.१.४
७. न्या.भा.१.१.४
८. न्या.भा.वा.१.१.४
९. न्या.म.१.१.३
१०. पा.सू.१.४.४२
११. पा.सू.५.३.५५
१२. वै.सि.कौ.५.३.५५
१३. न्या.भा.१.१.१
१४. न्या.म.पृ.३७

In Public domain. Digitization Muthulakshmi Research Academy

जातिशक्तिवादविमर्शः

डा. अं. वेङ्कट राधेश्यामः

प्रसिद्धमेवैतत् खलु यत् विविधदर्शनेषु प्रमिति, तदसाधारणकारणेषु नैकविधाभिप्रायः दरीदृश्यते। एवमेव तत्तत्प्रमाणसहकारिषु कारणान्तरेषु अपि मतभेदः दृश्यते। यथा प्रमाणत्वेनाभ्युपगतशब्दस्य सहकारिभूतयोः शक्तितज्ज्ञानयोः स्वरूपे न्यायमीमांसादर्शनयोः ऐकमत्यं मृग्यते। तदत्र यथासम्भवं तत्तन्मतप्रतिपादितयुक्तिप्रदर्शनपुरस्सरं गवादिपदानां शक्तिः विचार्यते।

तत्रैवं मीमांसकानां मतं -

नाऽगृहीतविशेषणा बुद्धिः विशिष्टेषूपजायते इति न्यायेन विशेषणाऽविषयिणी बुद्धिः विशिष्ट-विषयिणी न भवति। तथा च गवादिपदानां गोत्वादिरूपजातिविशिष्टव्यक्तौ शक्तौ कल्पनीयायां लाघवेन गोत्वादिरूपजातावेव शक्तिः कल्प्यते। अत एव यतः विशेषणं प्राप्य पदशक्तिः क्षीणशक्तिः भवति अतः एवं विशेष्यं न प्राप्नोति इत्यर्थिका, विशेष्यं नाभिधा गच्छेत् क्षोणशक्तिः विशेषणे इत्युक्तिः सङ्गच्छते। व्यक्तिशक्तिमतेऽपि स्वरूपतः व्यक्तेः भानाऽसम्भवेन शक्तिज्ञानप्रकारीभूतायां जातौ शक्तिः शक्यता-वच्छेदकता वा कल्पनीया भवति। व्यक्तावपि तत्कल्पनं गौरवमावहति प्रयोजनविरहश्च। अत्र शङ्का-जातिशक्तिमते इव व्यक्तिशक्तिमतेऽपि गोत्वादिजातयः शक्तौ शक्तिज्ञाने च उपलक्षणतया भासमानाः शाब्दबोधे भासन्ते इति न तत्र शक्तिकल्पनमिति चेत्, घटादिपदानां घटत्वाद्युपलक्षिते शक्तिस्वीकारे द्रव्यत्वाद्युपलक्षितेऽपि शक्तत्वेन घटादिपदात् अभ्रान्तानामपि द्रव्यत्वादिप्रकारकशाब्दबोधाद्यापत्या न गोत्वादिजातेः उपलक्षणत्वं सम्भवति। एवमेव यथा वा व्यक्तिशक्तिमते जात्यंशे शक्तिः शक्यतावच्छे-दकता वा निरवच्छिन्नैव तथा जातिशक्तिमतेऽपि सा निरवच्छिन्ना भवति इति न गोत्वत्वादीनां शक्यतावच्छेदककोटौ प्रवेशात् गौरवशङ्का। न हि जातिशक्तिमतेऽपि शाब्दबोधे सा किञ्चिद्धर्मप्रकारेण भासते, येन तादृशप्रकारभानार्थं प्रकारविशेषमन्तर्भाव्यैव शक्तिः कल्पनीया भवेत्। अपि तु स्वरूपत एव भासते। पुनः शङ्का - शक्तिग्रहः यत्र अनुमित्यादिरूपः जायते तत्र अनुमित्यादिसामान्यस्यैव किञ्चिदवच्छिन्नोद्देश्यताकत्वनियमात् गोत्वाद्यंशे गवादिपदवाच्यत्वविधेयिकायाः अनुमितेः विपरीतज्ञाना-ऽप्रतिबध्यायाः अप्रामाणिकतया अवश्यमेव गोत्वत्वादिरूपेणैव उद्देश्यत्वं स्वीकर्तव्यम्। तथा च गोत्वत्वादेः शक्यतावच्छेदकत्वं दुर्वारमेव, शक्तिग्राहकमानेन धर्मितावच्छेदकांशे तदवच्छेदकताग्रहे बाधकाभावात्। यदि च अवच्छेदकताग्रहे शक्तिग्रहस्य तदंशे भ्रमत्वं कल्प्यते, विषयबाधेन अवच्छेदकत्वमेव शक्ति-

---

उपनिदेशकः, परिशोधन-प्रकाशनविभागः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

ग्राहकमानेन न गृह्यते इत्येव वा स्वीक्रियते तदा प्रतियोगित्वकारणत्वादीनामपि तुल्ययुक्त्या अवच्छेदकत्वविलयप्रसङ्गः। यदि च प्रतियोगिदित्वादिबुद्धौ अवच्छेदकत्वभानमानुभविकमित्युच्यते, तदा तुल्ययुक्त्या शक्तिज्ञानेऽपि अवच्छेदकत्वभानमवश्यमङ्गीकार्यमुभयोरविशेषात्। एवं कथञ्चित् गोत्वत्वादौ शक्यतावच्छेदकत्वानङ्गीकारेऽपि शक्तिज्ञाननिष्ठकारणतायां गुरुशरीरस्य गोत्वत्वादेः धर्मितावच्छेदकत्वात्मकविषयता निवेशस्तु दुर्वार एवेति गौरवम्।

अत्र शङ्का - व्यक्तिशक्तिवादिमते स्वरूपतः गोत्वे धर्मितावच्छेदकत्वं कल्प्यते इति चेत्, न शाब्दबुद्धिं प्रति गोपदं गोत्वे शक्तमित्याकारिका निरूपितत्वसम्बन्धावच्छिन्नगोत्वनिष्ठप्रकारताकशक्तिनिष्ठप्रकारताकपदनिष्ठविशेष्यतानिरूपकशक्तिज्ञानस्य वा पदविशेष्यकशक्तिसम्बन्धावच्छिन्नगोत्वनिष्ठप्रकारताकस्य पदं गौः इत्याकारकस्य वा शक्तिज्ञानस्यैव कारणत्वस्वीकारात्, गोत्वांशे धर्मितावच्छेदकत्वकल्पनं न सम्भवति। अस्तु वा प्रकृतेऽपि गवादिविशेषणतापन्नस्यैव गोत्वादेः शक्तौ निरूपितत्वसम्बन्धेन, पदे शक्तिसम्बन्धेन स्वरूपतः प्रकारता, गवादेश्च शक्तौ स्वसमवेतनिरूपितत्वरूपपरम्परासम्बन्धेन, पदे वा स्वसमवेतवाचकत्वसम्बन्धेन प्रकारता, तथापि तादृशी गवादिविषयता न शाब्दबोधजनकतावच्छेदिका भवति। परम्परासम्बन्धेन प्रकारतायाः जनकतावच्छेदकत्वापेक्षया साक्षात्सम्बन्धेन प्रकारतायाः तथात्वे लाघवात् इति व्यक्तौ शक्तिः न सिद्ध्यति।

पुनश्शङ्का व्यक्तेः गवादिपदवाच्यत्वे गवादिपदात् व्यक्तेः स्मरणमनुभवश्च न स्यातामिति चेत्, पदाऽवाच्यस्याप्यन्वयस्य भानमिव व्यक्तेः शाब्दबोधे भानं नानुपपन्नम्। पुनश्शङ्का, तद्धर्मप्रकारकशाब्दवोधे तद्धर्मप्रकारकपदार्थोपस्थितेः कारणत्वेन गोत्वप्रकारकशाब्दबुद्धौ गोत्वप्रकारकस्मरणमपेक्षितम्। एवमेव व्यक्तिविषयकस्मरणं विना व्यक्तेः शाब्दबोधविषयत्वं न सम्भवति, अन्वयस्य संसर्गविधयैव भानमिति तस्य स्मरणं नापेक्षितम्। तथा च गोत्वस्य प्रकारतया भानोपपत्तौ, व्यक्तेः विषयत्वोपपत्तौ व्यक्तौ शक्तिः कल्पनीयैवेति चेत् पदात् न हि व्यक्तेः स्मरणमनुभवो वा किन्तु आक्षेपादेव। व्यक्त्याक्षेपिका च जातिरेव। आक्षेपश्चानुमानमर्थापत्तिः वा। जातिव्यक्त्योर्वैयधिकरण्यादाक्षेपः न सम्भवतीति चेत्, गोत्वं गवाश्रितं व्यक्त्याश्रितं वा गोत्वात् जातेः वा यन्नैवं तन्नैवमिति तादात्म्यसम्बन्धेन जातेः आधेयता सम्बन्धेन व्यक्त्याक्षेपकत्वे अविरोधः। वस्तुतः गामानयेत्यादौ स्वाश्रयवृत्तित्वादिरूपपरम्परासम्बन्धेन आनयनकर्मत्वादौ गोत्वादिजातेः अन्वयः शाब्दविषयः। तथा च तेन सम्बन्धेन गोत्वादिमत्त्वमाधेयतासम्बन्धेन गवादिमत्वं विना न सम्भवतीति आधेयतासम्बन्धेन आनयनकर्मत्वादौ गवादीनां शाब्दबोधप्रकारत्त्वम् आक्षेपलभ्यम्। गोत्वं गवाश्रितं गोनिष्ठभेदप्रतियोगिताऽनवच्छेदकधर्मत्वात्, गोत्वं किञ्चिदाश्रितं जातित्वात् इत्यनुमानतः व्यक्तिलाभः न सार्वत्रिकः। तादृशहेतूपस्थितेः असार्वत्रिकत्वात्। गवादिपदात् तेन रूपेण गोत्वादेः अनुपस्थितेश्च।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र शङ्का, गवादिपदात् व्यक्तेः अस्मरेण गोत्वादिस्मरणं नोपपद्यते। गोत्वप्रकारकस्मरणे व्यक्तेः नियमेन भानात्। गोत्वविशेष्यकस्मरणे च व्यक्तिघटितगोत्वत्वादेः प्रकारतया नियमेन भानात् गोत्वविशेष्यकस्मरणाङ्गीकारो न सम्भवति। यद्यपि व्यक्त्यघटित गोत्ववृत्तिप्रकारता सम्भवति, तथापि स्वरूपतः एव जातेः शक्यत्वमिष्टं तच्च धर्मान्तरविशेष्यतया गोत्वस्मरणात् न सम्भवति इति चेत्, न पदात् आलोचनरूपमेव स्मरणमङ्गीक्रियते। किञ्चिद्धर्मावच्छिन्नसम्वन्ध्युपरक्तसम्वन्धज्ञानाधीनतत्सम्बन्धिस्मृतेः सप्रकारकत्वनियमेऽपि निर्विशेषणकसम्बन्ध्युपरक्तसम्वन्धज्ञानात् निर्विकल्पकस्मरणाङ्गीकारे बाधकाभावात्। अतः गवादिपदानां जातिरेव वाच्या इति रीत्या जातिशक्तिवादिनां वादाः प्रवर्तन्ते।

समीक्षणम्

अत्र पदपदार्थसम्बन्धरूपायाः वृत्तेः तज्ज्ञानस्य वा एकसम्वन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या हि पदार्थोपस्थितौ कारणत्वम् अन्वयव्यतिरेकसिद्धम्। एवमेव याभ्यां रूपाभ्यां धर्मिणोः सम्बन्धः गृहीतः तदेकतरधर्मप्रकारेणधर्मिज्ञानं, तदिरधर्मप्रकारेण धर्मिणं स्मारयति इत्यपि नियमः। तथा च गवादिपदानां व्यक्त्यवाचकत्वेन शाब्दबोधे व्यक्तिभानमसम्भवि। एवमेव गोत्वादेः गवादिपदवाच्यत्वे शक्यतावच्छेदकतया गोत्वादिधर्माणां भाने गेत्वत्वस्य निखिलगोसमवेतत्वादिरूपस्य निखिलगोघटितस्य प्रवेशे महदगौरवम् इत्येवं रीत्या जात्यादिरूपविशेषणमात्रे शक्तिं निराकुर्वन्ति नैयायिकाः।

परन्तु आख्यातवाच्यः कर्ता इत्यङ्गीकारे शक्यतावच्छेदकतया कृतेः प्रवेशः कार्यः, कृतेश्च पुरुषकालादिभेदेन अनन्तत्वात्, आख्यातशक्यतावच्छेदकत्वेन गौरवमिति आश्रयं परित्यज्य कर्तृ-विशेषणीभूतायां कृतावेव लकारादीनां शक्तिमवधारयन्ति। एवञ्च एकत्र गवादिपदस्थले विशेषण-मात्रशक्तिस्वीकारे दोषान्वेषिणां नैयायिकानामाख्यातशक्त्यवधारणसन्दर्भे कृत्यादिरूपविशेषणमात्र-शक्तिस्वीकारे कथं न दोषानुलेपः इति चेत्।

सत्यम्, गवादिपदानां विशिष्टशक्तिस्वीकारे आग्रहवतां नैयायिकानामाख्यातस्य आश्रय-विनिर्मोकेण कृतिमात्रशक्तिस्वीकारे न दोषः प्रसजति। यतः गवादिपदानां गोत्वादिरूपजातिमात्रशक्ति-स्वीकारे व्यक्तिभानार्थमर्थापत्तेः अनुमानस्य वा प्रमाणान्तरस्य आश्रयणं कार्यम्। इदञ्च प्रमाणं न शब्दप्रमाणान्तर्गतम्। आख्यातस्य कृतिमात्रवाचकत्वेन आश्रयस्य कर्तुः लाभार्थं नातिरिक्तं किञ्चित्प्रमाणं आश्रयणीयम्। किन्तु समभिव्याहृत प्रथमान्तपदमेव। तथा च गवादिपदानां विशिष्टाऽवाचकत्वे व्यक्तिभानार्थं प्रमाणान्तरमाश्रयणीयं भवेदिति लकारादीनां कृतिशक्तत्वे च नातिरिक्तं प्रमाणम् आश्रय-णीयमिति गवादिपदानां विशिष्टवाचकत्वमेव स्वीकार्यमिति।

In Public domain. Digitization Muthulakshmi Research Academy

अद्वैतदर्शने प्रमाणप्रयोजनविवेचनम्

डा. धूळिपाळ रामकृष्णः

भगवत्पादपदाब्जपांसवः पान्तु सन्ततम्।
अपारासार संसार सागरोत्तारसेतवः।।

सुखमनुभवतः सार्वभौमस्य निद्रादोषवेन दरिद्रोस्मि, दुःखी, मम रक्षकः कोऽपि नास्ति, महारण्ये पतितः, कथं वा मम जीवनम् इति स्वप्नभ्रान्तिः यदि भवति तदा सार्वभौमत्वं सुखं तिरोहितं दुःखञ्च परिकल्पितम्। अत्र सार्वभौमोऽपि अन्यस्वरूपमापन्नः स्वरूपं विस्मृत्य काल्पनिकं दुःखमनुभवति। स एव प्रबुद्धश्चेत् काल्पनिकं सर्वं दुःखं निवर्तते पुनः सार्वभौमानन्दं प्रतिपद्यते च। तत्र स्वरूपानन्दस्याननुभवे, काल्पनिक दुःखस्यानुभवे आवरणविक्षेपशक्तियुक्तः स्वरूपावरकः एव कारणम्। आवरणशक्त्या स्वरूपमावृत्य विक्षेपशक्त्या कर्तृत्वभोक्तृत्वादिरूपं संसाराख्यं दुःखं कल्पयति।

एवं सत्वरजस्तमोगुणात्मकमावरणशक्तियुक्तमज्ञानं सच्चिदानन्दस्वरूपं परमात्मतत्त्वमावृत्य, परिच्छिन्नजीवभावं परिकल्प्य, तत्र कर्तृत्वभोक्तृत्वधर्मादिसंसारबन्धं परिकल्प्य जीवं संसारारण्ये सञ्चालयति। तथाच सुप्तस्य प्रबोधवत् अज्ञाननिद्रायां सुप्तस्य ब्रह्मसाक्षात्कारात्मकप्रबोधे जाते स्वप्राय - जीवत्व संसारभ्रमादिकं निवर्तते, स्वरूपानन्दश्च लभ्यते च।

एतादृशं सुखप्राप्तिदुःखनिवृत्तिरूपं फलमनुक्त्वा ब्रह्मसूत्रकारः 'अथातो ब्रह्मजिज्ञासा' इति प्रथमे सूत्रे ज्ञाधातुना फलत्वेनोक्तवानिति गम्यते। तथा च ब्रह्मज्ञानमेव दुःखनिवृत्तिसाधनं सुखावाप्तिसाधनञ्च भवतीति परमं सिद्धान्तं मनसि निधाय शारीरकमीमांसा भाष्यादौ भगवत्पादाः अध्यासभाष्यं रचयामासुः। तदेतद् -

सत्यज्ञानसुखात्मा केनायं शोकसागरे मग्नः।
इत्यालोच्य यतीन्द्रः प्रागध्यासं प्रदर्शयामास।।

इति श्रीपूर्णप्रकाशानन्दसरस्वतीस्वामिपादैः पूर्णानन्दीये प्रकाशितम्।

अध्यासभाष्ये ''तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहार-अलौकिका-अवैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि। कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति। उच्यते - देहेन्द्रियादिष्वहं ममाभिमानरहितस्य

आचार्यः विभागाध्यक्षश्च, संस्कृतविभागः, मारिस् स्टेल्ला कलाशाला, विजयवाडा.

In Public domain. Digitization Muthulakshmi Research Academy

प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः सम्भवति। न चाधिष्ठानमन्तरेण इन्द्रियाणां व्यवहारः सम्भवति। न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते। न चैतस्मिन्सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च। पश्वादिभिश्चाविशेषात्। यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते अनुकूले च प्रवर्तन्ते, यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति, एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान्प्रति प्रवर्तन्ते, अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनां च प्रसिद्धो विवेकपुरःसरः प्रत्यक्षादिव्यवहारः। तत्सामान्य-दर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादि व्यवहारस्तत्कालः समान इति निश्चीयते। शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकरी नाविदित्वात्मनः परलोकसम्बन्धमधिक्रियते तथापि न वेदान्तवेद्यमश-नायाद्यतीतमपेतब्रह्मक्षत्रादिभेदसंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते, अनुपयोगादधिकारविरोधाच्च। प्राक्च तथाभूतात्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते। तथा ब्राह्मणो यजेत इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादि विशेषाध्यासमाश्रित्य प्रवर्तन्ते। अध्यासो नाम अतस्मिंस्तद् बुद्धिरित्यवोचाम। तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मा-नात्मन्यध्यस्यति, तथा देहधर्मान् - स्थूलोहं, कृशोहं, गौरोहं, तिष्ठामि, गच्छामि, लङ्घयामि चेति। तथेन्द्रियधर्मान् - मूकः, काणः, क्लीबः, बधिरः, अन्धोहमिति। तथान्तःकरणधर्मान्कामसङ्कल्प विचिकित्साध्यवसायादीन्। एवमहं प्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति। एवमयमनादिरनन्तो नैसर्गिकोध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः'' इत्यस्य प्रमाणपरभाष्यमिति व्यवहारः।

एतादृशप्रमाणभाष्यगताः भगवत्पादोक्तीः शरणीकृत्य, ''अद्वैतदर्शनमेव सर्वेषु दर्शनेषु दर्शनीयतमं दर्शनीय''मिति न्यायरत्नावल्याम् प्रशंसितस्य अद्वैतदर्शनस्य जीवातुभूते ह्यध्यासे प्रमाणनिरूपणेन तत्प्रयोजनं प्रदर्श्यते। तथा हि - ''व्यवहारे भाट्टनयः'' इत्यद्वैतिनां समयः। प्रत्यक्षानुमानोपमानशब्दार्थापत्त्य-नुपलब्धिप्रामाण्यवादिनो भाट्टाः। अद्वैतेपि तान्येव प्रमाणानि। प्रकृते तमेतमविद्याख्यमित्यारभ्य विधिप्रतिषेधमोक्षपराणि इत्यन्ते प्रमाणभाष्ये प्रत्यक्षं, व्यवहारान्यथानुपपत्तिश्चेति प्रमाणद्वयमध्यासे प्रदर्श्यते। यथा - प्रमातृ-प्रमाण-प्रमेय, कर्तृ-कर्म-कार्य, भोक्तृ-भोग-भोग्यत्वलक्षणस्य व्यवहारत्रयस्य

In Public domain. Digitization Muthulakshmi Research Academy

शरीरेन्द्रियादिष्वहं ममाध्यासपुरस्सरत्वं प्रत्यक्षमिति प्रत्यक्षोपन्यासः कृतः। जडजडतादात्म्यस्याहं ममेत्यादि प्रत्यक्षानुभवसिद्धत्वस्य सर्वजनीनत्वात्।

सर्वे प्रमातृ प्रमाण प्रमेय व्यवहाराः आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य प्रवृत्ता इति तेषामाध्यासिकत्वमर्थात्सिद्धं भवति। सर्वथापि प्रमातृत्वाद्यन्यथानुपपत्तिः तद्व्यवहारान्यथानुपपत्तिर्वा आत्मानात्मनोरितरेतराध्यासे प्रमाणं दर्शितं भवति। कारणं विना कार्यानुपपत्तेः। अर्थापत्तिपदं प्रमाण-परं न प्रमापरं देवदत्तोध्यासवान् इत्याकारकार्थापत्तिरूपप्रमाकरणमर्थापत्तिः। तथा च अध्यासं विना व्यवहारो न सम्भवतीति व्यवहाररूपकार्यार्थापत्तिरध्यासे प्रमाणम्।

"देवदत्तकर्तृको व्यवहारस्तदीयदेहादिष्वहं ममाध्यासमूलः, तदन्वयव्यतिरेकानुसारित्वात्, यदित्थं तत्तथा यथा मृन्मूलो घटः" इत्यनुमानमपि अध्यासे प्रमाणम्। यथा मृदन्वयव्यतिरेकानुसारित्वात् मृन्मूलो घटः तथा अध्यासान्वयव्यतिरेकानुसारित्वादध्यासमूलको व्यवहारः।

एवञ्च प्रमाणानामविद्यावद्विषयकत्वं यद्यपि प्रत्यक्षं, तथापि कथं केन अविद्यावद्विषयत्वं तेषाम् ? इति कथमित्यादिना भाष्येणाक्षिपति भाष्यकारः। ततः 'उच्यते' इत्यारभ्य 'पश्वादिभिश्चा-विशेषा'दित्यन्तं भाष्यं - किमध्यासमूलत्वे प्रत्यक्षादीनां - प्रत्यक्षादि प्रमाणमिति तेषु व्यवहारो न सम्भवतीत्युच्यते? किं वा निराश्रयाण्येव प्रत्यक्षादीनि प्रमाणानि प्रमेये व्याप्रियन्ते? अतस्तेषां नाविद्यावद्विषयत्वमिति? अथवा तदाश्रयस्याध्यासमन्तरेणैव देहादिसम्बन्धमात्रात्तद्विषय व्यापार इति? किं वा देहेन्द्रियाहिसम्बन्धं विनैवात्मनः प्रमातृत्वमिति? अथवा आत्मनः प्रमातृत्वमन्तरेण ततः प्रमाणप्रवृत्तिरिति? आहोस्विद् उक्ताध्यासप्रमाणस्य अर्थापत्तेः विवेकिव्यवहारे व्यभिचारित्वात् प्रत्यक्षादेः नाविद्यावद्विषयत्वमिति? व्यभिचारित्वेपि किं विवेकिलौकिकव्यवहारे व्यभिचारः? किं वा शास्त्रीयव्यवहारे? इत्येतेषां पक्षाणां समाधानरूपं प्रवृत्तम्।

अत्रायमनुमानप्रयोगो विवक्षितः - 'विपश्चितः अविद्यावन्तः व्यवहर्तृत्वात् पश्वादिवत्' इति।

'यथाहि' - इत्यारभ्य 'प्रवर्तन्ते' इत्यन्तेन सामान्यतोनुकूलप्रतिकूलविज्ञानविषये प्रमाण-प्रमेयव्यवहारमूलप्रवृत्तिनिवृत्ती अभिधाय 'यथा दण्डोद्यतकरम्' इत्यारभ्य 'तं प्रत्यभिमुखीभवन्ति' इत्यन्तेन तद्विशेषविषये उदाहृतवान्। एवं पुरुषाः इत्यारभ्य 'तत्कालः समान इति निश्चीयते' इत्यन्तेन लोकसिद्धं पश्वादीनां प्रवृत्तिनिवृत्तिलिङ्गकं प्रमाणप्रमेयव्यवहारमभिधाय लोकसिद्धं व्युत्पन्नचित्तानां व्यवहारेपि तत्समानतामाह। तस्य व्यवहारस्य काल एव अध्यासस्य कालः स च पश्वादिभिर्विवेकि-नामपि समानः।

In Public domain. Digitization Muthulakshmi Research Academy

एवं तानि प्रत्यक्षादीनि प्रमाणानि चक्षुरादिसाधनानि। तानि च नाधिष्ठानशून्यानि व्याप्रियन्ते। अधिष्ठानं च देहः। न तेनाध्यस्तात्मभावेन असङ्गस्य अविकारिणश्चैतन्यैकरसस्यात्मनः प्रमातृत्वमुपपद्यते इत्यनुभवारूढमविद्यावद्विषयत्वं प्रत्यक्षादीनामुपदिश्य, पश्वादिव्यवहारसाम्येन लौकिके, तथा शास्त्रीये व्यवहारे इत्यादिना तस्याप्यविद्यावद्विषयत्वं प्रदर्शितम्। तत्त्वमसीति वाक्यार्थावगमादर्वागविद्याकृतं संसारमहमुल्लेखमाश्रित्य प्रवर्तमानं शास्त्रम् अविद्यावद्विषयत्वं नातिवर्तते। तस्माद् प्रत्यक्षादीनां प्रमाणानां (शास्त्रस्य च) अविद्यावद्विषयत्वम्। प्रत्यक्षानुमानार्थापत्तिभिरेवाध्याससिद्धिः न भवति। आगमोपि विधेर्बोद्धारमधिकरणं ब्राह्मणादिशब्दैरनुवदंश्चेतनाचेतनयोरैक्यावभासं दर्शयति। यथा - ब्राह्मणो बृहस्पतिसवेन यजेत, राजा राजसूयेन यजेत, वैश्यो वैश्यस्तोमेन यजेत इत्यादीनि शास्त्राणि ब्राह्मणत्वादि वर्णाध्यासं, ब्रह्मचार्यवकीर्णी नैऋतं गर्दभमालभेत इत्यादीनि चाश्रमाध्यासम्, अष्टवर्षं ब्राह्मणमुपनयीतेत्यादीनि च वयोध्यासं, जातपुत्रः कृष्णकेशोग्नीनादधीतेत्यादीनि चावस्थाध्यासः, ज्योतिष्टोमेन यजेत स्वर्गकामः, गतश्रियोधार्योग्निरित्यादीन्यात्मनि कामगतश्रीत्वाद्यध्यासम् एवं ब्राह्मणो न सुरां पिबेत्, ब्राह्मणः प्रव्रजेत् इत्यादीनि निषेधमोक्षपराणि शास्त्राणि वर्णाश्रमाध्यासं चाश्रित्य शास्त्रलिङ्गानां प्रवृत्तिः।

तदेवमनुपपत्तिप्रमाणेन आत्मानात्मनोः परस्पराध्यासे सिद्धे दृढमूलत्वात्तत्प्रत्यक्षमपि स्वविषयात्प्रच्याव्यान्यथा न नेतुं शक्यते इति तदपि तत्र प्रमाणं सिद्धम्। एवम् अध्यासे प्रमाणं प्रसाधितम्।

वेदान्ता हि सम्भावितदोषपौरुषप्रत्यक्षापेक्षया प्रबला न प्रत्यक्षानुरोधेनान्यथानयनमर्हन्ति। प्रत्यक्षन्तु नाहमर्थमेकं गोचरयति - यतः कदाचित् शरीरं, कदाचिदिन्द्रियम्, कदाचिन्मन इत्यव्यवस्थयैवाहमर्थः प्रत्यक्षतोवगम्यते, व्यवस्थितश्चार्थो वेदान्तवाक्यैः। तानि ह्येकमेवात्मानं स्पष्टं बोधयन्ति।

ब्रह्मज्ञानस्य मोक्षः प्रयोजनं निर्दिष्टम्। पुरुषार्थवस्तुकामनानन्तरं यत्र प्रवृत्तिरुपदिश्यते, तस्य तत्साधनत्वमप्यर्थात् निर्दिष्टं प्रतीयते। तथा सति कुतस्तन्मोक्षसाधनं ब्रह्मज्ञानं भवतीत्यपेक्षायामर्थादस्माच्छास्त्राद्भवतीति शास्त्रस्य ब्रह्मज्ञानं विषयो निर्दिष्टः। 'यथा चायमर्थः सर्वेषां वेदान्तानामित्यादिना' भाष्येन प्रथमसूत्रेणार्थादुपात्तविषय प्रयोजनसिद्धिहेतुरध्यासस्सूपपादितः। अध्यासे प्रमाणनिरूपणेन प्रमाणप्रयोजनं सुव्यक्तमिति शम्।

In Public domain. Digitization Muthulakshmi Research Academy

द्वैतनये प्रत्यक्षस्वरूपम्

डा. ए.वि.नागसम्पिगे

प्रत्यक्षसामान्यलक्षणम्

'अदुष्टमिन्द्रियं त्वक्षम्'[१] 'निर्दोषाक्षोद्भवं ह्यत्र'[२] 'निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम्'[३] इत्यादि स्थलेषु श्रीमदानन्दतीर्थभगवत्पादाचार्यैः क्वचिद् अदुष्टेन्द्रियस्य, क्वचित् सन्निकर्षस्य च प्रत्यक्षत्वमभिहितम्। धर्मिप्राधान्यविवक्षयाऽदुष्टमिन्द्रियमित्युक्तिः । छिदाकरणस्य परशोरिव अर्थसन्निकर्ष अवान्तरव्यापारः। अवान्तरव्यापारप्राधान्यविवक्षया सन्निकर्षः प्रत्यक्षमिति द्वितीयलक्षणोक्तिः।

प्रत्यक्षप्रमाणविभागः

इन्द्रियं द्विविधं प्रमातृस्वरूपं तद्भिन्नं च। तत्र प्रमातृस्वरूपमिन्द्रियं साक्षीत्युच्यते। साक्षिस्वरूपविषये उत्तरत्र निरूपयामः। 'मनःषष्ठा-नीन्द्रियाणि'[४] इति गीतोक्तदिशा साक्षिभिन्नानि षट् ज्ञानेन्द्रियाणि। तदुक्तं प्रमाणलक्षणे - 'प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेन'[५] इति।

इन्द्रियाणामर्थैः साक्षात् सन्निकर्षः

नैयायिकमत इव सन्निकर्षषाड्विध्यमत्र नोपयते । इन्द्रियाणां स्वस्वविषयैः साकं साक्षादेव सम्बन्ध अङ्गीकृतः । उक्तं हि प्रमाणपद्धतौ- 'सर्वेन्द्रियाणां स्वस्वविषयैः साक्षादेव रश्मिद्वारा सम्बन्धः'[६] इति । इन्द्रियाणां तैजसत्वेन रश्मिद्वारा तेषां विषयसम्बन्धः भवितुमर्हति । रश्मिद्वाराऽर्थसन्निकर्षः भवतीति श्रीमट्टीकाकारवचनं तु चक्षुरिन्द्रिय-मात्रविषयकमिति केचन व्याचक्षते ।

प्रत्यक्षं चतुर्विधम्

ईश्वरप्रत्यक्षं लक्ष्मीप्रत्यक्षं योगिप्रत्यक्षम् अयोगिप्रत्यक्षं चेति प्रत्यक्षं चतुर्विधम् । तत्राद्यद्वयं स्वरूपेन्द्रियात्मकमेव । उत्तरद्वयं तु स्वरूपेन्द्रियबाह्येन्द्रियभेदेन द्विविधम् । तत्तदिन्द्रियज्ञानविषय एवेन्द्रियविषयः । ज्ञानमप्युक्तदिशा चतुर्विधम् । तत्र सर्वार्थविषयकं यथार्थं स्वतन्त्रमनादिनित्यं चेश्वरज्ञानम् । निरतिशयस्पष्टं च । ईश्वरेऽसर्वविषयकमपि तदितरत्रानालोचने सर्वविषयकं लक्ष्मीज्ञानम्। ईश्वरैकाधीनं तदपेक्षया स्पष्टत्वे किञ्चिन्न्यूनं च । अत्र च सम्यगर्थ-विषयीकारित्वादिरूपः विषयघटितो ज्ञानधर्मः न स्पष्टत्वपदेनोच्यतेऽपि त्वपरोक्षत्ववत् ज्ञानगतः जातिविशेष एव स्पष्टत्वपदेनोच्यते। योगप्रभावलब्धातिशयं योगिज्ञानम् । तदपि ऋजुयोगि-तात्त्विक-अतात्त्विकयोगिज्ञानभेदेन त्रिविधम्।

निदेशकः, पूर्णप्रज्ञासंशोधनमन्दिरम्, बेङ्गलूरु.

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्मुखब्रह्मपदयोग्याः जीवाः ऋजवः उच्यन्ते । ईश्वरादन्यत्रालोचने सर्वविषयकं तद्ज्ञानम् । तद् द्विविधं - स्वरूपं मनोवृत्तिरूपं चेति । तत्र स्वरूपमनादिनित्यम् । योगप्रभावातिशयात् मुक्तिपर्यन्तं व्यक्त्यतिशयोपेतं मुक्तावेकप्रकारम् । मानसवृत्तिज्ञानं तु प्रवाहतोऽनादि । योगजप्रत्यक्षजन्यम् । मुक्तावुपचितस्यान्तःकरणस्याभावेन वृत्तिज्ञानं नेष्यते । द्वयमपि ऋजूनां नियमेन यथार्थम् ।

ऋज्वतिरिक्तास्तत्त्वाभिमानिनो देवाः तात्त्विकाः । प्रधानमहत्तत्त्वाहङ्कारादितत्त्वाभिमानित्वात् प्रेरकत्वाच्च तात्त्विका उच्यन्ते । अनादित्वे सतीश्वरादन्यत्रालोचनेऽप्यसर्वविषकं तद्ज्ञानम्। तदपि स्वरूपं बाह्यं चेति द्विविधम् । स्वरूपस्यानादित्वं याथार्थ्यं चास्ति । बाह्यं कदाचिदयथार्थमपि भवितुमर्हति।

तात्त्विकव्यतिरिक्ता देवादयो योगिनः अतात्त्विकाः। ईश्वरादन्यत्राल्पज्ञानयुक्तं तद्ज्ञानं पूर्ववद् स्वरूपं वृत्तिरूपं चेति द्विविधम् । व्यक्त्यतिशयोपेतमादिमत् । अत एव सादीति व्यवह्रियते। अन्यं तु प्रवाहरूपम्। अतात्त्विकयोगिव्यतिरिक्ता जीवाः अयोगिनः। ईश्वरादन्यत्राज्ञानप्रचुरं तज्ज्ञानम् । तदपि पूर्ववद् द्विविधमुत्पत्तिविनाशवच्च । अयोगिजीवा मुक्तियोग्याः नित्यसंसारिणः तमोयोग्याश्चेति त्रिविधाः । तत्र मुक्तियोग्यानां स्वरूपज्ञानं यथार्थमपि बाह्यमयथार्थमपि । नित्यसंसारिणां स्वरूपज्ञानं मिश्रं तामसानामयथार्थमेव । बाह्यं तूभयविधम् । बाह्येन्द्रियं दैव-आसुर-मध्यमभेदेन त्रिविधम् । तत्र यथार्थज्ञानप्रचुरं दैवम्। अयथार्थज्ञानप्रचुरमासुरम् । स्वरूपेन्द्रियमुत्तमानां विषयस्वरूपे प्रकारे च यथार्थमेव । अधममध्यमानां तु स्वरूपे यथार्थमयथार्थं च प्रकारांश इति विज्ञेयम्। सर्वमेतत् प्रमाणपद्धतौ प्रमाणलक्षणे च स्फुटमिति नाकरान्वेषणप्रयासः कार्यः। विशेषस्तु अनुव्याख्यानसुधायां द्रष्टव्यः।

साक्षिस्वरूपम्

द्वैतनये साक्षिणः प्रमाणत्वेन प्रत्यभिज्ञानात् तस्य कुत्र अन्तर्भावः किं स्वरूपम् इति किञ्चिद् विमृशामः । आत्मस्वरूपमेव साक्षीत्युच्यते । अनुभवसाधनत्वादात्मन एव साक्षीन्द्रियमिति व्यवहारः । तस्य प्रत्यक्ष एवान्तर्भावं ब्रूमः ।

अयमभिप्रायः। द्विविधमिन्द्रियम् । प्रमातृस्वरूपं तद्भिन्नश्चेति । तत्र स्वरूपेन्द्रियं साक्षीत्युच्यते। चेतन एव आन्तरपदार्थद्रष्टृत्वात् साक्षीत्युच्यते । स च ज्ञानरूपः स्वप्रकाशश्च । तस्य आत्मस्वरूपं मनः आत्मधर्मभूताश्चाऽन्तराः ज्ञानेच्छाप्रयत्नसुखदुःखभयाभयकृपाऽविद्यादयः तदभावाश्च विषयाः। एवं बाह्याः आकाशकालद्व्यणुकपरमाणुप्रकृत्यादयोऽपि साक्षीन्द्रियग्राह्याः ।

In Public domain. Digitization Muthulakshmi Research Academy

ननु तार्किकमत इव मन एव सुखदुःखादिकं गृह्णाति इति कुतो नोच्यत इति चेत्, मैवम्। स्वरूपेन्द्रियभिन्नैरिन्द्रियैः जायमानं ज्ञानं क्वचिद् भ्रमरूपमपि दृश्यते। यदि ज्ञानेन्द्रियाणां क्वचिद् भ्रमजनकत्वमस्ति तर्हि ज्ञानमात्रे प्रामाण्यसन्देहः सुस्थ एव । न हि सुखदुःखादिविषये कदाचिदपि विभ्रममनुभवामः । तेन ज्ञायते, इदं च ज्ञानं न विभ्रमजनकेन्द्रियजन्यमिति । विभ्रमाऽजनकश्चेन्द्रियं साक्षिरूपमेव । तदुक्तमनुव्याख्याने -

भ्रमत्वमभ्रमत्वं च सर्वं वेद्यं हि साक्षिणा।
स चेत् साक्षी क्वचिद् दुष्टः कथं निर्णय ईयते।।
विशेषास्सर्व एवैते साक्षिप्रत्यक्षगोचराः।
ऊरीकृत्य च तान् सर्वान् व्यवहारः प्रवर्तते।
साक्षिणो व्यवसायी तु व्यवहारोऽभिधीयते।।
तस्मात् सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये।
साक्षी निर्दोष एवैकः सदाऽङ्गीकार्य एव नः।।[8]

किञ्च अनुभूतपदार्थविषयकं कदाचिदप्यभ्रमरूपं सुखदुःखादिविषयकं ज्ञानं सर्वेषामस्तीति सुविदितम् । इदं च निर्णयात्मकं ज्ञानं साक्षीन्द्रियग्राह्यमित्युच्यते । भिन्नेन्द्रियजन्यज्ञानप्रामाण्ये अनाश्वासपरिहाराय पुनः प्रमाणान्तरान्वेषणेन अनवस्थादिदोषसद्भावेऽपि साक्षिणः स्वप्रकाशत्वेन स्वस्य तत्प्रामाण्यस्य च तेनैव ग्रहणाङ्गीकारेण नानवस्थादिदोषप्रसक्तिः । उक्तोऽयमर्थोऽनुव्याख्याने-

नियमेन सुखाद्येषु प्रामाण्यं साक्षिगोचरम् ।
स्वप्रामाण्यं सदा साक्षी पश्यत्येव सुनिश्चयात् ।।
ज्ञानस्य ग्राहकेणैव साक्षिणा मानतामितेः ।।
दोषाभावे प्रमाणत्वं दोषाभावस्य साक्षिणा ।।
निश्चितत्वं क्वचिच्चैव स्वतः प्रामाण्यमिष्यते ।।
अतो न सर्वमानानां प्रामाण्यं निश्चितं भवेत् ।
साक्षिणा निश्चितं यत्र तत्प्रामाण्यं स्वलक्षणम् ।। इति ।
न हि कश्चित् सुखाद्येषु संशयं कुरुते जनः ।
न चैवाखिलमानानि निश्चिनोत्यखिलो जनः ।।[9] इति च ।

अयमाशयः - सुखज्ञाने जाते तत्र क्वचिदपि संशयविपर्ययादर्शनेन प्रामाण्यं स्वरसत एवानुभूतम्।

In Public domain. Digitization Muthulakshmi Research Academy

इदं च प्रामाण्यज्ञानं साक्षीन्द्रियग्राह्यम् । साक्षिणः स्वप्रकाशत्वेन स्वस्य स्वगृहीतज्ञानस्य च प्रामाण्य-ग्रहणे संवादानपेक्षात् नानवस्थादिदोषप्रसङ्गः ।

अविज्ञाते अननुभूते च वस्तुनि साक्षी, प्रामाण्यं न गृह्णाति दोषाभाव एव प्रमाणमिति व्यवस्थया प्रवर्तते । तदुक्तं - 'साक्षी प्रामाण्यं गृह्णन् दोषाभाव एव प्रमाणमित्येव व्यवस्थया गृह्णाति' इति । प्रामाण्यग्रहणे साक्षिणः स्वारसिकशक्तिसद्भावेन दोषाभावस्य प्रयोजकत्वमात्रमभ्युपगम्यते । साक्षी ज्ञानमात्रं गृहीत्वा पश्चात् क्वचिद् जिज्ञासायां सत्यां परीक्षया ज्ञानप्रामाण्यं गृह्णातीत्यनङ्गीकारे सर्वेषामपि ज्ञानानां प्रथममेव प्रामाण्यं विज्ञायेत । न चैतदानुभाविकम् । तेन उक्तैव व्यवस्था युक्ता । साक्षिणः प्रामाण्यग्रहणस्वभाववत्त्वेन क्वचिदपि कस्यचिदपि सुखदुःखानुभवादौ न संशयो जातः । बाह्येऽननुभूतेऽर्थे तु व्यवस्थया प्रामाण्यग्रहणमित्युक्तम् ।

सौषुप्तिकानुस्मृतिः साक्षिणमन्तरा नोपपद्यते। सुदृढनिर्णयस्वरूपस्य साक्षिणोऽनङ्गीकारे ज्ञानेषु अनाश्वासपरिहारोपायाभावेन अनवस्थादिदोषप्रसक्तेः, कदाऽप्यनाश्वासाऽविषयकस्य सुखादि-विषयकजन्यज्ञानस्य प्रामाण्यं साक्षिवेद्यमित्येव वाच्यम् । किञ्च, अस्ति तावत् सर्वेषाम् 'एतावन्तं कालमहं सुखमस्वाप्सम्' इति सुषुप्त्युत्तरकालीनानुस्मृतिः । न चेयं स्मृतिः अनुभवमन्तरोपपद्यते । न च सुषुप्तिदशायां सुखाज्ञानकालग्राहकमान्तरं मनो जागर्ति । तदुपरमस्यैव सुषुप्तित्वात् । एवञ्च सुखकालाज्ञानादिग्राहकं किमपि इन्द्रियं स्वरूपभूतमङ्गीकरणीयमेव, यदभावे सौषुप्तिकानुस्मृति-र्नोपपद्यते । तच्चेन्द्रियं स्वरूपभूतं स्वप्रकाशं साक्षिशब्दव्यपदेश्यमिति युक्तमुत्पश्यामः । विवृतोऽयमर्थः श्रीमन्न्यायसुधायाम्- 'सुषुप्तौ हीन्द्रियाणामुपरतत्वान्न बाह्यप्रत्यक्षानुमानागमानां तत्र प्रवृत्तिः । अस्ति तदाऽपि कालप्रतिभासः । 'एतावन्तं कालं सुखमहमस्वाप्सम्' इति सुषुप्त्युत्थितस्य परामर्श-दर्शनात् । न ह्यननुभूतस्य परामर्शो युज्यते, अतिप्रसङ्गात् । अतः परिशेषात्साक्षिवेद्य एवेति गम्यते। अत्रायं प्रयोगः - 'कालः बाह्यप्रत्यक्षाद्यतिरिक्तप्रमाणवेद्यः, असत्स्वपि तेषु प्रतीयमानत्वात्, यत् यस्मिन्नसति प्रतीयते तत्ततोऽतिरिक्तप्रमाणवेद्यम् । यथाऽसति चक्षुषि प्रतीयमानो गन्धस्तदतिरिक्त-घ्राणवेद्यः'[१०] इति।

प्रामाण्यस्य परतस्त्वेऽनवस्था

ज्ञानग्राहकेणैव प्रामाण्यग्रहणमित्यनङ्गीकारे, ज्ञानग्राहकमन्यत् प्रामाण्यग्राहकञ्चापरमित्युक्ते, अनवस्था दुर्वारैव । तथा हि - प्रामाण्यं तावत् अवश्यं केनचित् प्रमाणेन अवगन्तव्यमेव । अन्यथा निःशङ्कप्रवृत्तिर्नोपपद्येत । निःशङ्कप्रवृत्त्यन्यथानुपपत्त्या प्रामाण्याध्यवसायस्य वक्तव्यत्वेन जातेऽपि ज्ञाने तत्र प्रामाण्यानुपलब्धौ, ज्ञानगतसंशयस्य अर्थसंशयपर्यवसायित्वेन प्रवृत्त्यनुपपत्त्या ज्ञाने

In Public domain. Digitization Muthulakshmi Research Academy

प्रामाण्यग्रहणम् आवश्यकमित्येव वाच्यम् । एवञ्च ज्ञानग्राहकातिरिक्तेन प्रामाण्यग्रहणाङ्गीकारे तत्प्रामाण्यमप्यन्येन ग्राह्यमित्यप्रामाणिकपरम्पराकल्पनेनानवस्थाप्राप्तेः । यद्यनवस्थाभिया कुत्रचित्स्वतस्त्वाङ्गीकारे प्रथमस्यैव तथात्वाङ्गीकारः सुकरः । तथा चानुमानम् । 'ज्ञानगतं याथार्थ्यं तद्ग्राहकेणैव ग्राह्यम्, ग्राहकान्तरानुपपत्तौ सत्यां गृह्यमाणत्वात् । यद्यतोऽन्येन अनुपपद्यमानग्रहणं गृह्यते तत्तेनैव ग्राह्यम् । यथा - चक्षुषोऽन्येन अनुपपद्यमानसाक्षात्क्रियमाणं रूपं चक्षुषेव साक्षात्क्रियत इति।'[११]

ननु साक्षिवेद्यत्वेऽप्यनवस्था दुर्वारैव । ज्ञानग्राहकः साक्षी ज्ञाने प्रामाण्यं गृह्णाति । तत्प्रामाण्यमपि प्रमाणान्तरेण प्रसाधनीयम् । एवं तत्रापि, इति अप्रामाणिकपरम्पराकल्पनातः अनवस्था कथं परिह्रियते इति चेत्, अत्रोच्यते- साक्षी हि स्वयंप्रकाशः स्वात्मानं स्वप्रामाण्यञ्च गोचरयतीत्युक्तम्। अतोऽत्र प्रामाण्यपरतस्त्ववाद इव नाप्रामाणिकपरम्पराकल्पनम् । उक्तं चानुव्याख्याने- 'न परीक्षानवस्था स्यात् साक्षिसिद्धे त्वसंशयात्' इति ।

विवृतोऽयमर्थः सुधायाम्- 'एतदुक्तं भवति- स्यादियमनवस्था यदि सर्वत्र परीक्षापेक्षा स्यात् । न चैवम् । सन्दिग्धे खल्वर्थे परीक्षाऽपेक्ष्यते । न त्वसन्दिग्धे । संशयश्च मनोवृत्तिविषये पानीयादौ भवति न पुनः साक्षिसिद्धे सुखादौ । अतस्तावदेव परीक्षा यावत्साक्षिगृहीतेषु सुखादिष्ववतार इति कुतोऽनवस्था इति।'[१२]

वृत्तिज्ञानं न स्वप्रकाशम्

प्राभाकराः ज्ञानस्य स्वप्रकाशत्ववादिनः । तेषामयमाशयः - 'इदमहं जानामि' इति ज्ञानाकारः। तन्मते ज्ञाने आत्मांशः स्वात्मांशः वेद्यांशश्चेति त्रितयमवभासते । घटमहं जानामीति व्यवसायज्ञाने मितिः, तदाश्रय आत्मा माता, घटादिकं मेयमवभासते । इत्थं च व्यवसायज्ञानं, स्वरूपं विषयीकुर्वत् स्वनिष्ठं प्रमात्वमपि विषयीकरोतीति ज्ञानस्य स्वप्रकाशत्वं प्रतिपादितम् ।

अत्रेदमनुसन्धेयम् - जडं वृत्तिज्ञानं न स्वप्रकाशं भवितुमर्हति । अन्तःकरणवृत्तेर्ज्ञानस्य जडत्वेन जन्यत्वेन च स्वयंप्रकाशत्वायोगः । 'एतावन्तं कालं सुखमस्वाप्सम्' इति सौषुप्तिकानुस्मृतिः सर्वानुभवसिद्धेत्युक्तम् । अयं चानुभवः न मनआदीन्द्रियैर्भवितुं युक्तः । सुषुप्तिकालावच्छेदेन मनस उपरतत्वात् । तस्मात् साक्षिरूप एवायम् अनुभव इति साक्षिणः स्वप्रकाशत्वसाधने अस्ति सती युक्तिः । इयञ्च च युक्तिः अप्रकाशस्वरूपत्वाद् जडे ज्ञाने न प्रवर्तते । प्रवर्तते च आत्मस्वरूपभूते साक्षिणि । तस्मान्न ज्ञानमात्रस्य साक्षीन्द्रियभिन्नस्य स्वप्रकाशत्वम् ।

युक्तीनां बुद्धिदोषमात्रनिरासकारणत्वम्

न च ज्ञानस्य प्रामाण्यस्य च साक्षिग्राह्यत्वे कापि युक्त्यनुसन्धानमनपेक्षितमिति वाच्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

साक्ष्येव ज्ञानं प्रामाण्यमपि गृह्णातीत्यत्र न विप्रतिपत्तिलेशः । यत्र क्वचित् मानसोपनिपातजेन बुद्धिदोषेण ज्ञानं गृह्णन् साक्षी न प्रामाण्यग्रहणाय प्रवर्तते तत्रैव हि बुद्धिदोषनिरासार्थं युक्त्यनुसन्धानमपेक्षते । क्वचित् परीक्षासापेक्षः साक्षी प्रामाण्यं गृह्णातीत्येतावता न सर्वत्र परीक्षापेक्षा विद्यते । अदुष्टबुद्धीनां परीक्षानिरपेक्षेण साक्षिणा प्रामाण्यानुभवस्य विद्यमानत्वेन न परीक्षायाः प्रामाण्यकारणत्वमपि तु आहितबुद्धिदोषनिरासमात्रकारणत्वम् ।

तदुक्तं तत्त्वनिर्णयटीकायाम्- 'अयमभिसन्धिः । साक्ष्येव ज्ञानं तत्प्रामाण्यं च विषयीकर्तुं क्षमः। किन्तु कारणान्तरोपनिपातजेन मानसाऽपराधेन प्रतिबद्धो ज्ञानमात्रं गृहीत्वा तत्प्रामाण्यग्रहणस्य नेष्टे । यथा स्वयमेव गतिसमर्थोऽपि गजो गोक्षुरकादिना प्रतिबद्धो न चलितुं क्षमते । तत्र तु युक्त्यनुसन्धानलक्षणपरीक्षावसरः । सा च बुद्धिदोषमात्रं निर-स्यति । तस्मिन्निरस्ते साक्षी स्वमहिम्नैव प्रामाण्यं गोचरयति । यथा गोक्षुरकाद्यपसरणे स्वयमेव गजो गच्छति । ततः प्राचीनो युक्त्युपन्यासः साक्षिणः प्रामाण्यग्रहणप्रतिबन्धकबुद्धिदोषनिरासार्थमेव कृतो न तु प्रामाण्यज्ञानार्थमिति न पूर्वोत्तरविरोधः'[१३] इति।

प्रामाण्यस्य स्वतस्त्वेऽपि संशयोपपत्तिः

प्रामाण्यस्य ज्ञानग्राहकसाक्षिग्राह्यत्वे तत्र तत्र संशयः कथमुपपाद्यते? अत्र ब्रूमः- ज्ञानग्राहकः साक्षी प्रामाण्यं गृह्णातीति नियमः औत्सर्गिकः । ज्ञानग्राहकस्य साक्षिणः प्रामाण्यग्रहणे शक्तिर्नैसर्गिकीत्येव अस्माकमाशयः । यत्र क्वचिद् बुद्धिदोषादिनिमित्तेन अस्वच्छे मनसि संशयो जायते, तदा प्रतिबद्धः साक्षी बुद्धिदोषरूपप्रतिबन्धकसामग्रीसत्त्वेन ज्ञानमात्रं गृहीत्वा प्रामाण्यं न गृह्णाति । बुद्धिदोषनिरासे च स्वमहिम्नैव साक्षी प्रामाण्यं गृह्णातीति न संशयानुपपत्तिदोषः न वा प्रामाण्यस्वतस्त्वभङ्गः।

नन्वेवं तर्हि युक्तीनां बुद्धिदोषनिरासद्वारा प्रामाण्यग्रहणकारणत्वेन प्रामाण्यं प्रति युक्तीनां कारणत्वमापतितमिति चेत्, मैवम् । यदभावे यन्नैव जायते तदेव तस्य कारणमुच्यते । प्रकृते च युक्त्यनुसन्धानाभावेऽपि बुद्धिदोषविधुराणां पुंसां प्रामाण्यज्ञानस्य अनुभूयमानत्वेन, तस्य कारणत्वे, सर्वत्रापि तत्पूर्ववृत्तित्वस्य अवश्यंभावित्वेन अनवस्थाया अपरिहार्यत्वापत्तेः । एतेनैव उदयनोक्ते 'प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात्' इत्यनुमाने हेतोः असिद्धिरप्युक्ता वेदितव्या।'

साक्षिणः प्रामाण्यग्रहणस्य स्वभावत्वे बौद्धादिवाक्यजनित- विज्ञानस्यापि प्रामाण्यं गृह्णीयाद् इत्याक्षेपपरिहारः ज्ञानग्राहकमात्रेण यदि प्रामाण्यग्रहणमिष्यते तर्हि ज्ञानग्राहकः साक्षी बौद्धाद्यागमजनितविज्ञानस्यापि प्रामाण्यं गृह्णीयात् । ततश्च बौद्धदर्शनमपि प्रमाणमापद्येत । अन्यथा साक्षिणः प्रामाण्यग्रहणस्वभावत्वं भज्येत ।

In Public domain. Digitization Muthulakshmi Research Academy

अत्रोच्यते- ज्ञानग्राहकः साक्षी प्रामाण्यं गृह्णातीत्युत्सर्ग एव । विसंवादाद् अप्रामाण्यमपि गृह्णातीत्यस्माकं सिद्धान्तः । अत एव अप्रामाण्यं परत इत्युच्यते । सहकारिणः सहजशक्तिं प्रतिबध्य विपरीतशक्तिं जनयन्तीति सार्वजनीनमेतत् । विषस्य मारकत्वेऽपि वनस्पतिविशेषसंयुक्तस्य वैद्यकर्तृक-संस्कारविशिष्टस्य यथा जीवनप्रदत्वं सुप्रसिद्धं तथैव प्रामाण्यग्राहकस्यापि साक्षिणः विसंवादरूपसह-कारिवशाद् अप्रामाण्यज्ञानजननमपि उपपद्यत एव।[१४] एवञ्च च बौद्धादिवाक्यजनितविज्ञानस्य विसंवादसद्भावेन तत्र साक्षी इदमप्रमाणम् इत्येव गृह्णाति । तस्मान्न बौद्धादिदर्शनं प्रमाणं भवितुमर्हति। एवं तर्हि वेदजनितविज्ञानेऽपि अप्रामाण्यज्ञानमुत्पद्येत इति शङ्का तु दोषकलुषितमनसामेव पुंसां वेदादिशास्त्रे अप्रामाण्यबुद्धिर्जायते । सा च युक्त्यनुसन्धानेन निर्गच्छतीति प्रागेवोपपादितम् । ततश्च साक्षी तत्र प्रामाण्यं गृह्णात्येव ।

इदं रजमित्यादिव्यभिचारिस्थले प्रामाण्यग्राहकं मनः

एतेन इदं रजतमित्यादिज्ञानस्थले साक्षी प्रामाण्यं गृह्णाति न वा । नेति पक्षे स्वतस्त्वभङ्गः। आद्ये साक्षिणाऽपि अप्रामाण्यस्य ग्रहणेन मानसज्ञान इव साक्षिजन्यज्ञानेऽपि अप्रामाण्यशङ्का सुप्रतिष्ठिता इत्याशङ्काऽपि अपाकृता वेदितव्या । तथा हि - व्यभिचारिज्ञानस्थले साक्षी प्रामाण्यं नैव गृह्णाति । अर्थग्रहणकातरं चपलं चञ्चलं मनः तत्र प्रामाण्यं गृह्णाति । तेन च निष्कम्पप्रवृत्तिः सम्भवति । साक्षी तु दूरस्थत्वादिदोषालिङ्गितः प्रामाण्यग्रहणाय नेष्टे । विसंवादेन तत्र रजताभावज्ञाने जाते इदं रजतमिति यन्मानसं ज्ञानं जातं तदप्रमाणमिति विसंवादसापेक्ष एव साक्षी तत्राप्रामाण्यं गृह्णाति । तदुक्तम् आचार्यपादैः -

१. 'अमानस्य तु मानत्वं मानसत्वाच्चलं भवेत् ।'

२. 'यत्कचिद् व्यभिचारि स्याद् दर्शनं मानसं हि तत्'[१५] इति ।

३. प्रपञ्चितोऽयमर्थः निपुणतरं प्रकृत्यधिकरणसुधायां यथा- 'अयमर्थः । न साक्षी ज्ञानं गृह्णन् प्रमाणमेवैतदिति गृह्णाति । किन्तर्ह्यदोषं चेत्प्रमाणं सदोषमप्रमाणमिति व्यवस्थया । यद्वा त्वर्थित्वेन प्रामाण्यं निर्दिधारयिषितं तदा सजातीयविजातीयसंवादविसंवादभावाभावलक्षणया परीक्षया दोषाभावं निश्चित्य प्रामाण्यमवधारयति दोषदर्शने त्वप्रामाण्यम्'[१६] इति ।

अप्रामाण्यं परतः

अत्रेदं रहस्यम् - साक्ष्येव ज्ञानं प्रामाण्यं च गृह्णाति । अप्रामाण्यमपि गृह्णाति । एवं तर्हि प्रामाण्यस्य स्वतस्त्वमप्रामाण्यस्य परतस्त्वमिति विभागः कथमुपपद्यते इति चेत्, अत्रोच्यते - उभयोस्साक्षिग्राह्यत्वेऽपि प्रामाण्यग्रहणे साक्षिणः नियमेन संवादाद्यपेक्षा नास्त्येव । यत्र कचिद्

In Public domain. Digitization Muthulakshmi Research Academy

बुद्धिदोषेण प्रामाण्यग्रहणे प्रतिबन्धकं समापतति तदैव हि युक्त्यनुसन्धानेन बुद्धिदोषे निरस्ते साक्षी प्रामाण्यं स्वत एव गृह्णाति । अत्र प्रामाण्यग्रहणे युक्त्यनुसन्धानस्य न कारणत्वम् । यदि युक्त्यनुसन्धानं प्रामाण्यग्रहणकारणं स्यात् तर्हि सर्वत्रापि तदपेक्षा अवार्यैव भवति । ततश्च अनवस्था अपरिहार्यैव।

किञ्च बुद्धिदोषरहितानां पुंसां स्वत एव प्रामाण्यग्रहणस्य अनुभवसिद्धत्वेन तत्र युक्त्यनुसन्धानस्य न प्रयोजनं पश्यामः । अत एव साक्षिणः प्रामाण्यग्रहणे युक्त्यनुसन्धानस्याकारणत्वमुक्तम् । एवञ्च ज्ञानग्राहकस्य साक्षिणः प्रामाण्यग्रहणे विद्यमानां नैसर्गिकीं शक्तिमनुलक्ष्य प्रामाण्यं स्वत इत्युच्यते। अप्रामाण्यस्य साक्षिग्राह्यत्वेऽपि तस्य नियमेन विसंवादसापेक्षत्वेन आहितशक्त्यैव तद्ग्रहणमिति अप्रामाण्यमनुमेयं परत इत्याद्युक्तिः । तदुक्तं भगवत्पादाचार्यैः - दुष्टबुद्धीनामेव अप्रामाण्यशङ्केति परतोऽप्रामाण्यम् । प्रामाण्यं च स्वत एव सिद्धम्[१७] इति।

निबन्धान्तटिप्पण्यः

१. वि.वि.टी.पृ.३६०
२. ब्र.सू.अनु.२.१.२,श्लो.२७, पृ.६१
३. प्र.ल.पृ.३३
४. भ.गी.पृ.३३
५. प्र.ल.पृ.१२३
६. प्र.प.पृ.१४५
७. प्र.प.पृ.९४
८. ब्र.सू.अनु.२.३.१४, पृ.४२२१-४२२९
९. ब्र.सू.अनु.३.४.५,पृ.५२३३-५२३७
१०. ब्र.सू.अनु.सु. १.४.६., पृ.२१५९
११. वि.वि.टी.पृ.१५५
१२. ब्र.सू.अनु.सु. ३.४.५,पृ.५२२०
१३. वि.वि.टी.पृ.१६५

१४. ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्ग एव । विसंवादलक्षणात् परतोऽपवादादप्रामाण्यं च गृह्णाति । सहकारिणः सहजशक्तिं प्रतिबध्य विपरीतशक्तिं जनयन्तीति हि प्रसिद्धम् । दावदहनदग्धानां वेत्रबीजानां वेत्राङ्कुरमजनयित्वा कदलीकाण्डजनकत्वस्य दर्शनात् । अस्ति च बौद्धादिवाक्यजनितज्ञानस्य विसंवाद इति तदप्रमाणतया साक्षी गृह्णाति। (वि.वि.टी.पृ.१७८)

१५. ब्र.सू. अनु ३.४.५,पृ.५२२३
१६. ब्र.सू. अनु १.४.५,पृ.२२०५
१७. वि.वि.पृ.१७८

In Public domain. Digitization Muthulakshmi Research Academy

द्वैतदर्शने प्रमाणस्वरूपम्

आचार्यः अ.हरिदासभट्टः

मध्वाचार्यैः (१२३८-१३१७) प्रमेयं, प्रमाणं, सदाचारं चाधिकृत्य ग्रन्थाः ग्रथिताः। तेषु प्रमाणलक्षणं, प्रमालक्षणञ्च प्रमाणस्वरूपनिरूपणं कृतम्। श्रीमद्ब्रह्मसूत्रानुव्याख्यानेऽपि न विलक्षणत्वाधिकरणे प्रमाणमीमांसा विहिता। जयतीर्थभिक्षुरपि टीकाकारः प्रमाणस्वरूपविमर्शार्थं 'प्रमाणपद्धति' नाम ग्रन्थं निबबन्ध।

प्रमाणलक्षणम् द्वैतदर्शने यथार्थज्ञानं तत्करणञ्चेति उभयमेव प्रमाणमित्युच्यते। ज्ञानं भावव्युत्पत्या, करणं च करणव्युत्पत्या प्रमाणशब्देन गीयते। अतः तदुभयसाधारणं प्रमालक्षणमाचार्यैः प्रत्यपादि। 'याथार्थ्यमेव मानत्वं तन्मुख्यं ज्ञानशब्दयोः' इति। (अनु.२.१.१)

यथार्थं प्रमाणम् - यथाशब्दः अनतिक्रमार्थः। प्रमेयम् अनतिक्रम्य वर्तमानं प्रमाणम्। यथावस्थितार्थविषयीकारित्वं प्रमाणस्य लक्षणमित्यर्थः। यथा ज्ञानस्य सविषयत्वं तथा करणस्यापि इति मतम्। तथा च ज्ञाने करणे च लक्षणमिदं समन्वितं भवति। भ्रमस्तु विषयमतिक्रम्य तिष्ठति। स हि शुक्तिं रजतमिति अवगाहते। न हि रजतात्मता शुक्तेरस्ति। अतः नेदं यथार्थम्।

प्रमाणभेदः - तत्र यथार्थज्ञानं केवलप्रमाणम्। तत्साधनमनुप्रमाणम्। तदेतत् त्रिविधं प्रत्यक्षानुमानागमभेदात्।

'प्रत्यक्षम् अक्षयं पुरुषस्याक्षं स्वरूपे मुख्यमेव तु।' (ब्रह्मतर्कः)

प्रत्यक्षम् इत्यत्र अक्षशब्दः अक्षयं नाशरहितमिन्द्रियमाह। तानि च बाह्येन्द्रियाणि पञ्च, आन्तरं मनः, साक्षी च। तेष्वेतेषु सप्तसु मध्ये अक्षशब्दः साक्षिणि स्वरूपेन्द्रिये मुख्यः, अन्यत्र त्वमुख्यः। यतः सूक्ष्मरूपेण नित्यानि इन्द्रियाणि सृष्टिकाले तैजसाहङ्कारेण भूतांशैश्च उपचीयन्ते।

"गृहीत्वैतानि संयाति वायुर्गन्धनिवाशयात्।" (गी.१.८) इत्युक्तदिशा मनष्षष्ठानीन्द्रियाणि गृहीत्वा जीवः शरीरात् शरीरं बम्भ्रमीति। मोक्षे त इमानि न सन्त्येव। नित्यं स्वरूपेन्द्रियं साक्षीत्युच्यते। आत्मस्वरूपम्, अन्तःकरणवत्तेजः आकाशः कालश्च तद्विषयाः। सुप्तौ आत्मस्वरूभूतं सुखं साक्षिणा भासते। अत एव जाग्रत्काले 'सुखमहम् अस्वाप्सम्' इति सुप्तोत्थितस्य परामर्शः भवति। साक्षीन्द्रियं स्वप्रकाशं नियतयथार्थं च। वृत्तिज्ञानं तत्प्रामाण्यं च साक्षी गृह्णातीति प्रामाण्यं स्वतः।

प्राँशुपालः, पूर्णप्रज्ञासंस्कृतमहाविद्यालयः, बेङ्गलूरु, कर्णाटकराज्यम्.

In Public domain. Digitization Muthulakshmi Research Academy

मन इन्द्रियम् - स्मरणसाधनं मनः। स्मृतिश्च प्रमाणम्, प्रत्यक्षं च। 'मानस प्रत्यक्षजा स्मृतिः' इति आचार्यवचनम्। 'अयं घटः' इत्यनुभवः। 'सः घटः' इति स्मृतिः। तत्र अनुभव स्मृतौ च देश-कालसम्बन्धः भासते। परं तु अनुभवे सः वर्तमानतया भासते। स्मृतौ पुनः अतीतत्वेन। अतः अतीतत्वांशः मनसावसीयते। कदाचित् मन एव वृत्तिरूपं ज्ञानं, तत्प्रामाण्यं च गृह्णाति। 'यत्किंचिद् व्यभिचारि स्यात् दर्शनं मानसं हि तत्' इति आचार्योक्तदिशा मानसं प्रामाण्यज्ञानं भ्रमात्मकं भवति।

असत्ख्यातिः - द्वैतदर्शने भ्रमस्थले प्रतीयमानं वस्तु अत्यन्तासदित्यङ्गीक्रियते। 'असदेव रजतं प्रत्यभात्' इत्यनुव्यवसायः अनेन अनुकूलितः भवति। प्रतीयमानं सर्वमसदिति बौद्धवादः। देशान्तरस्थं रजतं प्रतीयते इत्यन्यथाख्यातिवादः। इदमर्थः सन् आरोप्यमात्रमसदिति द्वैतवादः। तदुक्तमाचार्यैः 'सतोऽसत्वप्रतीतिः, असतः सत्वप्रतीतिः' इति अन्यथाप्रतीतिरेव अन्यथाख्यातिः इति।

सन्निकर्षः - इन्द्रियाणां स्वस्वविषयैः सह सन्निकर्षः षोढा भिद्यते इति नैयायिकाः। साक्षादेव रश्मि-द्वारा सम्बन्धः इति द्वैतवादः। तैजसाहङ्कारांशैः उपचितानि इन्द्रियाणि प्राकशत्मकानीति रश्मिद्वारा सम्बन्धः उपपद्यते।

प्रत्यक्षज्ञानभेदः - प्रत्यक्षम् आत्मस्वभावमनुसृत्य भिद्यते। ईशज्ञानं, लक्ष्मीज्ञानं, योगिज्ञानं, अयोगिज्ञानम् इति चतुर्धा प्रत्यक्षस्य विभागः कृतः। तत्राद्यद्वयं स्वरूपात्मकम्। अन्तिमद्वयं स्वरूपं वृत्यात्मकं च। तदिदं निरूपितं प्रत्यक्षम्।

अनुमानम् - निर्दोषोपपत्तिः अनुमानम्। तज्ज्ञानमनुमितिकरणम्। अनुमानस्य लिङ्गस्य साध्यगमक-तौपायिकं व्याप्तिज्ञानमेव। न तु पक्षधर्मताज्ञानम्। "ऊर्ध्वदेशः वृष्टिमान् अधोदेशे नदीपूरात्" इत्यादौ पक्षधर्मताऽभावेऽपि अनुमित्युदयात्। तस्मात् हेतोः समुचितदेशवृत्तित्वमपेक्षितम्। तस्मादेव असिद्धिः न दोषाय।

व्याप्तिग्रहः - अविनाभावः व्याप्तिः। सा च धूमाग्न्योः प्रत्यक्षेण गृह्यते। गोत्वहननाभावयोः "गौर्न हन्तव्या" इति शास्त्रेण गृह्यते। व्यतिरेकव्याप्त्या अन्वययोः व्याप्तिः अनुमीयते। अत एव व्यतिरेकव्याप्तिः न साधनाङ्गं भवति। 'जीवच्छरीरं सात्मकं प्राणादिमत्वात्' इति केवलव्यतिरेकिस्थले व्यतिरेकव्याप्त्या अन्वयव्याप्तिः अनुमीयते। ततोऽनुमितिः।

पञ्चावयवनियमः - परार्थानुमाने पञ्चावयवनियमः नोररीक्रीयते। तत्र चेयं युक्तिः। परोपदेशः नागमतया प्रमाणम्। वादिनः प्रतिवादिनि अनाश्वासात्। किन्तु गृहीतव्याप्तिकस्य व्याप्तिस्मारकतया, अगृहीतव्याप्तिकस्य व्याप्तिज्ञानजनकतया च उपयुज्यते। स च क्वचित् एकेनैव स्यात्, क्वचित्पञ्चानामपि अपर्याप्तिः स्यात्। तस्मात् नावयववाक्यनिर्बन्धः।

In Public domain. Digitization Muthulakshmi Research Academy

हेत्वाभासः - अप्रसिद्धविशेषणत्वं न दोषाय, नापि पक्षाप्रसिद्धिः। सात्मकत्वस्य अनुमानात् पूर्वं अप्रसिद्धत्वेऽपि व्यतिरेकव्याप्त्या साध्येन सह हेतौ व्याप्तिमनुमाय साध्यसाधनसौलभ्यात्। पक्षस्य अप्रसिद्धत्वेऽपि तत्ज्ञानमात्रेण तत्र साध्यं साधयितुं शक्यते। यथा 'शशविषाणम् असत्, अप्रामाणिकत्वात्' इति।

आगमः - निर्दोषः शब्दः आगमः। अत्रापि शब्दज्ञानं करणम्। शक्तिस्मरणं सहकारि। ततः शाब्दबोधः। मध्ये पदार्थस्मरणं न स्वीक्रियते। शक्तिस्मरणेनैव पर्याप्तत्वात्।

अन्विताभिधानवादः - शक्तिः न ईश्वरेच्छा। किन्तु मीमांसादर्शनवत् पदार्थान्तरम्। सा च न पदार्थमात्रे। किन्तु योग्येतरान्विते शक्तं पदं पदान्तरसमभिव्याहारवशात् अन्वयविशेषं बोधयति। न च समभिव्याहारस्य कारणत्वं यद्यावश्यकं तर्हि किमन्वये शक्त्या ? अन्वयविशेषवत् अन्वयसामान्यस्यापि समभिव्याहारेणैव बोधसम्भवात् इति चेन्न। तत्राशक्तं तद्बोधकं इत्यस्य व्याहतत्वात्। अन्वये हि किञ्चिद्रूपेण शक्तिसत्वे तस्य हि पदान्तरसमभिव्याहारः किञ्चित् सहकुर्यात्। शक्तेरेव अभावे समभिव्याहारः किं कुर्यात् ? न हि शतमप्यन्धानां पश्यति। तस्मात् अन्विते पदानां शक्तिः।

योग्यता न हेतुः - आकाङ्क्षासन्निध्योः शाब्दबोधहेतुत्वेऽपि योग्यतायाः न शाब्दबोध प्रयोजकत्वम्। योग्यताभावेऽपि 'वह्निना सिञ्चति' इति वाक्यात् बोधो भवत्येव। कथमन्यथा तन्निराकरणम् ? अत एव वादिवाक्यस्य प्रतिवादनं प्रति अयोग्यार्थत्वेऽपि शाब्दबोधो जायते एव।

अपि च यदि योग्यताविरहे बोधाभावः अपार्थकात् अनन्वितार्थकस्य भेद एव न स्यात्। उभयत्र वोधाजननस्य तुल्यत्वात्। तदेवं निरूपितो सङ्क्षेपेण आगमः।

प्रमाणेषु प्राबल्यदौर्बल्यम् - 'क्व च प्रत्यक्षतः प्राप्तमनुमागमबाधितम्' इति वचनं त्रिषु प्रमाणेषु प्रत्यक्षस्य प्राबल्यं बोधयति। 'प्राबल्यमार्गस्यैव जात्या तेषु त्रिषु स्मृतम्' इति च आगमस्य प्राबल्यम्। एवं विप्रतिपत्तौ आगमोक्तस्य प्रत्यक्षविरोधे प्रत्यक्षमेवे प्रबलम्। यत्र पुनः प्रत्यक्षं नैव प्रसरति तत्र आगमोक्तमेव अङ्गीकार्यम्, इति व्यवस्था। अत एव 'यजमानः प्रस्तरः' इत्यत्र प्रत्यक्षाविरोधात् लक्षणा स्वीक्रियते। तस्मात् 'शास्त्रार्थयुक्तोऽनुभवः प्रमाणं तूत्तमं मतम्।'

In Public domain. Digitization Muthulakshmi Research Academy

स्मृतिज्ञानस्य प्रमात्वम्

डा. वासुदेवन्

ज्ञानं द्विविधं - स्मृतिरनुभवश्चेति प्रसिद्धम्। तत्र स्मरणम् अथवा स्मृतिः इति यो ज्ञानभेदः प्रथते, सोऽपि अनुभववदतीव मुख्यः। स्मृत्यैव वयम् अनेकानि कार्याणि निर्वहामः। कुलालादयः घटाद्याकारस्मृत्या एव घटादीन् निर्मान्ति। कवयः अर्थस्मृत्या एव कवयन्ति। प्रमाणेष्वपि व्याप्तिस्मृत्या एव अनुमानं प्रवर्तते। अतिदेशवाक्यार्थस्मृत्या एव उपमानं प्रवर्तते। पदजन्यपदार्थस्मृत्या एव शब्दप्रमाणं प्रवर्तते। स्मृतेः आवश्यकता कुत्र वा नास्ति? बुभुक्षितस्य भोजने प्रवृत्तिरपि तत्स्मृत्या खलु। ईदृशं च स्मृतिज्ञानं प्रमा वा न वेति विवदन्ते दार्शनिकाः। तद्विषयोयं प्रबन्धः।

संस्कारमात्रजन्यं ज्ञानं स्मृतिः इति स्मृतिलक्षणम्। संस्कारो नाम अनुभवजन्यः आत्मवृत्तिः गुणविशेषः। संस्कारे सत्येव पश्चात् स्मृतिः जायेत, संस्कारप्रमेषे स्मरणं नोद्भवति, 'विस्मृतम्' इति वादमः। संस्कारे च दृढे स्मृतिरपि निश्चयरूपा दृढा जायते। अस्मिन् स्मृतिलक्षणे मात्रपदानुपादाने प्रत्यभिज्ञायाम् अतिव्याप्तिः। 'सोऽयं देवदत्त' इत्यादि ज्ञानं प्रत्यभिज्ञा इत्युच्यते। इदं च स्मृतिभिन्नं प्रत्यक्षात्मकं ज्ञानमिति सम्मतम्। इदं च तत्तांशे संस्कारजन्यम्, इदमंशे इन्द्रियजन्यम्। अतः संस्कार-जन्यत्वेपि संस्कारमात्रजन्यत्वं नास्तीति नातिव्याप्तिः।

इतः क्रमेण मतभेदान् परिशीलयामः।

स्मृतेः प्रमात्वं नास्तीति न्यायपक्षः

अस्मिन् पक्षे गमकानि इमानि -

१. प्रमाणतन्त्रमिति प्रथिते न्याये चत्वारि प्रमाणानि सूत्रोक्तानि - प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः चेति।[१] तदनुसारेण प्रमा च चतुर्विधा - प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दः चेति। अत्र विभागे स्मरणात्मकं ज्ञानं नान्तर्भावितम्। तेन स्मरणम् अथवा स्मृतिः न प्रमा इति लभ्यते।

२. नवीनग्रन्थेषु च स्पष्टं विभज्यते इत्थं - 'ज्ञानं द्विविधं - स्मृतिरनुभवश्चेति। अनुभवः प्रमा, अप्रमा चेति द्विविधः। स्मृतिरपि द्विविधा - यथार्था अयथार्था चेति।' अत्र स्मृतिज्ञाने प्रमाऽप्रमाविभागः नोच्यते।[२]

३.किञ्च प्रमालक्षणम् अनुभवपदघटितम् उक्तं - 'तद्वति तत्प्राकरकः अनुभव' इति।[३] अत्र

उपाचार्यः, न्यायविभागः, श्रीशङ्कराचार्य संस्कृतविश्वविद्यालयः, तिरुवनन्तपुरम्, केरलाराज्यम्.

In Public domain. Digitization Muthulakshmi Research Academy

अनुभवपदं स्मृतेः प्रमात्वव्यवच्छेदाय। एवञ्च स्मृतिः न प्रमा इति सामान्यतः दर्शनकाराणाम् अभिप्रायः। अतः सम्प्रदायसिद्धमिदं स्मृतिः न प्रमेति।

प्राचीनाभिमतः प्रमात्वपक्षः

१.प्राचीनग्रन्थेषु न्यायसूत्रे, तद्व्याख्याने भाष्ये वा स्मृतिः न प्रमा इति कुत्रापि कण्ठतो नोक्तम्।

२. किञ्च तेषु अनुभवपदाघटितमेव स्मृतिसाधारणम् उक्तं प्रमालक्षणम्। यथा, यत् 'अर्थविज्ञानं सा प्रमितिः'[४] इति। 'उपलब्धिसाधनानि प्रमाणानि' इति भाष्यम्।[५]

३.न्यायात् प्राचीने वैशेषिकदर्शने सूत्रे एव स्मृतेः प्रमात्वम् अभिप्रेतं दृश्यते। यथा - 'इन्द्रियदेषात् संस्कारदोषात् चाविद्या' इति सूत्रम्।[६] अविद्या नाम अप्रमा। सा अनुभवे इन्द्रियदोषात् जायते। स्मरणे तु संस्कारदोषात् जायते इत्यभिप्रेतम्। एवं कथनेन ज्ञायते - स्मृतिरपि द्विविधा - विद्या, अविद्या चेति। संस्कारदोषे अविद्या अथवा अप्रमा स्मृतिः। संस्कारदोषाभावे तु विद्या अथवा प्रमा स्मृतिः इति। 'अदुष्टं विद्या'[७] इत्युत्तरसूत्रं च तत् दृढयति।

४.तत्पूर्वमपि वेदेषु इतिहासादिषु च स्मृतिं प्रमामेवाहुः। यथा तैत्तिरीयारण्यके श्रूयते - 'स्मृतिः प्रत्यक्षमैतिह्यम्। अनुमानश्चतुष्टयम्'[८] इति।

नवीनपक्षप्रादुर्भावः

न्यायवार्तिकतात्पर्यटीकाकारः वाचस्पतिमिश्र एव नवमशतकीय आदवाह - 'न च स्मृतिः प्रमा'[९] इति। अयमेव न्यायतन्त्रे अस्य स्मृतेः प्रमात्वाभावपक्षस्य उपज्ञाता इति वक्तुं शक्यते। तदनन्तरं तु नैयायिकाः उदयनादयः पक्षं तं स्वीचक्रुः।

अत्र च तैरुक्ता हेतव इमे -

१.लोकव्यवहाराभावात् इति तात्पर्यटीका। यथा - 'उपलब्धिहेतुः प्रमाणम्' इति न्यायवार्तिकम्। तद्व्याख्याने टीकायां, स्मृतेरपि उपलब्धित्वात् स्मृतिहेतोरपि प्रामाण्यप्रसङ्गः इत्याशङ्क्याह "प्रमाणशब्देन तस्यापास्तत्वात्। प्रमासाधनं हि प्रमाणम्। न च स्मृतिः प्रमा। लोकाधीनावधारणे हि शब्दार्थसम्बन्धः। लोकश्च संस्कारमात्रजन्मनः स्मृतेरन्याम् उपलब्धिम् अर्थाव्यभिचारिणीं प्रमाम् आचष्टे"[१०] इति।

२.स्मृतिहेतोः प्रमाणतया न्यायसूत्रे पृथक् अनुपदेशात् इति उदयनमतम्। सूत्रे हि प्रमाण-चतुष्टयातिरिक्तप्रमाणखण्डनं कृतम्। तदनुसृत्य उदयानाचार्य आह - "न च स्मृतिहेतौ प्रमाणाभि-युक्तानां महर्षीणां प्रमाणव्यवहारोस्ति"[११] इति।

In Public domain. Digitization Muthulakshmi Research Academy

३.अनुभवपारतन्त्र्यात् इति च उदयनमतम्। यथाह - 'पूर्वानुभव प्रमितिः, अनपेक्षत्वात्, न तु स्मृतिः, नित्यं तदपेक्षणात्। असमीचीने ह्यनुभवे स्मृतिरपि तथैव'[१२]इति। यथा नित्यम् अनुभवापेक्षः संस्कारः प्रमेति नोच्यते, तद्वत् स्मृतिरपि न प्रमाव्यवहारम् अर्हति इत्याशयः।

अतिनवीनन्यायमतम्

यद्यपि नव्यन्याये सम्प्रदानम् अनुरुध्य स्मृतेः प्रमात्वं नेष्टं, तथापि अतिनवीनन्यायमते क्वचित् स्मृतिः प्रमेत्युक्तम्। यथा मुक्तावल्यामाह - "स्मृतेः प्रमात्वम् इष्यते एव" इति। अत एव तत्र प्रमालक्षणे अनुभवपदं न घटितम्। तदाह - "तत्प्रकारं यत् ज्ञानं तद्वद्विशेष्यकं तत्प्रमा" इति कारिकावल्याम्।[१३] ज्ञानमित्युक्तत्वात् स्मृतिः अनुभवः इत्युभयं प्रमा इति तन्मतमवगम्यते।

श्रीवेदान्तदेशिकपक्षः

न्यायपरिशुद्धौ श्रीवेदान्तदेशिकः स्मृतेः प्रमात्वं साधयति। आदावेव - वयं तु ब्रूमः यथावस्थित-व्यवहारानुगुणं ज्ञानं प्रमा इत्युक्त्वा आह -

स्मृतिमात्राप्रमाणत्वं न युक्तिमिति वक्ष्यते।
अबाधितस्मृतेर्लोके प्रमाणत्वपरिग्रहम्।।[१४] इति।

अत एव स्वप्रणीतायां न्यायपरिशुद्धौ क्रमेण प्रत्यक्षाध्यायः, अनुमानाध्यायः, शब्दाध्याः इति परिकल्प्य चतुर्थं स्मृत्यध्यायं पृथक् कल्पयति।

विषयबाधे सति ज्ञानमप्रमा इति वदामः। यथा "शुक्तौ इदं रजतम्" इति ज्ञानं विषयबाधात् अप्रमा। विषयस्य अबाधे तु तत् ज्ञानं प्रमेत्येव युक्तम्। ततश्च स्मृतिः अबाधितविषया सती प्रमैव भवितुमर्हति।

वाचस्पतिमिश्रेण, उदयनेन च स्मृतिप्रमात्वाभावे उक्तानां हेतूनां प्रतिविधानं च श्रीवेदान्त-देशिकेन स्मृत्यध्याये विस्तरेण कृतम्। यथा -

१.लोकव्यवहाराभावात् इति हेतुः अप्रयोजकः। पामरव्यवहाराभावस्य अनैकान्तिकत्वात्। लोकव्यवहारासिद्धं हि शास्त्रे प्रतिपाद्यते।

२.गौतमेन पृथक् अनुक्तम् इति च अप्रयोजकम्। कणादेन उपमानशब्दौ अपि पृथक् अनुक्तौ। तौ त्यज्येते किम्? अपि च श्रुतिस्मृत्ययोः स्मरणज्ञानं पृथक् प्रमाणतया क्वचिदुक्तम्। यथा - "स्मृतिः प्रत्यक्षमैतिह्यम्। अनुमानश्चतुष्टयम्" इति। क्वचित् स्मरणं पृथगनुक्तम्। यथा - "प्रत्यक्षं च अनुमानं च शास्त्रं च विविधागमम्" इति। अतोत्र युक्तियुक्तं वचो ग्राह्यम्। इतरस्तु कथञ्चित् निर्वाह्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

३.अनुभवपारतन्त्र्यात् इति च हेतुः असिद्धः। स्मृतिः प्रमात्वे अनुभवसापेक्षा नैव। परन्तु उत्पत्तौ अनुभवसापेक्षाः, अनुभवसमानविषयत्वात् विषयसिद्धौ तत्सापेक्षेति कृत्वा अनुभवपरतन्त्रा इति वादमः। नैतावता प्रामाण्यनिर्णयेपि अनुभवापेक्षत्वम्। विषयाबाधे सति सा प्रमैवेति निश्चयात्।

अतः स्मृति प्रमैवेति वक्तुं शक्यते।

बौद्धमतविमर्शः

स्मृतिः न बाह्यविषया भवितुमर्हति अविद्यमानविषयत्वात् इति बौद्धैकदेशिमतं किञ्चित् श्रीभाष्ये उद्धृतम्।[१५] भूतविषया हि जायते। तदानीं स्मृतिकाले प्रायः विषयस्य असत्वात् निर्विषया सा प्रमैव न भवितुमर्हति इति तन्मतम्। परन्तु ज्ञानप्रामाण्ये विषयस्य कदाचित् स्वकाले सत्त्वमेव प्रयोजकम्। न तु सर्वदा सत्वं, न वा ज्ञानकाले सत्वम् अपेक्ष्यते। प्रत्यक्षज्ञानमेव नियमेन विद्यमानविषयमिति प्रतीमः। अनुमानं शब्दश्च न तथा, अतीतविषयमपि तत्प्रमाणम्, तद्वद् स्मृतिः अतीतविषयमपि प्रमा स्यादेव।

मीमांसकमतविमर्शः

मीमांसकमते च स्मृतिः न प्रमा इत्युक्तम्। अगृहीतग्राहि ज्ञानं प्रमा। स्मृतिः तु सर्वदा अनुभव-गृहीतग्राहिणी, अतो न प्रमा इति।

परम् इदमयुक्तमिति बहुत्र स्थापितम्। यथा - ''अनधिगतार्थगन्तृत्वं नाद्रियामहे'' इति वार्तिक-टीका।[१६] ''अव्याप्तेः अधिकव्याप्तेः अलक्षणम् अपूर्वदृक्'' इति उदयनः।[१७] धारावाहिनि प्रमाज्ञाने अनधिगतार्थगन्तृत्वं नास्ति इत्यव्याप्तिः। भ्रमज्ञानं च अनधिगतार्थगन्तृ चेदपि प्रमा न भवत्येव इति अतिव्याप्तिश्च। अतः तत् अप्रयोजकम्।

विमर्शः

१.अतिप्राचीने न्याये स्मृतिप्रमात्वं न तिरस्कृतम्।

२.नव्यन्याय तदनुसारिण्यपि, पश्चादतिनवीनन्याये तत् त्यक्त्वा स्मृतिः प्रमा इत्येव प्रावोचन्।

३.मीमासामते, बोद्धे च स्मृतिः न प्रमेति स्वीकृताम्। तच्छायया मध्यकाले न्यायेपि स्मृतेः अप्रमात्ववादः प्रकटितः स्यादिति विमर्शकाः विमृशन्ति।

४.स्मृतिः न प्रमेत्यत्र किं कारणम्? लोकव्यवहाराभावात्, अनुभवपारतन्त्र्यात्, स्मृतिहेतोः प्रमाणतया सूत्रे अपरिगणनात् इत्यादयः न्यायग्रन्थेषु उक्ताः। एते सर्वे विमृश्या एव। वेदान्तदेशिकेन खण्डिताश्च।

अतः स्मृतिः प्रमा इत्येव सम्प्रदायमनुसृत्य, युक्तिं च अनुसृत्य वक्तव्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र च - स्मृतिः प्रमा एव, स्मृतिकरणं तु न प्रमाणम्, तथा व्यवहाराभावात्। तदनुरोधेन यथार्थानुभवकरणमेव प्रमाणम् इष्यते इति विमर्शकमूर्धन्यानां निर्णयकुशलानां गुरुचरणानां श्री तातार्यमहोदयानां निष्कर्षः।[१८]

निबन्धान्तटिप्पण्यः

१.न्या.सू.१.१.४	२.त.सं.पृ.३०४
३.तत्रैव,पृ.११९	४.न्या.वा.१.१.१
५.न्या.भा.१.१.३	६.वै.सू.९.२.१०
७.तत्रैव.९.२.१२	८.तै.आ.१.२
९.न्या.वा.१.१.१	१०.तत्रैव
११.न्या.कु.पृ.२५२	१२. तत्रैव.पृ.२५३
१३.कारि.श्लो.१३५	१४.न्या.प.पृ.४५
१५.श्रीभाष्यम्,पृ.१३७	१६.ता.टी.१.१.१
१७.न्या.कु.पृ.२४७	१८.प्र.त.चि.वि.पृ.८३

In Public domain. Digitization Muthulakshmi Research Academy

अद्वैतिनां शाब्दाऽपरोक्षवादः

(शब्दस्य अपरोक्षज्ञानजनकत्वम्)

डा. गणेश ईश्वर भट्टः

परमपुरुषार्थः मोक्षः ब्रह्मज्ञानैकलभ्यः। ब्रह्म तज्ज्ञानं तत्साधनानि च प्रमाणादेव अवगम्यन्त इति वेदान्तिभिरपि प्रमाणानि निरूपितानि। तत्र व्यवहारे भाट्टनय इति प्रसिद्धोक्त्यनुसारं भाट्टमतं इव वेदान्तदर्शनेऽपि षट्प्रमाणानि प्रतिपादितानि। तत्र शब्दप्रमाणनिरूपणे दर्शनान्तरापेक्षया वैशिष्ट्यमत्र प्रतिपादितम्। शब्दः परोक्षमेव ज्ञानं जनयतीति दर्शनान्तरेषु निरूप्यते। परं वेदान्तदर्शनानुसारं शब्दः कचिदपरोक्षमपि ज्ञानं जनयति। तत्र च प्रमाणं श्रुतिरेव। तद्यथा 'तरति शोकमात्मवित्'[१], 'विद्वान्नामरूपाद्विमुक्तः'[२] 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः'[३] इत्यादिश्रुतेः अज्ञानस्य तत्प्रयुक्तस्य बन्धस्य च निवृत्तिरेव मोक्षः, अद्वैतब्रह्मज्ञानं च मोक्षसाधनम्। इदं ब्रह्मज्ञानं यदि परोक्षं स्यात्तर्हि अहं कर्ता इत्याद्यनुभवसिद्धापरोक्षाध्यासस्य निवर्तकं न स्यात्। यतः अपरोक्षभ्रमः अपरोक्षाध्यासेनैव निवर्तत इति स्वप्नरज्जुसर्पादिभ्रमेषु दृष्टम्। अविद्या तत्प्रयुक्तश्च बन्धः अपरोक्षाध्यास एव। अत एव बन्धनिवर्तकज्ञाने 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्'[४], 'तस्मिन् दृष्टे परावरे'[५] इत्येवमपरोक्षज्ञानवाचकदर्शनादिपदानि प्रयुक्तानि। किन्तु ब्रह्मण औपनिषदत्वेन प्रमाणान्तरं तत्र न प्रवर्तते। यदि उपनिषत् प्रमाणरूपः शब्दोऽपि तत्र परोक्षज्ञानमेव जनयेत्, तर्हि अनिर्मोक्षप्रसङ्गः। तथा च मोक्षप्रतिपादकं शास्त्रमप्रमाणं स्यात्। अतः शब्दस्यैव अपरोक्षज्ञानजनकत्वं वक्तव्यम्।

उपनिषद्गतमहावाक्यरूपस्य शब्दस्य अपरोक्षज्ञानजनकत्वं श्रुतयः स्फुटं बोधयन्ति। यथा 'तत्त्वमसि'[६] इति पितुरुपदेशं प्राप्तस्य श्वेतकेतोः ज्ञानोत्पत्तिः श्रूयते 'तद्धास्य विजज्ञौ'[७] इति। तत् ब्रह्म अस्य पितुरुपदेशात् विजज्ञौ=विस्पष्टतया ज्ञातवान् इति श्रुत्यर्थः। ह इति निपातः आश्चर्यं द्योतयति। तेन इदं ज्ञानमपरोक्षमेवेति ज्ञायते। अन्यथा शब्दस्य परोक्षज्ञानजनकत्वस्य प्रसिद्धत्वात् आश्चर्यप्रतिपादनं व्यर्थं स्यात्। एवं 'तमसः पारं दर्शयति सनत्कुमारः'[८] इति श्रुत्यन्तरम्। तमसः अज्ञानस्य पारमधिष्ठानं साक्षात्कारयति इति श्रुत्यर्थः। अस्य साक्षात्कारस्य साधनमाचार्योपदेश एवेति 'आचार्यवान् पुरुषो वेद'[९] इति पूर्वस्माद्वाक्यात् ज्ञायते। एवं 'वेदान्तविज्ञानसुनिश्चितार्था'[१०] इति श्रुतेरपि अयमर्थः अवगम्यते। तत्र वेदान्तवाक्यजन्यज्ञानस्य विज्ञानमिति विपदेन विशेषविषयत्वं

सहाचार्यः, अद्वैतवेदान्तविभागः, राजीवगन्धीपरिसरः, शृङ्गेरि, चिक्कमगलूरु, कर्णाटकराज्यम्

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपाद्यते। सुपदेन ज्ञानस्य अपरोक्षत्वं ज्ञाप्यते। अप्रामाण्यशङ्कानिरासाय सुपदमिति शङ्का तु न कार्या, निश्चितार्था इति निश्चितपदेनैव तस्यार्थस्य सिद्धत्वात्। तस्मात् वैदिकमहावाक्यरूपस्य शब्दस्य अपरोक्षज्ञानजनकत्वं श्रुतिमूलकम्। वार्तिककाराणां वचनेऽप्ययमर्थ स्पष्टीकृतः। यथा-

तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति।।[११] इति।

अपि च ब्रह्मण उपनिषत्प्रमाणजन्यप्रमाविषयत्वं बोधयितुमेव 'तं त्वौपनिषदं पुरुषं पृच्छामि'[१२] इति श्रुतिः प्रवृत्ता। तथा च समन्वयाधिकरणभाष्यम् - 'उपनिषदत्वविशेषणं पुरुषस्य उपनिषत्सु प्राधान्येन प्रकाशमानत्व उपपद्यते'[१३] इति। 'तत्र साधुः'[१४] इति पाणिनीयं सूत्रम्। तेन तदन्यासाधुत्वे सति तत्साधुत्वमित्यर्थे अण्प्रत्ययो विहितः। तेन उपनिषदेकगम्यत्वं ब्रह्मणः सिद्ध्यति। यदि ब्रह्म उपनिषदतिरिक्तप्रमाणगम्यं स्यात्तर्हि इदं विशेषणमनुपपन्नम्। असाधारण्येन हि व्यपदेशाः भवन्ति, यथा चाक्षुषं रूपमिति।

अस्मिन्नेवार्थे 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्'[१५] इति सूत्रं प्रवृत्तम्। 'तत्र प्राणोऽस्मि प्रज्ञात्मा'[१६] इत्यादिवाक्यसन्दर्भे प्राणशब्देन निर्दिष्टमुपास्यं तत्त्वं ब्रह्मैव इति साधनानन्तरम्, कथं तर्हि इन्द्रः 'मामुपास्व'[१७] इत्यात्मानं देवतात्मानमुपास्यतया निर्दिदेशेति शङ्कायाम्, ब्रह्मात्मैक्यज्ञानस्य ब्रह्म-भावसाधनत्वात्, अपरोक्षज्ञानं प्राप्तः इन्द्रः आत्मनः ब्रह्मभावं गृहीत्वा अस्मच्छब्देन ब्रह्मैव अभिप्रेयाय इति समाहितम्। अत्र शास्त्रशब्देन महावाक्यं विवक्षितम्। दृष्टिशब्देन महावाक्यजन्यसाक्षात्कार अभिप्रेतः। तेन महावाक्यस्य साक्षात्कारणत्वं सूचितम्।

लोकेऽपि विषयस्य सन्निकृष्टत्वे शब्दस्य अपरोक्षज्ञानजनकत्वं दृष्टम् । यथा दशमस्त्वमसि इत्यत्र । अत्र हि स्वात्मानमेव विस्मृत्य अन्यान्नवजनान् गणयतः, परेण दशमस्त्वमसि इत्युपदिष्टे सति अहमेव दशम इति स्वात्मविषयकम् अपरोक्षमेव ज्ञानं जायते । न चेदं ज्ञानं परोक्षम्, अपरोक्षाध्या-सनिवर्तकत्वात् । अत्र चक्षुरिन्द्रियम् अपरोक्षज्ञानजनकं भवितुं नार्हति, तथा सति दशमस्त्वमसि इति वाक्यश्रवाणात् प्रागेव दशमत्वज्ञानप्रसङ्गात्। नापि शब्दसहकृतमिन्द्रियं तत्र करणम् । यतः इन्द्रियं शब्दादिसहकारिकारणं विनैव अपरोक्षज्ञानं जनयतीति घटादिप्रत्यक्षे दृष्टम्। इन्द्रियस्य अपरोक्षज्ञानजनने क्वचित् सहकार्यपेक्षा, क्वचिन्न इति तु न सम्भवति। इन्द्रियस्य प्रत्यक्षविशेषे सहकार्यपेक्षा इत्यपि न, तथा नियमकल्पने प्रमाणाभावात्। अतः इन्द्रियसहकृतः शब्द एवात्र साक्षात्कारं प्रति करणम्। अत्र, अपरोक्षज्ञानं प्रति इन्द्रियसहकृतः शब्दः करणम्, उत शब्दसहकृतमिन्द्रियम् इत्यत्र किं विनिगमकम् इति चेदुच्यते महान्धकारे अथवा सत्यपि प्रकाशे निमीलितनयनस्य उक्तवाक्यात् दशमोऽहमस्मि

In Public domain. Digitization Muthulakshmi Research Academy

इति ज्ञानं जायते। तत्र चक्षुरिन्द्रियव्यापारस्य असम्भवात् शब्द एव तत्र करणमिति ज्ञायते । एवमेव दार्ष्टान्तिकेऽपि मनस्सहकृतः शब्द एव ब्रह्मसाक्षात्कारे करणम् । 'मनसैवेदमाप्तव्यम्'[१८] इत्यादि-श्रुतयस्तु साक्षात्कारेऽस्मिन् चित्तैकाग्र्यस्य अङ्गत्वं प्रतिपादयन्ति। अत एव विवरणप्रस्थाने वेदान्त-दर्शने सुखाद्युपलब्धिसाधनं न मनः, सुखादीनां साक्षिवेद्यत्वात्। आत्माऽपि न मनसा साक्षात्क्रियते, तस्य स्वप्रकाशत्वात्। भावनासहकृतमपि मनसः प्रमोत्पादकत्वं न नियतम्, विधुरपरिभावितकामिनी-साक्षात्कारे प्रमात्वाभावात् । भ्रमरूपसाक्षात्कारोऽपि साक्षिरूपः, न तु मनोजन्यः। एवं मनसः क्वचिदपि प्रमाकरणत्वाभावात् ब्रह्मसाक्षात्कारेऽपि करणभूतस्य उपनिषदाख्यस्य शब्दस्य सहकारि-मात्रं मनः, न तु तदेव करणम् ।

एवमपि शब्दस्वाभाव्यात् तत्त्वमस्यादिमहावाक्यमपि परोक्षमेव ज्ञानं जनयति इत्याशङ्का स्यात् । तथा चानुमानं "तत्त्वमस्यादिवाक्यं परोक्षज्ञानजनकं वाक्यत्वात् ज्योतिष्टोमादिवाक्यवत्" इति । तत्रोच्यते - शब्दस्य स्वभाव एव परोक्षज्ञानजनकत्वमिति नास्ति नियमः । अतः वाक्यत्वमिति हेतुः परोक्षज्ञानजनकत्वं न साधयति, दशमस्त्वमसि इति वाक्ये व्यभिचारात् । तत्र वाक्यत्वहेतोः सत्त्वेऽपि परोक्षज्ञानजनकत्वं नास्ति । अयं हेतुः सोपाधिकोऽपि । अयोग्यविषयत्वं तत्र उपाधिः। यत्र अपरोक्षज्ञानजनकत्वाभावः तत्र अयोग्यविषयत्वम्, यथा ज्योतिष्टोमादिवाक्यप्रमेये धर्मे इति साध्यव्यापकत्वम् । यत्र वाक्यत्वं तत्र अयोग्यविषयत्वं नास्ति, यथा दशमस्त्वमसि इति वाक्य इति साधनाव्यापकत्वमपि। अतः वाक्यत्वहेतुः परोक्षज्ञानजनकत्वं न साधयति। एवमपि अपरोक्ष-ज्ञानजनकत्वे शब्दस्य प्रत्यक्ष एवान्तर्भावः स्यात् इत्यपरा आशङ्का जायेत । तत्रेदं सामाधानम् - यथा न्यायनये योगिनो मनः बाह्यविषयप्रत्यक्षज्ञानं जनयदपि बाह्यप्रत्यक्षे नान्तर्भवति, तथैव शब्दस्यापि अपरोक्षज्ञानजनकत्वेऽपि न प्रत्यक्ष अन्तर्भाव इति।

उक्तं हि चित्सुखाचार्यैः -

साक्षात्करणहेतोरप्यप्रत्यक्षत्वसम्भवात्।
दशमस्त्वमसीत्यादौ शब्दादेव तदुद्भवात् ।।[१९] इति।

अत्रेदं विचारणीयम् ज्ञानस्य यदापरोक्ष्यं तत्किं करणविशेषप्रयुक्तमुत विषयविशेषप्रयुक्तमिति। करणविशेषप्रयुक्तमिति स्वीकारे इन्द्रियजन्यत्वम् अपरोक्षत्वे प्रयोजकमित्यायाति । तच्च न सम्भवति। तत्र ये तावन्मनस इन्द्रियत्वं वदन्ति, तेषां मते अनुमित्यादिज्ञानस्य मनोरूपेन्द्रियजन्यत्वेन तस्यापि प्रत्यक्षत्वापातः । इन्द्रियत्वेन इन्द्रियजन्यत्वम् अपरोक्षत्वम्, अनुमित्यादेस्तु इन्द्रियत्वेन इन्द्रियजन्यत्वाभावात् नातिव्याप्तिरिति यद्युच्यते, तथापि ईश्वरीयज्ञानस्य इन्द्रियजन्यत्वाभावात्

In Public domain. Digitization Muthulakshmi Research Academy

लक्षणमिदं तत्र अव्याप्तम् । सिद्धान्ते साक्षिज्ञानरूपस्य सुखादिप्रत्यक्षस्य इन्द्रियजन्यत्वं नास्ति । वस्तुतस्तु मनः इन्द्रियमेव नेति प्रागुपपादितम् । तस्मात् ज्ञानस्य आपरोक्ष्यं न करणविशेषप्रयुक्तम्, किन्तु विषयविशेषप्रयुक्तम् । तद्यथा - ज्ञानस्य अपरोक्षत्वं नाम अपरोक्षार्थविषयत्वम् । अर्थस्य अपरोक्षत्वं तु न अपरोक्षज्ञानविषयत्वम्, येन अन्योन्याश्रयदोषः स्यात् । किन्तु तत्तत्पुरुषीयचैतन्या-भेदः। अयमभेदः कल्पिताकल्पितसाधारणः । तत्र जडपदार्थानां सर्वेषामपि चैतन्ये कल्पितत्वात् तेषां प्रमातृचैतन्यस्य च अकल्पितभेदाभावेऽपि कल्पितः अभेदो वर्तते । अत एव घटः सन् इति सामानाधिकरण्यम् अनुभूयते । आन्तरपदार्थानां पुनः सुखादीनां साक्षिचैतन्ये कल्पितत्वेन अभेदः। बाह्यविषयाणां प्रमातृचैतन्येन सह अभेदः अन्तःकरणस्य बहिर्निर्गमनेन सम्भवति । प्रमातृचैतन्यम् अन्तःकरणवृत्तिमहिम्ना विषयचैतन्येन ऐक्यमापद्यत इति प्रक्रिया प्रसिद्धा। अनया प्रक्रियया वृत्तिसंसृष्ट-बाह्यविषयावच्छिन्नचैतन्यमेव तत्तत्प्रमातृचैतन्यं भवतीति बाह्यचैतन्ये कल्पितत्वेन तदभिन्नानामपि घटादीनां प्रमातृचैतन्याभिन्नत्वं सम्पद्यते । प्रकृते तु विषयस्थानीयस्य ब्रह्मणः प्रामातृचैतन्यस्य च वास्तव एवाभेदः । प्रमातृचैतन्यभिन्नं ब्रह्म स्वत एवापरोक्षम्, 'यत्साक्षादपरोक्षाद्ब्रह्म'[२०] इति श्रुतेः । अतः ब्रह्मविषयकं ज्ञानं शब्दजन्यमपि अपरोक्षार्थविषयकत्वेन अपरोक्षमेव । 'मनसैवेदमाप्तव्यम्'[२१] इत्यादिश्रुतयस्तु साक्षात्कारेऽस्मिन् चित्तैकाग्र्यस्य अङ्गत्वं प्रतिपादयन्ति।

परं भामतीकारा अत्र विप्रतिपद्यन्ते । तेषां मतानुसारं ज्ञानस्य अपरोक्षत्वम् करणनिबन्धनम्। लिपिरेखादौ एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणस्य लिपिं पश्याम्यहम् इत्यनुभवः प्रसिद्धः । किन्तु तदेव लिप्यादिसूक्ष्मं वस्तु स्थविरः न पश्यति, इन्द्रियपाटवाभावात् । अतः प्रत्यक्षं न विषयविशेषप्रयुक्तम्। किञ्च, ब्रह्म स्वतः अपरोक्षमिति यदि तद्विषयं शब्दजन्यमपि ज्ञानमपरोक्षमित्युच्यते, तर्हि श्रुतवेदान्तस्य ब्रह्मणि पारोक्ष्यभ्रमो नानुवर्तेत । अनुवर्तते च श्रुतब्रह्मणामपि ब्रह्मणि परोक्षत्वभ्रमः । तस्मात् ब्रह्मसाक्षात्कारे न शब्दः करणम् । किन्तु मननिदिध्यासनसंकृतं मन एव । तथ च श्रुतिः 'एषोऽणुरात्मा चेतसा वेदितव्यः'[२२] इत्यादिः । श्रुतौ अणुत्वं दुर्विज्ञेयत्वम् । तदेतदालक्ष्य भामतीकाराः प्राहुः 'न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दस्य प्रमाणस्य फलम्, अपि तु प्रत्यक्षस्य, तस्यैव तत्फलत्व-नियमात् । अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात् । तस्मात् निर्विचिकित्सवाक्यार्थभावना-परिपाकसहितम् अन्तःकरणं त्वम्पदार्थस्य अपरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थताम् अनु-भावयति'[२३] इति।

न च मनसः करणत्वाभ्युपगमे 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह'[२४] इति श्रुतिविरोध इति वाच्यम् । तस्याः श्रुतेः असंस्कृतमनोविषयत्वात् । संस्कृतमनसाऽपि यदि ब्रह्म न गम्येत,

In Public domain. Digitization Muthulakshmi Research Academy

तर्हि प्रागुक्तमनःकरणत्ववादिश्रुतयः निरालम्बनाः स्युः । न च तथापि उपनिषत्प्रमाणकत्वाभावे ब्रह्मण औपनिषदत्वविशेषणं कथमिति वाच्यम् । औपनिषदशब्दस्य उपनिषदुपजीविप्रमाणगम्यम् इत्यर्थकत्वात् । यदि ब्रह्म वेदानुपजीविप्रमाणान्तरगम्यं स्यात्, तर्हि वेदगम्यत्वं विरुद्ध्येत। न चैतदस्ति । यथा वेदवेद्यमपि अपूर्वं वेदोपजीव्यर्थापत्तिगम्यम्, तथैव ब्रह्म वेदोपजीविमनोगम्यम् इत्यभ्युपगन्तुं युक्तम् । अत एव स्वयं भाष्यकाराः ईदृश्मनसः करणत्वमाहुः 'शास्त्राचार्योपदेशशम-दमादिसंस्कृतं मन एवात्मदर्शने करणम्'[२५] इति । तर्हि शास्त्रदृष्टिसूत्रनिर्वाहः कथमिति चेदित्थम्-तत्र दृष्टिशब्दितसाक्षात्कारस्य साक्षात् शास्त्रजन्यत्वं नाभिप्रेतम् । किन्तु शास्त्राधीनत्वमात्रम् । यतः साक्षात्कारः शास्त्रार्थध्यानजन्यः । श्रुतिश्च 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यामानः'[२६] इति । अत्र ज्ञानपदं करणव्युत्पत्त्या मनःपरम् । तस्य प्रसादः ऐकाग्र्यम् । तथा च ध्यायमानः ध्यान-लब्धेन मनःप्रसादेन परमात्मानं पश्यति इति पदयोजना । 'अपि च संराधने प्रत्यक्षानुमानाभ्याम्'[२७] इति सूत्रार्थपर्यालोचनयाऽपि शास्त्रदृष्टिशब्देन प्रागुक्त एवार्थः विवक्षित इति ज्ञायते । भक्तिध्यानप्रणि-धानाद्यनुष्ठानकाले योगिनः ब्रह्म पश्यन्तीति सूत्रार्थः । अत एवाभ्यधायि कल्पतरुकारैः -

अपि संराधने सूत्राच्छास्त्रार्थध्यानजप्रमा।
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परम्।।[२८] इति।

न चैवमपि मनःकरणककामिनीसाक्षात्कारवत् मनोजन्यस्य ब्रह्मसाक्षात्कारस्य अप्रामाण्या-पत्तिरिति वाच्यम् । वेदान्तवाक्यरूपमूलप्रमाणप्रयुक्तत्वात् । तदुक्तम् -

वेदान्तवाक्यजज्ञानभावनाजापरोक्षधीः।
मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते।।[२९] इति।

एवमपि मनःकरणत्ववादे अपरोक्षस्वभावे ब्रह्मणि यदि शब्दः परोक्षज्ञानं जनयतीत्युच्यते, तर्हि तज्ज्ञानं भ्रम एव स्यादित्याशङ्क्येत । तत्रोच्यते- शब्दात् ब्रह्म अपरोक्षमिति ज्ञानमुत्पद्यते । तच्च ज्ञानं परोक्षज्ञानजनकत्वस्वभावकरणशब्दजन्यमिति परोक्षत्वं भजते । यथा वायुः प्रत्यक्षः इत्यनुमितिः वायौ प्रत्यक्षत्वमवगाहमाना अपि स्वयं प्रत्यक्षत्वं तु न भजते । न चैतावता सा वायोः परोक्षत्वमवगाहते । अतस्तस्या अनुमितेः यथा न भ्रमत्वम्, तथैव प्रकृते शब्दजन्यस्य परोक्षज्ञानस्य न भ्रमत्वप्रसङ्ग इति।

अत्रैवं विवरणानुयायिनः सङ्गिरन्ते - ब्रह्मसाक्षात्कारस्य मनःकरणकत्वं न सम्भवति, 'यन्मनसा न मनुते'[३०] इत्यादिश्रुतेः । न चासंस्कृतमनस एव करणत्वं तत्र निषिध्यत इति वाच्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

'येनाहुर्मनो मतम्'[३१] इति वाक्यशेषे मनोमात्रस्य ग्रहणात् । येन चैतन्येन मनः मतं प्रकाशितमिति तदर्थः । तत्र चैतन्येन विषयीकृतं मनः अपक्वमिति वक्तुमशक्यतया पूर्ववाक्येऽपि मनोमात्रं गृह्यते। तर्हि 'यद्वाचाऽनभ्युदितम्'[३२] इति शब्दस्यापि साक्षात्कारकरणत्वनिषेधः समान इति चैन्मैवम्। तथा हि मनःकरणत्ववादिनां मतेऽपि शब्दस्य निर्विशेषब्रह्मणि परोक्षज्ञानजनकत्वं तावदभ्युपेयते। अतस्तैरपि 'यतो वाचो निवर्तन्ते'[३३] इत्यादिश्रुत्या शब्दार्थप्राप्तिरूपशक्त्याख्यव्यापारेण शब्दस्य ज्ञानकरणत्वं निषिद्ध्यत इति वाच्यम् । लक्षणा तु शक्तिसम्बन्धरूपा। लक्षणया शब्दस्य ज्ञानकरणत्वं तु नात्र निषिद्ध्यते । एवं सति 'यद्वाचाऽनभ्युदितम्'[३४] इति श्रुतिः शब्दः न शक्त्या ब्रह्म प्रतिपादयति इत्येतदर्थपरा। शब्दकरणत्ववादे तु लक्षणया ब्रह्मसाक्षात्कार अभिप्रेतः । अतो न विरोधः। यत्पूर्वमुक्तं ज्ञानस्य आपरोक्ष्यं करणविशेषप्रयुक्तमिति, तदपि न सम्यक्। असमर्थेन्द्रियस्य सूक्ष्मवस्तुनि सन्निकर्षस्यैव अभावेन अन्तःकरणस्य बहिर्निर्गमनाभावात् चैतन्याभेदो न सम्पद्यत इति तत्र प्रत्यक्षज्ञानं न जायते। यच्चोक्तं शब्दादेव अपरोक्षज्ञानोत्पत्तौ ब्रह्मणि परोक्षत्वभ्रमानुवृत्तिः कथमिति, तत्रेदं समाधानम् - श्रवणमनननिदिध्यासनानि ज्ञानसाधनानि। तत्र श्रवणं प्रधानम् । तस्य साक्षात्कारसाधनत्वेऽपि असम्भावनाविपरीतभावनारूपस्य चित्तविक्षेपलक्षणस्य प्रतिबन्धस्य सत्त्वात् जातमपि ज्ञानं परोक्षवदवतिष्ठते । तयोः चित्तगतयोः असम्भावनाविपरीतभावनयोः निरासे मनननिदिध्यासने उपयुज्येते । निरस्तप्रतिबन्धे एकाग्रताविशिष्टे मनसि शब्दाज्जातं ज्ञानमपरोक्षतया अवभासते । तथा च श्रुतिः 'दृश्यते त्वग्र्यया बुद्ध्या'[३५] इति । उक्तं च विवरणे - 'अपरोक्षज्ञानमुद्दिश्य यज्ञादीनां शमादीनां निदिध्यासनादीनां च विधानसामर्थ्यात् यज्ञादिनिबर्हितकल्मषप्रतिबन्धं शमादिनिरुद्धविपरीतप्रवृत्तिदोषं मननसन्दर्शितप्रमेयादिसम्भावनागुणप्रदीपोज्ज्वलितम् अतिसूक्ष्मतरब्रह्मात्मविषयनिदिध्यासनप्रचयपरि निर्मिततदेकाग्रवृत्तिगुणं जितेन्द्रियं पारोक्ष्यविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेव अपरोक्षनिश्चयनिमित्तं भवतीति गम्यते। लोके चातिसूक्ष्मवस्तुनिर्धारणे चित्तैकाग्र्यविशेषापेक्षाया दर्शनात्'[३६] इति । अपरमपि अत्र समाधानं भवितुमर्हति । यथा - भवतु केवलस्य शब्दस्य परोक्षज्ञानजनकत्वम्, तथापि श्रवणमननसंस्कृतान्तःकरणानुगृहीतः शब्दः अपरोक्षं ज्ञानं जनयति । यथा केवलाग्न्यधिकरणकस्य होमस्य अपूर्वजनकत्वाभावेऽपि आधानादिशास्त्रीयसंस्कारविशिष्टाग्न्यधिकरणकः होमः अपूर्वं जनयति, तथैव श्रवणमननपूर्वकप्रत्ययाभ्यासजनितसंस्कारवशात् यज्ञादिकर्मानुष्ठानप्रयुक्तनिर्मलान्तःकरणे ऐकाग्र्यविशिष्टे शब्दः अपरोक्षं ज्ञानं जनयति ।

In Public domain. Digitization Muthulakshmi Research Academy

तर्हि 'मनसैवानुद्रष्टव्यम्'[३७] इति श्रुत्या प्रतीतस्य मनसः करणत्वस्य का गतिरिति चेदुच्यते- तत्र मनसा इति तृतीया न करणत्वं वक्ति, किन्तु हेतुत्वमात्रम् । तच्च इष्यत एव, साक्षात्कारे मनस ऐकाग्र्यस्य अपेक्षितत्वात्। मनसः ज्ञानं प्रति हेतुत्वमात्रं च 'मनसा ह्येव पश्यति मनसा शृणोति'[३८] इत्यादिश्रुतिसिद्धम् । तत्र दर्शनश्रवणादीनां चक्षुरादिकरणजन्यत्वेन मनसा इति तृतीया हेतुत्वमात्रं वक्तीति स्फुटमेव। यत्पूर्वं मनसः प्रमाणत्वे गीताभाष्यवाक्यमुदाहृतं, तदपि भाष्यकारैः वृत्तिकार-मतमनुसृत्योक्तम् इति न तेन शाब्दापरोक्षवादस्य विरोधः। तस्मात् शब्द एव ऐकाग्र्यविशिष्टे निरस्तसमस्तप्रतिबन्धे मनसि ब्रह्मणः अपरोक्षप्रमायां प्रमाणत्वं भजते । इति शम् ।

निबन्धान्तटिप्पण्यः

१. छा.उ.७.१.३
२. मु.उ.३.२.८
३. ई.उ.७
४. छा.उ.६.८.७
५. क.उ.२.२.१
६. मु.उ.२.२.८
७. छा.उ.६.१३.६
८. छा.उ.७.२६.२
९. छा.उ.६.४.२
१०. मु.उ.३.२.६
११. सं.भा.वा.१८३
१२. बृ.उ.३.९.२६
१३. ब्र.सू.शां.भा.१.१.४
१४. पा.सू.४.४.१८
१५. ब्र.सू.१.१.३०
१६. कौ.उ.३.२
१७. कौ.उ.३.२
१८. त.प्र.३.१
१९. छा.उ.६.८.७
२०. बृ.उ.३.४.१
२१. छा.उ.६.८.७
२२. मु.उ.३.१.९
२३. भामती. पृ.५५
२४. तै.उ.२.४
२५. भ.शां.भा.१३.२
२६. मु.उ.३.१.८
२७. ब्र.सू.३.२.१४
२८. भा.क.३.२.२५
२९. भा.क.पृ.५५
३०. के.उ.१.५
३१. के.उ.१.५
३२. के.उ.१.४
३३. तै.उ.२.४
३४. के.उ.१.५
३५. क.उ.१.३.१२
३६. पं.वि.पृ.४०७
३७. बृ.उ.४.४.११
३८. बृ.उ.१.५.६

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रियाणां प्राप्यकारितायाः विषये शास्त्रविज्ञानयोः अभिप्रायाः

विद्वान् श्रीरमणशर्मा

इन्द्रियाणां प्राप्यकारितायाः स्वरूपम्

इन्द्रायार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् इति सामान्यतः तर्कशास्त्रप्रसिद्धं प्रत्यक्षज्ञानस्य लक्षणम्। परन्तु तद्धटकः सन्निकर्षः कथं जन्यते इत्यत्र अभिप्रायभेदाः भवन्ति।

चक्षुरिन्द्रियं स्वगोलकाद् निस्सृत्य विषयदेशं प्राप्य तेन सन्निकर्षं करोति इति एके। विषयदेशाद् रश्मयः आगत्य चक्षुषि पतन्ति तदा ज्ञानं जायते इत्यपरे। शब्दः श्रोत्रदेशम् आगत्य श्रोत्रेण विषयीक्रियते इति एके। चक्षुर्वदेव श्रोत्रेन्द्रियमपि विषयदेशं प्राप्य ज्ञानं करोति इति अपरे।

प्रायेण तु घ्राणस्य रसनायाः त्वचश्च स्वस्माद् आयतनाद् निस्सरणं केऽपि न वदन्ति। व्यवहितस्य चन्दनादेः सूक्ष्माः अवयवाः यदा गन्धवहेन वायुना आनीयमानाः नासिकां प्रविशन्ति तदा तद्गतो गन्धः घ्राणेन विषयीक्रियते, तदा व्यवहितस्य चन्दनस्यापि तथैव भवति इति ज्ञायते। रसनायाः त्वचश्च तु व्यवहितविषयग्राहित्वं दूरत एव अपास्तम्।

सर्वथाऽपि इन्द्रियस्य गमनेन वा विषयस्य (तदेकदेशस्य वा) आगमनेन वा इन्द्रियाणि विषयं प्राप्यैव ज्ञानं कुर्वन्ति इत्यतः प्रायेण आस्तिकदर्शनेषु इन्द्रियाणि प्राप्यकारीणि इति उच्यन्ते।

वेदान्तशास्त्रोक्ता प्रत्यक्षसन्निकर्षप्रक्रिया

इन्द्रियं वा विषयदेशं गच्छतु, विषयो वा इन्द्रियदेशम् आगच्छतु, सर्वथाऽपि यदा इन्द्रियं शक्तिरूपं सद् विषयदेशं गत्वा तद् व्याप्नोति तदा इन्द्रियावच्छिन्नस्य विषयावच्छिन्नचैतन्यस्य च अभेदो जायते, तदा च प्रत्यक्षज्ञानं जायते इति वेदान्तशास्त्रे परिभाषा भवति।

आधुनिकेन विज्ञानेन तु चैतन्यविचारं विनैव शरीरगत-वैद्युतरासायनिकपरिणामवशादेव ज्ञानोत्पत्तिः साधयितुम् इष्यते। अस्याः प्रक्रियायाः जडप्रपञ्चातिरिक्तचैतन्यनिरपेक्षायाः औचित्यम् अस्ति वा न वा इत्येतद् शीर्षकाद् अतिप्रसक्तेः भिया नेह विचार्यते।

परन्तु आधुनिकेन विज्ञानेन वेदान्तोक्तस्य सन्निकर्षस्य - विशेषतः चक्षुषः प्राप्यकारितायाः अङ्गीकारे विघ्नाः जन्यन्ते। तदा वेदान्तमतस्थितेन तेषां विघ्नानां परिहारः कथं सम्भवति इति विचार्यते।

चक्षुषः सन्निकर्षे वेदान्तमतेन दूरदेशगामित्वं विज्ञानमतेन तदसम्भवश्च

वेदान्तशास्त्रे चक्षुषः प्राप्यकारितायां चक्षुरेव विषयदेशं गच्छति इति उच्यते। एवं सति दूर-

काञ्चीशङ्करमठः, नेरूर् अग्रहारः, करूर् मण्डलं, द्रविडदेशः

In Public domain. Digitization Muthulakshmi Research Academy

स्थितानां पर्वतादीनां विषये कथं झटिति ज्ञानं जायते इति प्रश्ने चक्षुषः तैजसत्वाद् द्रव्यत्वम् अस्तीति अतिवेगेन विषयदेशं गत्वा तद् व्याप्तुं शक्नोति इति उत्तरं भवति। परन्तु अत्रैव समस्या जायते। कथमिति प्रतिपाद्यते।

चक्षुषः दूरदेशगामित्वे दूरस्थितानां पर्वतादीनां इति उदाहरणं दत्तम्। वस्तुतः ततोऽपि सुदूर-स्थिताः विषयाः चक्षुषा गृह्यन्ते। यथा चन्द्रः, सूर्यः, शुक्रादयो ग्रहाः, नक्षत्राणि इत्यादयः। तावद् दूरम् चक्षुः क्षणमात्रेण गत्वा आगच्छति इति कथनं साहसमिति, किञ्च चक्षुषः वास्तवी या तादृशदूर-विषयग्रहणयोग्यता तत्प्रयुक्ततया कश्चन कालविलम्बः विषयग्रहणे भवतीति च निरूप्यते।

चन्द्रसूर्यादीनां विषयः

चन्द्रः भूमेस्सकाशात् चतुर्लक्ष-किलोमीटर्-दूरस्थितः। विज्ञानरीत्या तु तेजः एक-सेकेण्ड-आत्मककाले त्रिलक्षकिलोमीटर्दूरमेव गच्छति। एवं तर्हि प्रायेण सार्धैकसेकेण्डकालाभ्यन्तरे एव चक्षुर्वा चन्द्रं गन्तुं शक्नोति चन्द्रप्रकाशो वा चक्षुः आगन्तुं शक्नोति इति झटिति ज्ञानं न जायते।

सूर्यादीनां विषयस्तु अतोऽपि उत्कटः। सूर्यः भूमेः सकाशात् सार्धैककोटिकिलोमीटरदूरे वर्तते। उक्तेन वेगेन तेजसः इतः तत्र गमने वा ततः अत्र आगमने वा सपादः अष्टौ मिनिट् कालः। (निमेषशब्दस्य प्राचीनपरिभाषायाम् अत्र आनयने क्लेशः इति आङ्ग्लशब्द एव प्रयुक्तः।)

शुक्रस्य बुधस्य च विषयः चन्द्रेण सूर्येण च व्याख्यातः, तयोः (शुक्रबुधयोः) भूसूर्यमध्यपातित्वात्। सूर्यापेक्षया मङ्गलः भूमेः सार्धद्विगुणं दूरतरः। तथा गुरुः षड्गुणं, शनैश्चरश्च दशगुणम्। एवं सति तेजसः इतः तत्र गमने वा ततः अत्र आगमने वा सूर्यविषयापेक्षया तावद्गुणः कालो भवतीति निश्चितम्।

निकटवर्तिनां सूर्यचन्द्रग्रहाणां विषयः एवम्। निकटवर्तिनां नक्षत्राणां विषयः इतोऽपि गुरुतरः।

नक्षत्राणां विषयः

भूमेः (सूर्यं विहाय) अत्यन्तसमीपवर्तिनः नक्षत्रस्य नाम प्रोक्सिमा सेन्टरि इति। एतच्च भूमेः चत्वारिंशल्लक्षणगुणितकोटिकिलोमीटरदूरे वर्तते। तावतः दूरात् प्रकाशस्य भूमिं प्रति आगमने (तेजोमयस्य चक्षुषो वा तत्र गमने) चत्वारि वर्षाण्येव अपेक्षितानि भवन्ति।

विज्ञानिनः ज्योतिषा एकस्मिन् वर्षे अतिक्रम्यमाणं दूरम् एकं ज्योतिर्वर्षम् इति आचक्षते। अनया विधया प्रोक्सिमा सेन्टरि ज्योतिर्वर्षचतुष्टयदूरे वर्तते इति उक्तं भवति।

एतच्च अत्यन्तसमीपवर्तिनक्षत्रविषयम्। भूयिष्ठानि नक्षत्राणि अतोऽपि सुबहुदूरस्थितानि भवन्ति। रात्रौ चक्षुषा प्रायेण त्रिसहस्रं नक्षत्राणि गृह्यन्ते। तावन्ति सर्वाणि युगपद् ग्रहीतुं चक्षुषः तदीयानि परस्परभिन्नानि दूराणि गत्वा आगच्छति क्षणमात्रेण इति वक्तुम् उचितं वा?

In Public domain. Digitization Muthulakshmi Research Academy

प्रोक्सिमा सेन्टरि नक्षत्रात् प्रस्थितं तेजः चत्वारि वर्षाणि अतिक्रम्य भूमिं प्रति आगच्छति। एवमेव अन्येषां नक्षत्राणां तेजः तावद्भ्यो वर्षेभ्यः परं भूमिं प्रति आगच्छति। तदा तानि नक्षत्राणि चक्षुषा विषयीक्रियन्ते इति वक्तव्यम्। अत्र विचित्रो विषयो नाम यदि किमपि नक्षत्रम् अस्मिन् क्षणे तत्र विस्फोटनेन नाशं गच्छेत, तदा स विषयः यावज्ज्योतिर्वर्षदूरे तद् नक्षत्रं वर्तते तावद्भ्यो वर्षेभ्यः परमेव अस्माभिः ज्ञातुं शक्यम्। (अतोऽपि हेतोः प्रत्यक्षेण तदाश्रयिणा अुमानेन वा विज्ञानिभिः ईप्सितं सर्वज्ञानं प्राप्तुं न शक्यम् इत्युक्तं भवति इति प्रासङ्गिकम् एतत्।)

प्रकृते च चक्षुषो बहिर्गमनम् इति यो विषयः तत्र अनया विज्ञानव्यवस्थया महान् विघ्नो जनितः अस्ति, तस्य च परिहारः कः इति विद्वद्भिः चिन्तनीयम्।

परिहारः

अस्याः समस्यायाः परिहाराय -

१) चक्षुः गोलकाद् बहिः नैव गच्छति, विषयगतः प्रकाश एव आगच्छति इति वा वक्तव्यम्।

२) चक्षुरपि यावच्छक्ति गच्छति, विषयगतः प्रकाशोऽपि आगच्छति इति वा वक्तव्यम्।

३) अथवा नक्षत्राणां दूरगतत्वं मिथ्याकल्पितम् इति ब्रह्मास्त्रं प्रयोक्तव्यम्। तदा तु घटादेरपि तुल्यक्षेमता।

परन्तु (एतच्च अस्मादाचार्यैः स्मारितम्) अत्र अपरा समस्या जागर्ति। तन्नाम यदा घटः विषयीक्रियते तदा न केवलं घटस्य गुणभूतं रूपं प्रत्युत घटस्य स्वरूपमपि विषयीक्रियते इति शास्त्र-मर्यादा भवति। यदि चक्षुः विषयदेशं नैव गच्छति, तदीयप्रकाशमात्रस्य अत्र आगमनेन तद् वस्तु गहीतं भवति वा इत्यपि शास्त्रार्थैः विचारणीयं भवति।

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणेषु शब्दः

डा. चिन्तलपाटि सत्यनारायणशास्त्री

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः।।

अस्माकं भारतीयानां धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः सुप्रसिद्धाः। पुरुषेण अर्थ्यते प्रार्थ्यते इति पुरुषार्थः। तेषु मोक्षः चतुर्थः पुरुषार्थः। 'न स पुनरावर्तते' इत्यादि श्रुत्या तस्य नित्यत्वावगमात्। तादृशपुरुषार्थं प्रति बहुभिः दार्शनिकैः बहवः उपायाः निर्दिष्टाः। तत्र नैयायिकरीत्या मोक्षप्राप्त्युपायः कः? इति निर्दिश्यते। नैयायिकाः आत्यन्तिकदुःखनिवृत्तिः मोक्षः इति कथयन्ति। तदेवोक्तं गौतममहर्षिणा 'तदत्यन्तविमोक्षोऽपवर्गः'[१] इति सूत्रेण। तेन अत्यन्तविमोक्षः तदत्यन्तविमोक्षः इति तृतीयातत्पुरुषः। तच्छब्दस्य बुद्धिस्थपरामर्शित्वेन 'बाधनालक्षणं दुःखमि'[२]ति सूत्रोक्तं दुःखं गृह्यते। एवं च आत्यन्तिकदुःखनिवृत्तिः अपवर्गः मोक्षः इत्यर्थः। एतदेव न्यायमञ्जरीकारोऽपि निर्दिशति -

यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः।
तावदात्यन्तिकी दुःखस्यावृत्तिर्नावकल्पते।।
धर्माधर्मनिमित्तो हि सम्भवः सुखदुःखयोः।
मूलभूतो तु तावेव स्तम्भौ संसारसद्मनः।।
तदुच्छेदे तु तत्कार्यशरीराद्यनुपल्लवात्।
नाऽत्मनः सुखदुःखेस्तः इत्यसौ मुक्त उच्यते।।
इच्छाद्वेषप्रयत्नादि भोगायतनबन्धनम्।
अच्छिन्नभोगायतनो नात्मा तैरपि युज्यते।।

एवमात्यन्तिकदुःकच्छेदं प्रति च दुःखकारणीभूतजन्मोच्छेदः कारणम्। जन्मोच्छेदं प्रति च जन्मकारणीभूतप्रवृत्युच्छेदः कारणम्। प्रवृत्युच्छेदं प्रति दोषोच्छेदः कारणम्। दोषोच्छेदं प्रति च मिथ्याज्ञाननाशः कारणम्। तदुक्तं भगवता सूत्रकारेण 'दुःखजन्मप्रवृत्तिदोषमिथ्या ज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः'[३] इति। अनेन सूत्रेणेदमुक्तं भवति दुःखनाशं प्रति मिथ्याज्ञाननाशः कारणम्। मिथ्याज्ञाननाशं प्रति च पदार्थतत्त्वज्ञानं कारणम्। पदार्थाश्च 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः'[४] इति

उपाचार्यः, व्याकरणविभागः, श्रीशङ्कराचार्य संस्कृतविश्वविद्यालयः, कालडी, केरलाराज्यम्.

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रेण षोडश उक्ताः। तत्र प्रमाणपदार्थः द्वितीयं प्रमेयम्। प्रमाणानि च प्रमेयतत्त्वावधारणाय प्रकल्पन्ते इति प्रथमं प्रमेयं निरूपणीयम्। प्रमेयं च 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्'[५] इति सूत्रेण द्वादशविधमुक्तम्। एवं चैतेषां प्रमेयाणां तत्त्वावधारणं प्रमाणैः कर्तव्यम्। प्रमेयतत्त्वज्ञाने जाते मिथ्याज्ञानं नश्यति। मिथ्याज्ञाननाशादेव मोक्षः। तत्र प्रमाणानि कानि? तेषां लक्षणं किम्? इति निरूप्यते।

तत्र नैयायिकाः प्रमाणानि चत्वारि स्वीकुर्वन्ति। तदेवोक्तं भगवता सूत्रकारेण 'प्रत्यक्षानुमानोपमानशब्दाः'[६] इतीतरेतरयोगद्वन्द्वः। तथा च एतन्मते प्रमाणानि चत्वारीति सिद्ध्यति। तत्र प्रमाणपदं, प्रमीयते अनेन इति प्रमाणमिति करणे ल्युडन्तम्। अर्थात् प्र इत्युपसर्गपूर्वकात् 'माङ् माने शब्दे च' इति धातोः ल्युट्प्रत्यये लकारस्य 'लशक्वतद्धिते' इति सूत्रेणेत्संज्ञायाम्, टकारस्य 'हलन्त्यमि'ति सूत्रेण च इत्संज्ञायां 'तस्य लोपः' इति लोपे यु इत्यस्य स्थाने 'युवोरनाकौ' इति अनादेशे नकारस्य 'अट्कुप्वाङ्.....' इति णत्वे प्रमाणमिति निष्पद्यते। अत्र शब्दे अंशत्रयं वर्तते - प्र इत्युपसर्गः, मा इति धातुः, अन इति प्रत्ययः। त्रयाणामपि अर्थः विव्रियते मा इति धातोः ज्ञानमर्थः। प्र इत्युपसर्गस्य प्रकर्षोऽर्थः। ज्ञाने प्रकर्षश्च यथार्थत्वम्। यथार्थत्वञ्च तद्वति तत्प्रकारकत्वम्। तथा च प्रमाणपदेन यथार्थज्ञानकरणमित्यर्थः लभ्यते। कारणत्वं नाम कार्याव्यवहित प्राक्क्षणावच्छेदेन कार्याधिकरणवृत्तित्वम्। तथा च प्रमात्वावच्छिन्नासाधारणकारणत्वं प्रमाणत्वामिति पर्यवसितम्। अत्र प्रपदानुपादाने ज्ञानमित्युक्ते भ्रमात्मकज्ञानस्याऽपि स्वीकर्तुं शक्यत्वेन तत्कारणीभूते काचादिदूषिते इन्द्रिये चक्षुरादौ अतिव्याप्तिः। प्र इत्यस्य निवेशे तु न दोषः। एवमपि भ्रमासाधारणकारणं प्रमाणमित्युक्ते इन्द्रियविषयसंयोगेऽतिप्याप्तिः। तस्यापि भ्रमासाधारणकारणत्वात्। अतः व्यापारवत्वे सति इति विशेषणं देयम्। व्यापारत्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वम्। तथा च इन्द्रियार्थसंयोगस्य स्वयं व्यापारत्वेन व्यापारवत्त्वाभावात् न अतिव्याप्तिः। तथा च व्यापारवत्त्वे सति प्रमात्वावच्छिन्नासाधारणकारणत्वं प्रमाणत्वमिति निष्कर्षः। इदं च लक्षणं प्रत्यक्षे अनुमाने उपमाने शब्दे चानुगतं भवति।

तत्र 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'[७] इति सूत्रे शब्दः चतुर्थप्रमाणत्वेन निर्दिष्टः। तत्र शब्दो नाम कः इति विचार्यते । शब्दविषये महर्षिणा सूत्रद्वयं निर्दिष्टम् - 'आप्तोपदेशः शब्दः'[८] 'स द्विविधो दृष्टादृष्टत्वात्।'[९] आप्तोपदेशः इत्यत्र आप्तस्योपदेशः आप्तोपदेशः इति षष्ठी तत्पुरुषः। आप्त इति 'आप्लृ-व्याप्तौ' इति धातोः 'मतिबुद्धिपूजार्थेभ्यश्च' इति क्तप्रत्ययान्तः। उपदेशशब्दः उपदेशनम् उपदेशः इति भावे घञ्प्रत्ययान्तः। तद्योगाच्च आप्तशब्दे 'कर्तृकर्मणोः कृति' इति षष्ठी। एवञ्च आप्तोपदेशः इत्यस्य आप्तकर्तृकोपदेशः इत्यर्थः। तथा आप्तोच्चारितः शब्दः प्रमाणशब्दः इति तु पर्यवस्यति। आप्तो

In Public domain. Digitization Muthulakshmi Research Academy

नाम अनुभवेन वस्तु तत्त्वस्य कात्स्न्र्येन निश्चयवान् रागादिवशादपि नान्यथावादी यः सः इति पतञ्जलिः चरके अभिप्रैति।

तत्र शब्दनिष्ठं प्रमाणत्वं च शाब्दबोधजनकत्वम्। तदेवोक्तं मूक्तावल्याम् -

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।। इति कारिकया।

अयमभिप्रायः, शाब्दबोधे पदज्ञानं पदविषयकश्रावणप्रत्यक्षात्मकं ज्ञानं करणं भवति। पदार्थधीः पदजन्यं यत्पदार्थस्य ज्ञानं, तद्विषयकं स्मरणं तद्द्वारं भवति। द्वारं नाम व्यापारः। शाब्दबोधः शब्दसमूहात्मक-वाक्यजन्यो यो वाक्यार्थबोधः सः फलं भवति। तदेव प्रमा इत्युच्यते। तत्र पदजन्यपदार्थस्मरणात्मक-व्यापारे शक्तिधीः पदेन सह अर्थस्य सम्बन्धरूपा या अस्मात् पदादयमर्थो बोद्धव्यः। एतत्पदजन्य बोधविषयतावानर्थो भवतु इत्यादिरूपा सहकारिणी सहकारिकारणं भवति। एतदुपोद्बलिक एव -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

एवं च शब्दरूपप्रमाणस्य शाब्धबोधरूपप्रमाजनकत्वमस्ति इति अनेन निरूपितं भवति। अत्र शब्दस्य प्रामाण्यं न सम्भवति इति चार्वाकादयः।

तत्र सूत्रं 'तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः'[१०] इति। अस्यायमभिप्रायः, तस्य शब्दस्य अप्रामाण्यं तदप्रामाण्यमिति षष्ठी तत्पुरुषः। तच्छब्देन बुद्धिस्थः शब्दो गृह्यते। शब्दस्य अप्रामाण्यमिति प्रतिज्ञा। अनृतदोषात् व्याघातदोषात् पुनरुक्तदोषात् इति अप्रामाण्ये हेतुत्रयम्। अनृतस्य उदाहरणं - 'पुत्रकामः पुत्रेष्ट्या यजेत' इति श्रुतिवाक्यं वर्तते। पुत्रेष्टिकरणेऽपि कुत्रचित् पुत्रोत्पत्तिः नैव दृश्यते। अतः दृष्टार्थबोधकवाक्यस्य अनृतत्वात् अदृष्टार्थकम् 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादिकमपि अनृतमिति ज्ञायते। एवम् 'उदिते जुहोति' 'अनुदिते जुहोती'ति वाक्यं श्रूयते। इदश्च विरुद्धार्थकम्। व्याघातात् अत्र अन्यतरस्य मिथ्यात्वं सिद्ध्यति। मिथ्यार्थबोधकत्वेन च शब्दस्य अप्रामाण्यम्। एवं तृतीयः पुनरुक्तदोषः। 'त्रिःप्रथमामन्वाह त्रिरुत्तमाम्' इति वाक्यम्। इदं च पुनरुक्तवाक्यम्। पुनरुक्तं नाम पूर्वाभिः तस्यैव अभिधानम्। पुनरुक्तं च प्रमत्तवाक्यम्। प्रमत्तवाक्यश्चाऽप्रमाणम्। एतेषामप्रामाण्ये तद्दृष्टान्तेन तदेककर्तृकत्वेन तदेकजातीयत्वेन च सर्ववेदाप्रामाण्यम्। अतो न शब्दः प्रमाणमिति पूर्वपक्षिणामाशयः।

तत्रोत्तरं दीयते, 'न कर्मकर्तृसाधनवैगुण्यात्' इति सूत्रम्। पूर्वोक्ताः अनृतादयो दोषाः न भवन्ति। पुत्रकामेष्टौ कर्मकर्तृसाधनवैगुण्यात् इष्ट्या पितरौ संयुज्यमानौ पुत्रं जनयतः। तत्र इष्टिः करणं साधनम्।

In Public domain. Digitization Muthulakshmi Research Academy

पितरौ कर्तारौ। संयोगः कर्म। त्रयाणां गुणयोगात् पुत्रोत्पत्तिः। वैगुण्यात् तदभावः। तत्र कर्मवैगुण्यं विधिना शास्त्रोक्तप्रकारेण अकरणम्। कर्तृवैगुण्यं विज्ञानराहित्यम्। साधनवैगुण्यं हविरादेः अप्रोक्षिततत्वादि। एवञ्च कर्तृकर्मसाधनादीनां वैगुण्यादेव पुत्रेष्टौ पुत्रजन्म न दृश्यते।

एवं व्याघातोऽपि नास्ति। कुतः 'अभ्युपेत्य कालभेदे दोषवचनात्।' हवने व्याघातः नास्ति। कुतः? यः अभ्युपगतहवनकालमतिक्रामति अन्यत्र च जुहोति तत्राऽयमभ्युपगतकालभेदे दोषः उच्यते। ..... अस्याहुतिमभ्यवहरति य उदिते जुहोति इतीदं विध्यतिक्रमे निन्दावचनम्। अतः व्याघातदोषो नास्ति।

एवं तृतीयः पुनरुक्तदोषोऽपि नास्ति। अभ्यासेन पुनरुक्तदोषो भवतीत्युक्तम्। कुतः अनर्थकोऽभ्यासः पुनरुक्त इत्युच्यते अर्थवांश्चाभ्यासः अनुवाद इत्युच्यते। अयं 'त्रिःप्रथमामन्वाह त्रिरुत्तमामि'ति योऽयमभ्यासः अनुवादो भवति। कुतः? अर्थवत्वात्। कोऽर्थश्चेत् त्रिःवचनेन प्रथमोत्तमयोः पञ्चदशत्वं सम्भवति। तथा च मन्त्रवादः इदमहं भ्रातृव्यं पञ्चदशारेण वाग्वज्रेण बाधे। योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः इति पञ्चदशसामिधेनीः वज्रमन्त्रोऽभिवदति। तदभ्यासमन्तरेण न स्यात्। अतः तृतीयः पुनरुक्तदोषोऽपि नास्ति। एवञ्च न्यायदर्शने अनया प्रणाल्या शब्दस्य प्रामाण्यं व्यवस्थापितम्।

निबन्धान्तटिप्पण्यः

१.गौ.सू.१.१.२२	२.गौ.सू.१.१.२१
३.गौ.सू.१.१.२	४.गौ.सू.१.१.१
५.गौ.सू.२.१.९	६.गौ.सू.२.१.३०
७.गौ.सू.२.१.३०	८.गौ.सू.१.२.७
९.गौ.सू.१.२.७	१०.गौ.सू.२.१.४७

In Public domain. Digitization Muthulakshmi Research Academy

न्यायदर्शनरीत्या प्रत्यक्षस्य प्रामाण्यम्

डा. रामचन्द्रुल बालाजी

न्यायदर्शने गौतमहर्षिः 'प्रमाणप्रमेय...निःश्रेसाधिगमः'[१] इत्यस्मिन् सूत्रे षोडशपदार्थतत्त्वज्ञानात् निःश्रेयससिद्धिर्भवतीति उपादिशत्। तत्रापि मानाधीना मेयसिद्धिरिति वाक्योक्तरीत्या सर्वस्याऽपि प्रमेयस्य प्रमाणाधीनत्वात् प्रथमतया प्रमाणानां निरूपणं कृतम्। न्यायदर्शने 'प्रत्यक्षानुमानोपमानशब्दाः प्राणानि'[२] इत्यनेन चत्वारि प्रमाणानि कथितानि। एवमेव सर्वैरपि दार्शनिकैस्तेषां सिद्धान्तानुसारं कानिचन प्रमाणानि अभ्युपगतानि भवन्ति।

प्रत्यक्षादीनां प्रमाणानां प्रामाण्यविषये माध्यमिकः एवं शङ्कते। अनधिगताबाधितार्थप्रतिपादनद्वारैव हि प्रमाणानां प्रामाण्यसिद्धिः। तदेव न सम्भवति। अतः प्रत्यक्षादीनां प्रमाणत्वं नास्ति कालत्रयेऽपि अर्थाप्रतिपादकत्वात् यथा शशविषाणम्।[३] अस्य पूर्वपक्षस्य प्रतिपादकसूत्रमेतत्, 'प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः'[४] 'प्रत्यक्षादीनां प्रमाणत्वं नास्ति, त्रैकाल्यासिद्धेः'[५] पूर्वापरसहभावानुपत्तेरित्यर्थः।

अस्य पूर्वपक्षसूत्रस्य विवरणमनन्तरसूत्रेषु कृतमस्ति। तथाहि 'पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः'[५] प्रमाणसिध्यनन्तरं प्रमेयसिद्धिर्वा, प्रमेयसिद्ध्यनन्तरं प्रमाणसिद्धिर्वा, उभयोः एकदा सिद्धिर्वेति वक्तुं नैव शक्यते। पूर्वं प्रमाणसिद्धेः अङ्गीक्रियमाणत्वे प्रमेयरूपार्थस्यैवाभावादिन्द्रियार्थसन्निकर्षाभावे प्रत्यक्षोत्पत्तिर्न सम्भवति। प्रथममेव प्रमेयसिद्धिः अनन्तरं प्रमाणसिद्धिरित्यङ्गीकारे 'पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः'[६] प्रमेयसिद्धिः प्रमाणादिना न भविष्यति तदानीमर्थस्य प्रमेयत्वमेव न स्यात्। प्रमाणेन ज्ञायमानं खलु प्रमेयम्। उभयोः एकदा सिद्धौ 'युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम्'[७] प्रमाणप्रमेययोः युगपत्सिद्धिश्चेत् प्रतिनियतविषयाणि ज्ञानानि युगपदुत्पत्तुमर्हन्तीति तेषां क्रमिकत्वं न स्यात्। गन्धादिज्ञानानां क्रमिकत्वमङ्गीक्रियते। एवञ्च प्रमाणप्रमेययोः पूर्ववृत्तित्वं पश्चाद्भावित्वं, यौगपद्यं वा न संभवतीति प्रत्यक्षादीनामप्रामाण्यमिति पूर्वपक्षे प्राप्ते इदं समाधानम्। उपलब्धिहेतोः (प्रमाणस्य) उपलब्धिविषयस्य च अर्थस्य (प्रमेयस्य) पूर्वपरसहभावनियमो नास्ति। यथादर्शनं व्यवस्था कार्या। 'क्वचिदुपलब्धिहेतुः पूर्वं, पश्चादुपलब्धिविषयः।' यथा - चिरन्तनस्थायी आदित्यप्रकाशः तत्पूर्वं वर्तते। तत्प्रकाश्याः पदर्थास्तु अनन्तरकालिकाः। क्वचिचोपलब्धिविषयः पूर्वं वर्तते। उपलब्धिहेतुः अनन्तरं वर्तते। यथा - पूर्वावस्थितानां घटादीनां

सहाचार्यः, शिक्षाविभागः, राजीवगान्धीपरिसरः, श्रृङ्गेरी.

In Public domain. Digitization Muthulakshmi Research Academy

प्रदीपः। घटादयः पूर्वमेवावस्थिताः। अनन्तरागतेन प्रदीपेन प्रकाश्यन्ते। क्वचिदुपलब्धिहेतोः, उपलब्धिविषयस्य च सहभावः। यथा - धूमेनाग्नेः ग्रहणम्। विद्यमानेन धूमेन विद्यमानस्य अग्नेः ग्रहणं भवति। एवं पूर्वापरसहभावः न नियत इति यथादर्शनं व्यवस्थाकार्या। समाख्यया अपि त्रैकाल्यं विज्ञायते, प्रमाणमिति सञ्ज्ञायाः उपलब्धिहेतुत्वं निमित्तम्। तस्य उपलब्धिमकार्षीत्, करोति, करिष्यतीति त्रैकाल्ययोगः संभवति।'[८]

एवं प्रमाणशब्दस्याऽपि प्रमितोऽनेन अर्थः इति भूतकालसम्बन्धः, प्रमीयतेऽनेनेति वर्तमानकाल-सम्बन्धः, प्रमास्यतेऽनेन अर्थः इति भविष्यत्कालसम्बन्धश्च भवति। एवं प्रमेयशब्देनाऽपि प्रमितं, प्रमीयते, प्रमास्यते इति व्युत्पत्या त्रैकाल्ययोगः सम्भवति। त्रैकाल्यानङ्गीकारे 'पाचकमानय पक्ष्यति' इति लावकमानया लविष्यति' इति व्यवहारः अनुपपन्नः स्यात्। अपि च प्रत्यक्षादीनामप्रामाणत्व-कथकपूर्वपक्ष एव असमीचीनः भवति। 'प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः' इति सूत्रं प्रमाणप्रतिषेधं करोतीति खलु पूर्वपक्षसम्मतम्। अनेन प्रतिषेधकसूत्रेण पूर्वपक्षिणा किं क्रियते। किं प्रमाणानां सम्भवो निवर्त्यत उत असंभवो ज्ञाप्यते। यदि सम्भवः निवर्त्यते, प्रत्यक्षादि प्रमाणसम्भवे प्रतिषे-धानुपपत्तिः। असम्भवो ज्ञाप्यते तदा अस्य वाक्यस्य प्रमाणासम्भवज्ञापकत्वात् प्रमाणलक्षणं प्राप्त-मिति प्रामाणप्रतिषेधो नोपपद्यते।[९] पूर्वपक्षिणा त्रैकाल्यासिद्धेरिति हेतुना प्रमाणनिषेधः क्रियते, त्रैकाल्यासिद्धेरेव तदीय प्रतिषेधस्यापि अनुपपत्तिः। तथाहि - 'प्रतिषेध्ययोः पूर्वापरसहभावो न सम्भवति। पूर्वं प्रतिषेधाङ्गीकारे असति प्रतिषेध्ये प्रतिषेधानुपपत्तिः। पश्चात् प्रतिषेधाङ्गीकारे प्रति-षेध्यस्य पूर्वं सिद्धत्वात् प्रतिषेधानुपपत्तिः। युगपत् सिध्यङ्गीकारे च प्रतिषेध्यसिद्धिरङ्गीकारात् अनर्थकः प्रतिषेधः स्यात्'[१०] अतः प्रतिषेधलक्षणे च वाक्येऽनुपपद्यमाने सिद्धं प्रत्यक्षादीनां प्रमाणत्वमिति।

प्रत्यक्षमनुमानमेवेति शङ्कानिराकरणम्

प्रत्यक्षस्यानुमानेऽन्तर्भावात् पृथक् प्रमाणत्वं नास्तीति पूर्वपक्षप्रतिपादकं सूत्रं यथा - 'प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः'[११] इति। अवयवातिरिक्तावयवि नास्ति। अवयवसमुदाय एव अवयवि इत्यभिप्रायेणाऽयं पूर्वपक्षः। इन्द्रियार्थसन्निकर्षेण कतिपयानवयवान् दृष्ट्वा अनन्तरं तत्सह-चरितානनुमाय, तत्प्रतिसन्धानेन अयं वृक्ष इति यत्प्रत्यक्षं जायते तदनुमानमेव, अन्येषामवय-वानामप्रत्यक्षत्वात्। एकदेशग्रहणेन सर्वावयवोपलब्धिः अनुमित्यात्मिकैव। धूमदर्शनानन्तरं वह्नेः अनुमानवत्। अत्रेदं समाधानसूत्रम् 'न, प्रत्यक्षेण यावत्तावदप्युपलम्भात्।'[१२] पूर्वपक्षिणा प्रत्यक्ष-विषयैकदेशात् अर्थान्तरमनुमेयमिति यदुक्तं तत् किम्? अवयवसमूहोऽवयवि इति पक्षे वा, अवय-वान्तराणीति वा। अवयवातिरिक्तावयविनः उत्पत्तिपक्षे अवयवान्तराणि अवयवि चेति वा सम्मतम्।

In Public domain. Digitization Muthulakshmi Research Academy

अवयवसमूहपक्षे अवयवान्तरणि अनुमेयानि इत्युच्यते चेत्, यथा प्रत्यक्षदृष्टः अर्वाग्भागः वृक्षो न भवति, तथैव परमध्यभागावपि वृक्षो न भवत इति अयं वृक्ष इति बुद्धिः न भवत्येव।[११] न च कतिपयानवयवान् दृष्ट्वा तत्सहचरितानि अवयवान्तराणि अनुमाय, तत्प्रतिसन्धानेन इयं वृक्षबुद्धिः जायतेति वाच्यम्। एवं सति अवयवान्तराण्येवानुमेयानि, न वृक्षः इति वृक्षस्यानुमेयत्वकथनं नोचितम्। नापि अवयवातिरिक्तावयविनः अनुमेयत्वं सम्भवति। अतिरिक्तावयविनः एकदेशसम्बन्धसत्वेन अवयवि अपि प्रत्यक्षमेव तस्मात् वृक्षबुद्धिः अनुमानं न भवति। यावत्प्रत्यक्षेण एकदेशग्रहणमङ्गीक्रियते तावत् प्रत्यक्षेणैव उपलम्भादनुमानं न भवति। एकदेशस्य प्रत्यक्षानङ्गीकारे च अनुमानप्रवृत्तेरभावात् अनुमानत्वकथनम् प्रत्यक्षस्यानुचितम्। वस्तुतः अवयवातिरिक्तावयवी अङ्गीकर्तव्यः, न्यायदर्शने तत्साधनमेवं विद्यते। 'सर्वाग्रहणमवयव्यसिद्धेः।'[१४] अवयव्यसिद्धेः = अवयवातिरिक्तावयविनो अभावात्, सर्वाग्रहणम् = सर्वेषां द्रव्यगुणकर्मसामान्यविशेषाणां ग्रहणं न स्यात्। परमाणुसमूहस्याप्रत्यक्षत्वात् तदाश्रितद्रव्यगुणकर्मादीनां प्रत्यक्षत्वं न स्यात्। अवयवातिरिक्तावयविनः अङ्गीकारे च परमाणूनामप्रत्यक्षत्वेऽपि अवयविनः प्रत्यक्षत्वात् तदाश्रिताः द्रव्यगुणकर्मादयः प्रत्यक्षविषयाः भवितुमर्हन्ति। अपि च एको घटः इति एकत्वप्रत्ययस्यानुपपत्तिश्च, परमाणूनामनेकत्वात्। 'सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम्'[१५] सेनाङ्गेषु वा वनाङ्गेषु वा यदा पृथक्त्वं न गृह्यते तदा एकं वनमिति एकत्वबुद्धिः यथा जायते तथा परमाणुसमूहे पृथक्त्वाग्रहणात् एकमिति प्रत्ययः भाक्तः (औपचारिकः) इति चेन्न अणूनामतीन्द्रियत्वात्। वस्तुतः प्रत्यक्षयोग्यतासत्वे दूरस्थत्वात् यत्र पृथक्त्वस्य अग्रहणम्। तत्र भाक्तः, एकत्वप्रत्ययो भविष्यति। प्रकृते परमाणुसमुदायस्य प्रत्यक्षयोग्यतैव नास्तीति एकत्वप्रत्ययो न गौणः। एवं महान् घटः इति घटे महत्वप्रत्ययोऽपि अनुपपन्नः, अणुषु महत्त्वाभावात्। एवं इमौ संयुक्तौ इति द्वित्वसामानाधिकरण्येन संयोगप्रतीतिरपि अनुपपन्ना स्यात्। एवं घटत्वपटत्वजातिप्रत्ययोऽपि अवयवातिरिक्तावयविनं व्यवस्थापयति।

निबन्धान्तटिप्पण्यः

1.न्या.स.१.१.१ 2.न्या.सू१.१.४ 3.न्या.सू.भा.२.१.८,पृ.222
4.न्या.सू.२.१.८ 5.न्या.सू.२.१.९ 6.न्या.सू.अ.२.१.१०
7.न्या.सू.२.१.११ 8.न्या.सू.2.1.11 9.न्या.सू.भा.२.१.११, पृ.229
10.न्या.सू.भा.२.१.१२,पृ.230 11.न्या.सू.२.१.३०
12.न्या.सू.२.१.३१ 13.न्या.सू.भा.२.१.३२, पृ.269
14.न्या.सू.१.१.३४ 15.न्या.सू.२.१.३६

In Public domain. Digitization Muthulakshmi Research Academy

अद्वैते प्रमाणविमर्शः

डा. के.गणपतिभट्टः

आचार्यः कामकोटीशः गोडाश्रीवंशजो गुरुः।
तयोः संस्मरणादेव जन्म मे सफलं ध्रुवम्।।

धर्मार्थकाममोक्षेषु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। न स पुनरावर्तते इति श्रुत्या मोक्षस्यैव नित्यत्वावगमात् पुरुषार्थेषु तस्य परमत्वम्। इतरेषां तु अनित्यत्वम् तद्यथे....क्षीयते इत्यादिना स्पष्टम्। परमपुरुषार्थो मोक्षः ब्रह्मज्ञानादेव भवति। तमेव विदित्वातिमृत्युमेति 'नान्यः पन्थाविद्यतेऽयनाय' इति श्रुतिः तत्र प्रमाणम्। ब्रह्मज्ञानस्य मोक्षसाधनत्वावगमात् मोक्षसिद्धये ब्रह्मतज्ज्ञानं तत्प्रमाणं च निरूप्यते इति परिभाषा।

प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणम्। प्रमायाः करणं प्रमाणमिति षष्ठी समासः। ब्रह्मतज्ज्ञानप्रमाणानां मध्ये प्रमाणस्य प्रमाकरणत्वं सामान्यलक्षणम्। करणत्वञ्चासाधारणत्वम्। कारणतायामसाधारणत्वञ्च कार्यत्वन्यूनवृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वम्। तेन धर्माधर्माद्यदृष्टादौ नातिव्याप्तिः। प्रमात्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं सम्पद्यते। प्रकृते प्रमापदसमभिव्याहारात् न्यूनवृत्तिपदेन प्रमात्वं गृह्यते। तथा च मनस्यपि नातिव्याप्तिशङ्का। प्रमात्वञ्च स्मृतिसाधारणतदसाधारणभेदेन द्विविधम्। स्मृतिसाधारणमबाधितार्थविषयकत्वं स्मृतिभिन्नस्य च अनधिगताबाधितविषयकज्ञानत्वम्। स्मृतेः व्यावृत्तं स्मृतिव्यावृत्तम्। व्यावृत्तिः अवृत्तित्वं वृत्तित्वाभावः स्मृतिनिरूपितवृत्तित्वाभाववत्। अनधिगताबाधितार्थविषयकज्ञानत्वं स्मृतिव्यावृत्तं लक्षणमित्यर्थः। अत्र अनधिगताबाधितार्थो विषयो यस्य तत् अनधिगतार्थविषयकं, तादृक् च ज्ञानम्, अनिधगतार्थविषयकज्ञानं, तत्वं ज्ञानत्वम्, अत्र अनधिगतत्वं पूर्वोत्पन्नवृत्त्यात्मकज्ञानाविषयत्वम्। अबाधितत्वं बाधाविषयत्वम्, अनधिगतत्वं स्मृतौ अतिव्याप्तिवारणाय, अबाधितत्वं शुक्तिरूप्यादिभ्रमेऽतिव्याप्तिवारणाय। अर्थपदाप्रवेशे विकल्पस्यापि स्वतन्त्रवृत्तित्वाभ्युपगमे तत्रातिव्याप्तिः स्यात् अर्थपदप्रक्षेपे तु विकल्पस्य शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः इति पतञ्जलसूत्रानुसारं तस्य वस्त्वविषयकत्वेन नातिव्याप्तिः। निद्रायाः स्वतन्त्रवृत्तित्वाभ्युपगमपक्षे (अभावप्रत्ययालम्बनावृत्तिः निद्रा) अतिव्याप्तिवारणाय ज्ञानपदम्। शिखामणिकारास्तु ज्ञानपदस्य विशेषप्रयोजनं नास्तीति वदन्ति।

तद्वति तत्प्रकारकानधिगताबाधितविषयकज्ञानत्वं प्रमात्वमिति नैयायिकपद्धत्यैव कथं न प्रमात्वलक्षणं निरुच्यते इति शङ्कायाम् इदमुच्यते तत्त्वावेदकमहावाक्यजन्यबोधेऽव्याप्तिः, तस्य अस्मन्मते

उपाचार्यः, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

निर्विकल्पतया किञ्चित्प्रकारविशेष्यकत्वाभावात्। सिद्धिब्रह्मानन्दीयेऽपि श्रुतिशिखोत्थाखण्डधीगोचर इत्यत्र धियि अण्डत्वं संसर्गाविषयत्वरूपं निर्विकल्पकत्वमेवेति प्रतिपादितम्। संसर्गाविषयकमनोवृत्तिविशेषविषयीभूतमिति निरूपणावसरे प्रकारत्वविशेष्यत्वानवगाहित्वं संसर्गाविषयकत्वे प्रयोजकम्। स्मृतिसाधारणन्तु स्मृतिवृत्तित्वे सति स्मृतिभेदसामानाधिकरण्यम्। रजतं विशेष्यीकृत्य जायमानेदं रजतमिति ज्ञानात् परं नेदं रजतमिति बाधनिश्चयः न भवति। अतस्तत्र इदं रजतमिति ज्ञाने अबाधितार्थविषयकत्वमस्तीति लक्षणसमन्वयः।

व्यावहारिकार्थविषयकज्ञानत्वमेव प्रमात्वलक्षणमस्तु इति चेत् अहं ब्रह्मास्मीति वृत्तौ अव्याप्तिः। तत्र व्यावहारिकार्थविषयकत्वस्याभावात् तर्हि व्यावहारिकपारमार्थिकान्यतरविषयकज्ञात्वमेव प्रमात्वलक्षणमस्तु इत्युक्ते अन्यतरत्वस्य भेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वस्य गुरुशरीरस्य लक्षणे प्रवेशे गौरवमिति, किञ्च दृष्टिसृष्टिपक्षे व्यावहारिकसत्त्वानङ्गीकारेण तद्घटितलक्षणस्य निर्वक्तुमशक्यत्वाच्च। तर्हि अप्रातिभासिकार्थविषयकज्ञानत्वमेव लक्षणमस्त्विति चिन्तायां सत्ता त्रैविध्यानङ्गीकर्तॄणां मते लक्षणस्य दुर्घटत्वात् पूर्वोक्तमेव लक्षणं निरूपितम्। लक्षणघटकाबाधितत्वम् संसारदशायामबाधित्वम्। अत एव वस्तुतः घटादेः मिथ्यात्वेऽपि न ज्ञाने लौकिकप्रमारूपेऽव्याप्तिः। तानि च प्रमाणानि अस्मन्मते प्रत्यक्षानुमानोऽपमानार्थापत्यनुपलब्धिभेदेन षट्। तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम्। प्रत्यक्षप्रमा तु चैतन्यमेव। यत्साक्षात् ब्रह्मेति श्रुतेः।

इन्द्रियसन्निकर्षादिजन्यान्तःकरणवृत्तिस्तु ज्ञानाभिव्यञ्जकत्वात् प्रमेत्युपचर्यते। तस्याश्च जन्यत्वात् तत्करणस्य चक्षुरादेः प्रमाणत्वम्। प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्।

ज्ञाने विषये च प्रत्यक्षत्वव्यवहारोऽस्ति। ज्ञानगतप्रत्यक्षत्वं तु प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वं ज्ञानात्मकप्रत्यक्षलक्षणम्।

द्वितीयलक्षणे विषयप्रत्यक्षे तत्तदाकारवृत्त्युपहितत्वं प्रमातरि तत्तदिन्द्रिययोग्यत्वञ्च विषये विशेषणं देयम्। तथा च तत्तदाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति तत्तदिन्द्रियोग्यत्वं विषयस्य प्रत्यक्षत्वम्।

चैतन्याभिव्यञ्जकवृत्तिः (अन्तःकरणवृत्तिः) इन्द्रियसन्निकर्षजन्येति सन्निकर्षाः संयोगसंयुक्ततादात्म्यसंयुक्ताभिन्नतादात्म्यभेदात् त्रिविधाः। क्रमेण द्रव्यतद्गुणरूपगुणधर्माणां वा घटघटगतरूपतद्वृत्तिवृत्तिजनने तेषामुपयोगः।

प्रमायाः जन्यत्वेन (जन्यत्वात्) चक्षुरादेः प्रमाणत्वम् इत्यादिपदेन आगमानुपलब्ध्योरपि ग्रहणात् प्रत्यक्षत्वे नैयायिकाभिप्रेतेन्द्रियजन्यत्वं नात्यन्तं प्रयोजकम् इन्द्रियजन्यत्वस्य पत्यक्षत्वप्रयोजकत्वेन

In Public domain. Digitization Muthulakshmi Research Academy

अनुमित्यादेरपि मनोजन्यतया प्रत्यक्षत्वापत्तिः। ईश्वरज्ञाने इन्द्रियजन्यत्वाभावेऽपि प्रत्यक्षत्वव्यवहार-दर्शनात् प्रत्यक्षत्वं न इन्द्रियजन्यत्वव्याप्यम्।

प्रत्यक्षं द्विविधम् - जन्यमजन्यञ्च। जन्यं पुनर्द्विविधम् इन्द्रियजन्यमजन्यञ्च। तदुभयम् पुनर्द्विविधम् सविकल्पकं निर्विकल्पकञ्चेति। अजन्यञ्च द्विविधम्। शुद्धचैतन्यम् साक्षिचैतन्यञ्चेति। सचाक्षि-चैतन्यम् पुनर्द्विविधम् - जीवसाक्षी ईश्वरसाक्षी चेति। तत्र साक्षिभास्यमपि वृत्तिभास्यमिति साक्षिभास्यानामपि वृत्तिभास्यत्वमिति एकः पक्षः। तन्नास्तीत्यपरः पक्षः। तत्र प्रथमपक्षे साक्षिप्रत्यक्षत्वं साक्षिमात्रस्य न विषयांशे तस्य प्रत्यक्षत्वम्। विषयांशे तस्य प्रत्यक्षत्वं तु वृत्तिप्रत्यक्षत्वमादायैव। साक्षिभास्यमपि वृत्तिभास्यं भवत्येवेति परिभाषाकृतामभिप्रायः।

निरुक्तं प्रत्यक्षं सविकल्पकनिर्विकल्पकभेदेन द्विविधम्। तत्र घटमहं जानामीति प्रत्यक्षं सविकल्पकम्। सोऽयं देवदत्तः तत्वमसीत्यादिसम्बन्धानवाहिवाक्यजन्यं ज्ञानं निर्विकल्पकप्रत्यक्षम्। अनयोः वाक्ययोः वैशिष्ट्यं न तात्पर्यविषयः। विशेष्यैकत्वेन शुद्धस्यैव तात्पर्यविषयत्वात्। शुद्धस्य च ज्ञानस्य संसर्गानवगाहितया निर्विकल्पकत्वम्।

जीवसाक्षि ईश्वरसाक्षिभेदेन यत् प्रत्यक्षं तत् अन्तःकरणवृत्यवच्छिन्नचैतन्यं जीवः तदुपहितं जीवसाक्षी। अन्तःकरणस्य विशेषणत्वे जीवत्वम्, उपहितत्वे ईश्वरत्वमिति विवेकः। एवं मायोपाधिं स्वीकृत्य ईश्वरसाक्षिणोः भेदः। पूर्वोक्तम् इन्द्रियजन्यं ज्ञानं चक्षुरादि इन्द्रियभेदात् पञ्चविधम् इन्द्रियाजन्यं प्रत्यक्षं सुखादिकम्। इन्द्रियजन्यं घटादिप्रत्यक्षमिति विशेषः।

अर्थापत्तिः

उपपाद्य ज्ञानेनोपपादककल्पनमर्थापत्तिः। अर्थापत्तिः शब्दः प्रमाणप्रमेयोभयवाची। अर्थस्य वस्तुनः आपत्तिः - उपादानं सम्पादनम् - प्रमाज्ञानमर्थापत्तिः प्रमा। अर्थस्य आपत्तिः प्रमाज्ञानं यतः तत् अर्थापत्तिः प्रमाणम्। उपपाद्यज्ञानं करणम् उपपादकज्ञानं फलम्। रात्रिभोजनं विना दिवा भुञ्जानस्य पीनत्वमनुपपन्नमिति पीनत्वमुपपाद्यम्। रात्रिभोजनमुपपादकम्। दृष्टार्थापत्तिः - इदं रजतमित्यत्र श्रुतार्थापत्तिः तरति शोकमात्मवित् इत्यत्र। पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं कल्प्यते। अत्र निषिध्यमानत्वज्ञानं प्रमाणभूतार्थापत्तिः - प्रतीयमानं रजतं मिथ्येति निश्चयः फलभूताऽर्थापत्तिः।

श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेन अर्थान्तरकल्पनम्। तरति शोकमात्मविदित्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननित्यत्वान्यथानुपपत्या बन्धस्य मिथ्यात्वम् - आत्मज्ञानवान् बन्धरहितो

In Public domain. Digitization Muthulakshmi Research Academy

भवति इत्यर्थः तरति शोकमात्मविदित्यस्य। शाब्दीप्रतीतिरियं तदैव घटते यदा शोकशब्दवाच्यस्य बन्धस्य मिथ्यात्वं भवति नान्यथा। अतः कल्प्यते यः बन्धः न तात्त्विकः इति अपि तु मृषैवेति। अत्र तरति शोकमात्मवित् इति वाक्यार्थबोधानुपपत्या बन्धमिथ्यात्वं कल्पितम्।

अनुपलब्धिः

ज्ञानकरणाजन्याभावासाधारणकारणम् अनुपलब्धिरूपं प्रमाणम्। यत्र सुखाभावेन पुण्याभावः साध्यते तत्र अहं पुण्याभाववान् इत्यभावविषयकानुभवं प्रति असाधारणकारणभूते यत्र सुखाभावः तत्र पुण्याभाव इति व्याप्तिज्ञानेऽतिव्याप्तिवारणाय अजन्यान्तम्। अदृष्टादौ अतिव्याप्तिवारणाय असाधारणेति, अभावस्मृत्या साधारणकारणे संस्कारेऽतिव्याप्तिवारणाय अनुभवेति विशेषणम्। योग्यानुपलब्धिः अभावानुभवं प्रति कारणमिति विशेषः। योग्यस्य प्रतियोगिनः इति व्युत्पत्तिकरणे स्तम्भे पिशाचादिभेदस्य अप्रत्यक्षत्वात् द्वितीय आत्मगतस्य धर्माद्यभावज्ञानस्य प्रत्यक्षसम्भवात् ज्ञानाकरणेत्यादि व्यर्थं स्याद्विशेषणम् अतः योग्या च सा अनुपलब्धिश्चेति कर्मधारय इति विशेषणम्। इन्द्रियस्य अभावेन सह सन्निकर्षाभावेन अभावप्रत्यक्षार्थं अनुपलब्धेः आवश्यकता इति।

In Public domain. Digitization Muthulakshmi Research Academy

अनुमानं स्वतन्त्रं प्रमाणम्

डा. नावल्पाक्कं रामानुज श्रीधरन्

मतभेदेन प्रमाणानि दश, नव, अष्टौ, सप्त, षट्, पञ्च च इति क्रमो वर्तते। नैयायिकास्तु प्रत्यक्षानुमानोपमानशब्दा इति चत्वार्येव प्रमाणानीति ब्रुवन्ति। वेदान्तादिमते प्रत्यक्षानुमानशब्देति प्रमाणत्रयं, वैशेषिकादयः प्रत्यक्षानुमानेति प्रमाणद्वयं च कथयन्ति। चार्वाकस्तु प्रत्यक्षमेकमेव प्रमाणमन्यत् (अनुमानादि) अप्रमाणमिति आग्रहेण वदति। नैयायिकस्य तु अनुमानप्रमाणे नैर्भर्यं वर्तते। अतः अनुमानाद्यनङ्गीकर्तृचार्वाकमतं सोपपत्तिकं निरसनं कृत्वा अनुमानं द्वितीयं प्रमाणमिति सङ्ग्रहेण निरूप्यते।

तर्कसङ्ग्रहकारेण विदुषा अन्नंभट्टेन तर्कसंग्रहे अनुमानखण्डे उक्तम् - तस्मात् लिङ्गपरामर्शोऽनुमानम्। तस्यैतस्य लिङ्गपरामर्शस्वरूपस्य अनुमानप्रमाणस्य लक्षणं तर्कसङ्ग्रहे अनुमानखण्डे उपक्रमे एव कथितम् - अनुमितिकरणम् अनुमानम् इति। अर्थात् अनुमितिकरणत्वम् अनुमानस्य लक्षणं ज्ञेयम्। एतादृशस्य अनुमानप्रमाणस्य प्रयोजनं किमिति पृष्टे उच्यते लोके ईश्वरादीनां सिद्धिस्तु यथार्थज्ञानमन्तरा न सम्भवति। किञ्च ईश्वरादीनामिन्द्रियाविषयतया साक्षात्कारासम्भवेन ईश्वरादीनां सत्त्वे अनुमितिरेव आश्रीयते। अनुमितिरूपं ज्ञानं किञ्चित्करणकमेव भवति, तच्च करणमनुमानमिति अनुमानस्य प्रयोजनम्। अनुमितिरूपप्रमाकरणतया प्रामाण्यं च अवगन्तव्यम्।

चार्वाकस्तु अनुमितेः प्रमात्वं नाङ्गीकरोति, अनुमितिकरणभूतस्य अनुमानस्य अनुमितिरूपप्रमाकरणत्वरूपं प्रामाण्यं नास्तीति निश्चिनोति। तथाहि कस्मिन् चित् स्थले धूमदर्शनं कुर्वतः पुरुषस्य वह्न्यर्थं प्रवृत्तिः न हि धूमवति स्थाने वह्निः अस्ति इति निश्चयेन, अपि तु तस्य वह्नेः अस्तित्वसम्भावनयैव, केषुचित् स्थलेषु (महानसादौ) वह्निधूमयोः उभयोः युगपदवस्थितिं पश्यतो नरस्य अन्यत्र कस्मिन् चित् अपरिचितस्थले (पर्वते) यदा धूमसाक्षात्कारः वह्नेः अप्रत्यक्षत्वं च भवति तदानीं तस्य नरस्य इदं ज्ञानं जायते अत्र (पर्वते) वह्निः स्यात् इति, अत्र वह्निनिर्णायकं प्रमाणं किमपि नास्ति। अतः उत्कटैकतरकोटिकसंशयात्मकसंभावनयैव धूमदर्शनानन्तरं वह्निं साक्षात्कर्तुं प्रवृत्तिरित्यङ्गीकार्यम्।

न च यदि धूमदर्शनोत्तरं वह्निसम्भावनयैव वह्न्यर्थिनः प्रवृत्तिः, सम्भावना च उत्कटैकतरकोटिकसंशयः तर्हि विपरीतकोट्यंशे यत्र औत्कट्यं ततोऽपि प्रवृत्यापत्तिः दुर्निवारा। किञ्च यस्य मते प्रामाण्यनिश्चयं विना न प्रवृत्तिः सम्भाव्यते, तन्मते संशयात्मिकायाः सम्भावनायाः नितरामप्रामाणिकतया तदनन्तरं वह्न्यर्थिनः पुरुषस्य वह्न्यर्थं प्रवृत्तिः दुरुपपादैव। संवादाभिमानेन प्रामाण्यनिश्चयाभिमानमूलिका प्रवृत्तिः कथञ्चित् उपपद्येतापि तावता अनुमानस्य अप्रामाण्यं न साधयितुं शक्यमिति वाच्यम्।

न्यायसहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, गुरुवायूर् परिसरः, पुरनाट्टुकरा, त्रिश्शूर् मण्डलम्, केरलराज्यम्

In Public domain. Digitization Muthulakshmi Research Academy

वयं (चार्वाकाः) अनुमानं न प्रमाणम् इति वदामः। तत्र अनुमाने प्रामाण्यसम्भावनायामेव तात्पर्यम्, सम्भावना हि धर्मिणि यस्य सम्बन्धः अज्ञातः तस्य अगृहीतसंसर्गकस्य अर्थविशेषस्य स्मृतिरूपा, अथवा उत्कटैकतरकोटिकसंशयरूपा। परन्तु तत्र सम्भावनायाः स्मृतित्वपक्षे साधर्म्यदर्शनमुद्बोधकविधया कारणम्, सम्भावनायाः संशयरूपत्वे च साधर्म्यदर्शनं साधारणधर्मदर्शनविधया कारणम्। तथा सति अनुमाने साधर्म्यदर्शनेन अप्रामाण्यसम्भावना न हि अनुमानप्रमाणजन्या, येन अप्रमाणेन अनुमानेन जायमानायाः अस्याः सम्भावनायाः प्रामाण्यं प्रसज्येत। अनुमानं न प्रमाणम् इत्यस्य अनुमाने अप्रामाण्यसम्भावनापरतया अनुमानस्य अप्रामाण्यं सङ्कटाकुलं भवत्येव तदेव च अस्माकं चार्वाकाणामिष्टम्। अनुमाने अप्रामाण्यनिश्चायकस्य कस्यचित् प्रमाणस्य असत्वेऽपि अप्रामाण्यसम्भावनामात्रेण अनुमानस्य अप्रमाणत्वव्यवहारः सूपपद्यते, सम्भावनामात्रेणाऽपि लोके बहुधा व्यवहारदर्शनात् इति।

चार्वाकमतखण्डनम्

सम्भावनामात्रेण लोके व्यवहारदर्शनेपि त्वदभिहितस्य अनुमानं न प्रमाणमिति वाक्यस्य तव मते प्रामाण्यमस्ति वा न वा? प्रामाण्यमस्तीत्युक्ते प्रत्यक्षमेकमेव प्रमाणं प्रत्यक्षातिरिक्तं न प्रमाणमिति त्वत्कृतप्रतिज्ञाव्याघातः अर्थात् अनुमानं न प्रमाणमिति वाक्यस्य प्रामाण्यापत्या (प्रत्यक्षातिरिक्तं) शब्दप्रमाणं सिद्ध्यतीति प्रत्यक्षातिरिक्तं न प्रमाणमिति तव प्रतिज्ञाव्याघातः। अनुमानं न प्रमाणमिति वाक्यस्य प्रामाण्यं नास्तीत्युक्ते अनुमानं प्रमाणमिति सिद्ध्यति इति प्रत्यक्षातिरिक्तं न प्रमाणमिति तव प्रतिज्ञाव्याघातः तदवस्थ एव। तथा च चार्वाकः कथञ्चिदपि अनुमानप्रमाणं निराकर्तुं न शक्नोति। तथा च अनुमानप्रमाणेन अर्थात् क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात्, घटवत् इत्याद्यनुमानेन ईश्वरादीनां सिद्धिर्भवति इति अनुमानप्रमाणस्य प्रयोजनं प्रामाण्यञ्च ध्येयमिति नैयायिकाभिप्रायसङ्ग्रहः।

इदन्त्ववधेयम्। प्रत्यक्षमेकमेव प्रमाणमित्युक्ते प्रत्यक्षेण प्रमाणेतरविभागासिद्धेः। अर्थात् व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम् इति नीत्या प्रमाणलक्षणेनैव प्रमाणे तदितरव्यावृत्तिरनुमेया, किन्तु प्रत्यक्षैकप्रमाणपारायणाः चार्वाकाः कथं तामितरव्यावृत्तमनुमिमीरन्? किञ्च सुखदुःखादिसाधनाप्रतिपत्तेः तन्मूले प्रवृत्तिनिवृत्ती अपि न स्याताम्। नाप्रत्यक्षं प्रमाणमस्तीत्यभ्युपगम्य परप्रत्यायनार्थं शास्त्रं प्रणयन् वाक्यं वा उच्चारयन् स्वामेव प्रवृत्तिं स्ववाचा विडंबयीतीत्यहो भद्रं पाण्डित्यमात्मनः प्रकटितवान् इति।

किञ्च बौद्धैकदेशीमतम् - अनुमानमेवैकं प्रमाणमिति। तदयुक्तम् प्रत्यक्षाभावे अनुमानोत्थानासम्भवात्। सुदूरमपि गत्वा धर्मिलिङ्गदृष्टान्तानामनुमानप्रवृत्तिमिच्छताऽवश्यं प्रत्यक्षेण ग्रहणमवश्यमभ्युपगन्तव्यमिति सारः। तथा च इदं स्मृतिपथि रक्षणीयम् अनुमानं द्वितीयं प्रमाणमिति।

In Public domain. Digitization Muthulakshmi Research Academy

अनुपलब्धेः प्रमाणान्तरत्वनिरासः

डा. जि.जयमाणिक्यशास्त्री

न्यायकुसुमाञ्जलौ तृतीयस्तवकस्य प्रारम्भे अनुपलब्धिर्नाभावसाधिका किन्तु योग्यानुलसब्धिरेव इति अनुपलब्धेः ईश्वराभावसाधकत्वं निरस्तम्। स्तबकान्ते अनुपलब्धिः प्रमाणमेव न भवति इति तस्या ईश्वराभावसाधकत्वं कारिकात्रयेण पुनर्निरस्यते। अनुपलब्धिप्रमाणवादिनः अभावग्रहणाय अनुपलब्धि प्रमाणं मन्यन्ते। किन्तु नैयायिकमते अभावग्रहणे इन्द्रियमेव करणम्। अतः प्रत्यक्षेणैव अभावग्रहणम् इति नानुपलब्धिः प्रमाणम् इति कारिकात्रयेण साध्यते। तत्र, द्वितीयकारिकोक्तम् 'इन्द्रियाणि अभावग्रहे करणानि' इति प्रतिज्ञावाक्यं तत्साधनाय चत्वारो हेतवः प्रथमकारिकायां चत्वारश्च द्वितीयकारिकायामुक्ताः।

१. 'प्रतिपत्तेरपारोक्ष्यात्' इति प्रथमो हेतुः। तस्याऽयं भावः यत् अभावप्रतीतिरपरोक्षः भवति। जन्यापरोक्षज्ञानस्य च इन्द्रियजन्यत्वनियमात् अभावग्रहणम् इन्द्रियजन्यमेव।

२.'इन्द्रियस्यानुपक्षयात्' इति द्वितीयो हेतुः। अनुपलब्धिप्रमाणवादिनोऽधिकरणग्रहणे इन्द्रियस्य शक्तिरुपक्षीयते इति नेन्द्रियभावग्रहणे समर्थमिति वदन्ति। तन्निवारणाय कारिकायाम् 'इन्द्रियस्यानुपक्षयात्' इत्युक्तम्। अधिकरणग्रहणात्मके अवान्तरव्यापारे इन्द्रियस्य शक्तिर्न क्षीयते। अन्यथा घटग्रहणस्थलेऽपि इन्द्रियार्थसन्निकर्षरूपे अवान्तरव्यापारे इन्द्रियशक्तेरुपक्षीणत्वात् इन्द्रियं घटग्रहणे समर्थं न स्यात्।

३. 'अज्ञातकरणत्वाच्च' इति तृतीयो हेतुः। ज्ञानकरणं ज्ञानं परोक्षं भवति। अनुमाने लिङ्गज्ञानम् उपमाने सादृश्यज्ञानं शाब्दबोधे च पदज्ञानं करणमिति ज्ञानकरणत्वात् अनुमानोपमानशब्दप्रमाणजन्यानि सर्वाण्यपि ज्ञानानि परोक्षाणि अभावस्य ग्रहणं तु न ज्ञानकरणकम् इति। अपरोक्षम् इन्द्रियजन्यं च।

४. 'भाववेषाच्च चेतसः' इति चतुर्थो हेतुः। सर्वं ज्ञानं भावभूतकरणसहकृतेन मनसा जन्यते, अत एव अभावग्रहणेऽपि भावभूतं करणम् इन्द्रियमेव मनसः सहकारित्वेनाभ्युपेयम्। अतः इन्द्रियमेवाभावग्रहे करणम् नानुपलब्धिः इति प्रथमकारिकाया भावार्थः। (का.३.२०)

१. अभावग्रहणे इन्द्रियमेव करणम् इत्यास्याः एव प्रतिज्ञायाः साधनाय अस्यामपि कारिकायां चत्वारो हेतवः उपन्यासाः। तत्र ''प्रतियोगिनि सामर्थ्यात्'' इत्ययं प्रथमो हेतुः। अनुमानस्थले इन्द्रियं यथा अनुमानेनैव घटस्य तदभावस्य च ग्रहणं भवति। एवमभावग्रहणस्थले इन्द्रियं प्रतियोगिनो घटस्य ग्राहकमिति घटाभावस्यापि ग्राहकमिन्द्रियमेव।

सहाचार्यः, न्यायविभागः, श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, एनात्तूर्, काञ्चीपुरम्

In Public domain. Digitization Muthulakshmi Research Academy

२. ''व्यापाराव्यवधानतः'' इति द्वितीयो हेतुः। अवान्तरव्यापारेण इन्द्रियस्य शक्तिः न क्षीयते इति पूर्वकारिकायामुक्तम् अन्यथा इन्द्रियसन्निकर्षादिरूपे अवान्तरव्यापारे उपक्षीणमिन्द्रियं घटग्रहणेऽपि नालं स्यात्।

३. ''अक्षाश्रयत्वाद्दोषाणाम्'' इति तृतीयो हेतुः। भ्रमस्थले कारणदोष एव सर्वत्र कारणं मन्यते। अतोऽभावभ्रमस्थलेऽपि करणदोषस्यैव प्रयोजनकत्वं स्वीकार्यम्। अभावग्रहे इन्द्रियं चेत् करणं तदा इन्द्रियदोषः अभवाग्रहे कारणम्। अनुपलब्धिश्चेत् करणं तर्हि अनुपलब्धिनिष्ठो दोषस्तत्र कारणम्। अनुपलब्धेश्चाभावरूपत्वात् न दोषाधिकरणत्वमुपपद्यते। पाण्डुरोगादौ च इन्द्रियमेव दोषाधिकरणं भवति इति अभावभ्रमे इन्द्रियाश्रितो दोष एव कारणम्। अत इन्द्रियमेवाभावग्रहे करणम्।

४. ''विकल्पनात्'' इति चतुर्थो हेतुः। विशिष्टज्ञानात् इत्यर्थः। घटाभाववद्भूतलम् इत्यत्र घटाभावो विशेषणम्, भूतलं च विशेष्यम् इति। विशेषणविशेष्यभावयुक्तमेव विशिष्टज्ञानम्। तत्र यदि भावग्रहणाय प्रत्यक्षम् अभावग्रहणाय चानुपलब्धिः पृथक् प्रमाणमिति मन्यते तदा घटाभाववद्भूतलमिति विशिष्टज्ञानं न इन्द्रियजन्यमभावधीत्वात्। नानुपलब्धिजन्यं भावधीत्वात्। इति विशिष्टज्ञानस्य ग्रहणं केनापि प्रमाणेन न भवेत्। अतो घटग्रहणवत् घटाभावग्रहणेऽपि इन्द्रियमेव कारणमित्यस्याः कारिकाया अभिप्रायः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणमीमांसा

डा. श्रीरामः ए.एस्.

वेदोक्तकर्मसु पुरुषाणां निश्चितप्रवृत्तये अपौरुषेयाणां वेदानां व्याख्यानस्यावश्यकताऽभूत्। तच्च प्रवर्तकं निवर्तकं वा वेदवाक्यं विषयवैचित्र्येण विस्तृतम् इत्यतः अपेक्षमाणव्याख्यानप्रणिधानेन अवधेयं भवति। विना व्याख्यया भ्रान्तिरपि भवितुमर्हतीति वेदवाक्यानां व्याख्याप्रतिपादकं मीमांसा-शास्त्रमवातरत्। तत्र पूर्वभागस्य वेदस्य अर्थविचारार्थं पूर्वमीमांसा प्रवृत्ता।

धर्माधर्मविवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम्। भगवान् जैमिनिः धर्माधर्मविवेचने प्रवृत्तस्सन् पूर्वमीमांसाशास्त्रारम्भे ''अथातो धर्मजिज्ञासा''[1] इत्यनेन सूत्रेण धर्मजिज्ञासां प्रतिज्ञाय, ''मानाधीना मेयसिद्धिः''[2], ''लक्षणप्रमाणाभ्यां वस्तुसिद्धिः'' इति नियमानुसारेण प्रमेयभूतधर्मं प्रति लक्षणं प्रमाणश्चादौ वक्तव्यमिति द्वितीयसूत्रे धर्मलक्षणम् इत्थं प्रोक्तवान् ''चोदनालक्षणोर्थो धर्मः''[3] इति। तथा च वेदबोधितश्रेयस्साधनताको धर्मः इति धर्मलक्षणं पर्यवसितं भवति।

परं धर्मं प्रति चोदनैव प्रमाणम् उतान्यदपि इति परीक्षणाय तृतीयसूत्रमित्थं प्रोक्तवान् - ''तस्य निमित्तपरीष्टिः''[4] इति। तस्य धर्मस्य निमित्तस्य प्रमाणस्य, परीष्टिः परीक्षा कर्तव्या इति तार्तीयसूत्रार्थः। इत्थं धर्मं प्रति चोदनैव अर्थात् शब्दमात्रं प्रमाणं नान्यदिति निरूपणाय प्रत्यक्षादीनां प्रमाणानां निरूपणं मीमांसकैः कर्तव्यमापतितम्। अत एव पदवाक्यप्रमाणशास्त्रविशारदेषु धर्माधर्मनिरूपणे प्रवृत्तानां वाक्यशास्त्रज्ञानां मीमांसकानां प्रमाणशास्त्रकोविदैः प्रतिपादनीयप्रमाणनिरूपणे सङ्गत्युपपत्तिः। एवञ्च वेदवाक्यार्थविचारपूर्वकं धर्माधर्मनिरूपणमेवास्य विचारशास्त्रस्याद्यं लक्ष्यम्, न तु प्रत्यक्षादि-प्रमाणनिरूपणम्। तथापि धर्माधर्मयोः वेदैकवेद्यत्वनिरूपणाय वेदातिरिक्तप्रमाणावेद्यत्वप्रतिपादनाय प्रत्यक्षादीनां प्रमाणानां निरूपणं कर्तव्यमापतितम्।

तर्हि किं नाम प्रमाणम् इति प्रमाणनिरूपणावसरे उच्यते -

प्रमाकरणमेवात्र प्रमाणं तर्कपक्षवत्।
प्रमा चाज्ञाततत्त्वार्थज्ञानमेवात्र भिद्यते।।[5] इति।

प्रमाणम्

प्रमां प्रति यत् साधनं तत् प्रमाणम्। तत्र प्रमा नाम अज्ञाततत्वार्थज्ञानम्। अनधिगताबाधित-

अतिथ्यध्यापकः, मीमांसाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति

In Public domain. Digitization Muthulakshmi Research Academy

वस्तुविषयकं ज्ञानमिति यावत्। एवञ्च अनधिगताबाधितार्थविषयकज्ञानजनकं प्रमाणम् इति सिद्ध्यति। तत्र च प्रमाणलक्षणे अनधिगतमिति एकं दलम्, अबाधितमिति अपरं दलं विद्यते। तत्र अनधिगतदलेन अधिगतविषययोः स्मृत्यनुवादयोः निरासः क्रियते।

फलार्थं हि प्रमाणानां स्वीकारात् अर्थपरिच्छेदे वा व्यवहारे वा अनुवादः न किञ्चित् वैलक्ष्यण्यं सम्पादयतीति फलविशेषाभावात् अनुवादस्यापि प्रमाणत्वनिरासः। तदुपरि प्रश्नः यदि अनधिगतस्यैव प्रमाणत्वं तर्हि - 'घटोयं', 'घटोयम्' इत्यादिधारावाहिकस्थले द्वितीयादिज्ञानानाम् अधिगताऽर्थविषयकत्वात् अप्रामाण्यापत्तिरिति चेत् घटादिस्वरूपस्याधिगतत्वेपि द्वितीयादिक्षणानां पूर्वपूर्वज्ञानाविषयत्वात् द्वितीयादिक्षणविशिष्टत्वेन विषयस्यापि अनधिगतत्वात् कालस्य तावत् पदार्थविशेषणतया इन्द्रियवेद्यत्वात् प्रामाण्यसम्भवः। अबाधितदलेन अयथार्थज्ञानानां भ्रमसंशयादीनां निरासः।

"तस्मादज्ञाततत्वार्थज्ञानसाधनमेव नः"[6] इति मानमेयोदयोक्तरीत्या अनधिगताबाधितार्थविषयकज्ञानजनकं प्रमाणम् इति सिद्धम्।

तत्र तावत् प्रमाणानाम् इयत्ताविषये विवदन्ते बहवः। यथा -

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
भासर्वज्ञश्च सांख्यास्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्।।[7] इति।

मीमांसकास्तावत् षट्प्रमाणवादिनः। यथा -

प्रत्यक्षमनुमानञ्च शाब्दं चोपमितिस्तथा।
अर्थापत्तिरभावश्च षट्प्रमाणानि मादृशाम्।।[8] इति।

प्रत्यक्षम्

तत्र प्रत्यक्षं नाम इन्द्रियार्थसम्प्रयोगजन्यं ज्ञानम्। अनुमित्यादीनां मनोजन्यत्वात्, तत्र विषयेण साकं मनसः साक्षात्सम्बन्धाभावात् सम्प्रयोगपदेन साक्षात्सम्बन्धः ग्राह्यः।

प्रत्यक्षविषये जैमिनीयं सूत्रम् इत्थं समुपलभ्यते सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम् इति। संश्चासौ सम्प्रयोगश्च सत्सम्प्रयोगः। इन्द्रियाणां विषयैः सह सम्प्रयोगे सति पुरुषस्य या बुद्धिर्जायते तत्प्रत्यक्षमित्यर्थः। तदुपरि प्रश्नः पदार्थैः साकं चक्षुरादीन्द्रियाणां संयोगानन्तरं भ्रमस्य जायमानत्वात् भ्रमात्मकप्रत्यक्षेऽपि इन्द्रियार्थसन्निकर्षजन्यत्वमस्तीति भ्रमे अतिव्याप्तमिदं

In Public domain. Digitization Muthulakshmi Research Academy

लक्षणम्। अतः सूत्रमिदं दोषग्रस्थमिति चेत् सत्यम्। अत एव सूत्रस्यास्य प्रत्यक्षलक्षणकथने सूत्रकारस्य न तात्पर्यम्। अपि तु धर्मं प्रति प्रत्यक्षस्य अप्रमाणत्वकथने एव । तथा च सूत्रस्य प्रत्यक्षलक्षणकथने तात्पर्याभावात् न दोषः। प्रत्यक्षं यतः विद्यमानविषयकम् अतः कालान्तरभाविधर्माधर्मयोः न प्रमाणमिति। एवञ्च सूत्रस्य अनिमित्तमात्रकथनपरत्वात् न दुष्टत्वम्।

अथवा संयोगशब्दस्य इन्द्रियाणां विषयैस्सह समीचीनः प्रयोगः इत्यत्रैव तात्पर्यम्। तेन भ्रमसंशययोः प्रत्यक्षागम्यत्वात् नातिव्याप्तिः।

इन्द्रियाणां विषयैस्साकं जायमानः सन्निकर्षः द्विविधः इति भाट्टाः आमनन्ति। यथा संयोगः संयुक्ततादात्म्यं च इति। आकाशवाय्वग्निजलपृथिवीनां ग्रहणं चक्षुस्त्वग्नेत्रैः संयोगेन भवति। विभुद्वय-संयोगाङ्गीकारात् आत्मनः ग्रहणं मनसः संयोगेन भवति। द्रव्यगतजातिगुणकर्मणां प्रत्यक्षत्वं, धर्म-धर्मिणोरभेदस्याभ्युपगमात् संयुक्ततादात्म्यसम्बन्धेन भवति। परं संयुक्तसमेवतसमवायस्य सन्निकर्ष-स्यानभ्युपगमात् गुणगतगुणत्वादिजातीनाम् इन्द्रियसंयुक्तद्रव्यतादात्म्याभावात् प्रत्यक्षं कथमिति चेत् गुणगतजातेः द्रव्यतादात्म्याभावेऽपि गुणत्वाश्रयगुणस्य द्रव्यतादात्म्यात् तदाश्रयद्वारा द्रव्य-तादात्म्यसन्निकर्षः सम्भवति।

अथवा संयुक्ततदात्मतादात्म्यसन्निकर्षस्यैवाङ्गीकारात् प्रत्यक्षत्वसिद्धिः। शब्दस्य श्रोत्रगुणत्वा-भावात् द्रव्यत्वाभ्युपगमात् तस्य च संयोगेनैव प्रत्यक्षत्वसिद्धौ न समवायसमवेतसमवाययोरङ्गी-करणम्। अभावस्य प्रत्यक्षत्वानङ्गीकरणेन, अनुपलब्धिप्रमाणगम्यत्वात् प्रत्यक्षाविषयत्वात् न विशेषण-विशेष्यभावोपि अङ्गीकार्यः। एवं द्वेधा त्रेधा वा सन्निकर्षः।

तच्च प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकञ्चेति। उक्तञ्च वार्तिके -

अस्तिह्यालोचनज्ञानं प्रथमं निर्विकल्पकम्।
वालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्।।
न विशेषो न सामान्यं तदानीमनुभूयते।
तयोराधारभूता तु व्यक्तिरेवावसीयते।।[9] इति।

एवं सविकल्पकविपयेपि -

ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यथा।
बुध्यावसीयते सापि प्रत्यक्ष्यत्वेन सम्मता।।[10] इति।

In Public domain. Digitization Muthulakshmi Research Academy

सन्निकर्षसमनन्तरमेव द्रव्यादिस्वरूपमात्रावगाहिशब्दानुगमशून्यं यत् सम्मुग्धं ज्ञानं जायते तदेव विशिष्टकल्पनाभावात् निर्विकल्पकमित्युच्यते। न हि सन्निकर्षसमनन्तरमेव जात्यादिकल्पनाः भवन्ति। अतः जात्यादिकल्पनाशून्यं ज्ञानं निर्विकल्पकम्। यत्तु तदनन्तरं शब्दस्मरणसहकृतं जात्यादि-विशिष्टवस्तुविषयकं 'रक्तोयं', 'घटोयम्' इत्यादिव्यक्तिविज्ञानं तत् सविकल्पकमित्युच्यते।

इदञ्च चक्षुरादीन्द्रियजन्यत्वेन चाक्षुषत्वाचश्रावणरासनघ्राणमानसभेदेन षड्विधं प्रत्यक्षं धर्मा-धर्मयोः अप्रमाणम्।

अनुमानम्

तर्हि अनुमानं धर्माधर्मयोः प्रमाणं भवितुमर्हति वा इति विचारणावसरे अनुमानलक्षणं भाष्य-कारैः इत्थं समुपस्थापितं यथा - "अनुमानं ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरे असन्निकृष्टेऽर्थे बुद्धिमुत्पादयति"[११] इति।

उक्तञ्च वार्तिके -

प्रमाताज्ञातसम्बन्धैकदेश्यथयोच्यते।
कर्मधारयपक्षो वा सम्बन्धिन्येकदेशता।।[१२] इति।

तत्र ज्ञातसम्बन्धः इति पदस्य यदि ज्ञातः सम्बन्धः येन इति विग्रहः स्वीक्रियते तदा ज्ञाता इत्यर्थावगतिः। तदनुसारं ज्ञातसम्बन्धस्य प्रमातुः पुरुषस्य, हेतुरूपैकदेशसम्बन्धात् चक्षुषाऽसन्निकृष्टे वह्निरूपैकदेशान्तरे या बुद्धिः उत्पद्यते, सा अनुमितिः। तत्करणमनुमानम्।

यदि ज्ञातश्च असौ सम्बन्धश्च इति व्युत्पत्तिः स्वीक्रियते तदा ज्ञातसम्बन्धपदेन वह्निधूमयोः व्याप्तिसम्बन्धः अभिप्रेतः। अत्र सम्बन्धाख्यैकदेशिनः एकदेशः हेतुः। तज्ज्ञानेन असन्निकृष्टस्यैकदेशा-न्तरस्य जायमानं ज्ञानम् अनुमितिः। तत्करणमनुमानम्।

यदि च ज्ञातः सम्बन्धः ययोः इति व्युत्पत्तिः अङ्गीक्रियते तदा ज्ञातसम्बन्धपदेन हेतुसाध्यौ अभिप्रेतौ। ज्ञातसम्बन्धस्य हेतुसाध्यसमुदायस्य एकदेशस्य हेतोः ज्ञानेन असन्निकृष्टस्य एकदेशस्य साध्यस्य यत् ज्ञानं जायते तत् अनुमितिः। तत्करणमनुमानम्। अयमेवार्थः उक्तश्च नारायणभट्टैः - "व्याप्यदर्शनादसन्निकृष्टार्थज्ञानमनुमानम्"[१३] इति। पर्वते धूमवत्वज्ञानात् अग्निमत्वज्ञानम्। धूमस्य व्याप्यत्वं नाम वह्न्यभाववदवृत्तित्वम्। धूमश्च वह्नेरन्यत्र न वर्तत इति धूमस्य व्याप्यत्वम्। वह्निश्च धूमादन्यत्रापि तप्तायोगोलके वर्तते इति तस्य व्यापकत्वम्। व्याप्तिर्नाम स्वाभाविकः सम्बन्धः।

In Public domain. Digitization Muthulakshmi Research Academy

स्वाभाविकत्वञ्च उपाधिराहित्यम्। साध्यस्य साक्षात्प्रयोजकं हेत्वन्तरमुपाधिः। यथा - 'अग्नीषोमीयहिंसा, अधर्मः हिंसात्वात् बाह्यहिंसावत्' इत्यत्र निषिद्धत्वमुपाधिः। बाह्यानामपि हिंसानां निषिद्धत्वादेव भवतीति अधर्मत्वे निषिद्धत्वमेव साक्षात्प्रयोजकम्। उपाधिलक्षणञ्च साध्यसमव्यापकत्वे सति साधनाव्यापकत्वम्। धूमाग्न्योः सम्बन्धः स्वाभाविकः इति भूयोदर्शनेन उपाध्यभावग्रहणजनितसंस्कारसहकृतेन्द्रियेण निश्चीयते।

तच्चानुमानं द्विविधम्। स्वार्थानुमानं परार्थानुमानञ्चेति। यत्र स्वयमेव धूमादिकं दृष्ट्वा व्याप्त्यादिनिरूपणपुरस्सरम् अनुमीयते तत् स्वार्थानमानम्।

यत्र स्वप्रतिपन्नमर्थम् अनुमानेन परं प्रति बोधनाय वाक्यं प्रयुङ्क्ते तत् परार्थानुमानम्। उक्तञ्च-

यदा पुनः स एवार्थः परवाक्येन बोध्यते।
तदा परार्थमित्याहुः तयोरेतावती भिदा।।[१४]

तच्च वाक्यम् अवयवत्रयकमिति मीमांसकाः। तथा चोक्तं - 'तर्कबौद्धमते हित्वा वयं त्र्यवयवे स्थिताः'[१५] इति। वाक्यस्य पञ्चावयवत्वे पौनरुक्त्यं दोषः। एवं बौद्धानाम् अवयवत्वस्वीकारपक्षे अध्याहारदोषः इति। उक्तञ्च - 'तदेवं पौनरुक्त्येन तथाध्याहारदोषतः।'[१६]

शब्दः

तत्र तावत् पदैर्ज्ञातैः पदार्थस्मरणे कृते।
असन्निकृष्टवाक्यार्थज्ञानं शाब्दमितीर्यते।।[१७]

पदज्ञानं करणं, पदार्थस्मृतिः अवान्तरव्यापारः। तदिदं शाब्दज्ञानं व्युत्पत्त्यधीनं भवति। यथा- कश्चित् बालः 'गामानय' इत्यादिवाक्यप्रयोगानन्तरं कस्यचित् प्रवृत्तिमुपलभ्य गवानयनरूपार्थज्ञानानन्तरमेव प्रवृत्तिर्जाता इति अवगम्यमानः शब्दप्रयोगानन्तरमेव तादृशार्थज्ञानस्य जायमानत्वात् 'गामानय' इत्यादिशब्दस्य गवानयनार्थप्रतिपादकत्वमवगच्छति। ततः परं 'गां बधान, अश्वमानय' इत्यादिप्रयोगान्तरेषु आवापोद्वापाभ्यां गोशब्दः सास्नादिमतो वाचकः, आनयनशब्दः आनयनक्रियावाचकः इति अवधारयति।

पदार्थज्ञाने जाते यत् एकविशिष्टार्थज्ञानरूपं वाक्यार्थज्ञानं जायते तत् पदैरेव जायते वा उत पदार्थस्मृतिभिर्जायते वा इति विचिकित्सायां पदार्थाः एव स्वसंसर्गरूपं वाक्यार्थं बोधयन्ति इति भाट्टानामभिप्रायः। उक्तञ्च -

In Public domain. Digitization Muthulakshmi Research Academy

तेनात्र पदावगताः पुनः पदार्थाः मिथः अन्यवं यन्ति।
इत्येवमन्वितान्वयसिद्धान्तः दर्शितोस्मदादीनाम्।।[१८] इति।

उपमानम्

दृश्यमानार्थसादृशात् स्मर्यमाणार्थगोचरम्।
असन्निकृष्टवाक्यार्थज्ञानं ह्युपमितिर्मता।।[१९]

सादृश्यज्ञानजन्यम् असन्निकृष्टार्थगोचरं सादृश्यज्ञानमुपमितिः। तत्करणम् उपमानम्। उक्तञ्च श्लोकवार्तिके -

प्रत्यक्षेणावबुद्धेपि सादृश्ये गवि च स्मृतेः।
विशिष्टस्यान्यतोसिद्धेः उपमानप्रमाणता।।[२०] इति।

तथा च भाष्ये ऊचुः - 'उपमानमपि सादृश्यम् असन्निकृष्टार्थे बुद्धिमुत्पादयति। यथा गवयदर्शनं गोस्मरणस्य'[२१] इति।

तथा हि गां दृष्टवतः पुरुषस्य कदाचिदरण्यं गतस्य गवयदर्शनसमनन्तरं गोसदृशो गवयः इति गवये गोसादृश्यज्ञानं प्रत्यक्षेण जायते। तदनन्तरं स्मर्यमाणे गवि गवयसदृशी मदीया गौः इति प्रत्यक्ष दृष्टगवयसादृश्यज्ञानं जायते। एवञ्च सादृश्यज्ञानद्वये पूर्वज्ञानम् उपमानम् उत्तरज्ञानम् उपमितिः। एवञ्च गवयनिष्ठगोसादृश्यज्ञानं करणं, गोनिष्ठगवयसादृश्यज्ञानं फलम्। उत्तरज्ञानकाले गोः सन्निकृष्टत्वाभावात् गवयसादृश्यविशिष्टगोज्ञानं प्रत्यक्षेण न भवति। अनेन गवि उपमानसादृश्यम् उपमिनोमीति अनुव्यवसायज्ञानं भवति न तु अनुमिनोमीति। अतः नेदमनुमानम्। गोदर्शनकाले अज्ञातगवयस्य तत्सादृश्यानुभवाभावात् नापि स्मृतावन्तर्भवति। पदज्ञानाभावात् न च शब्दः। अतः उपमानमतिरिक्तं प्रमाणम्।

अर्थापत्तिः

उपपाद्यस्यार्थस्य अन्यथानुपपत्त्या उपपादकस्य कल्पनम् अर्थापत्तिः। अर्थापत्तिः - अर्थस्य उपपाद्यस्य आपत्तिः इति व्युत्पत्त्यङ्गीकारे अर्थापत्तिशब्दः प्रमारूपफलपरः। अर्थस्य उपपाद्यस्य आपत्तिः येन इति करणव्युत्पत्त्यङ्गीकारे अर्थापत्तिशब्दः प्रमाणपरः। तथा चोक्तं -

अन्यथानुपपत्त्या यदुपपादककल्पनम्।
तदर्थापत्तिरित्येवं लक्षणं भाष्यभाषितम्।।[२२] इति।

तथा च भाष्ये - 'अर्थापत्तिरपि दृष्टश्रुतो वार्थोन्यथा नोपपद्यतेत्यर्थकल्पना। यथा जीवतो देवदत्तस्य गृहाभावदर्शनेन वहिर्भावस्यादृष्टस्य कल्पना'[२३] इति। अत्र दृष्टः इत्यनेन अर्थस्य प्रत्यक्षादिप्रमाण-

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चकप्रमितत्वमवगम्यते। श्रुतः इति पृथगुक्तत्वात् दृष्टशब्दः गोबलीवर्दन्यायेन श्रुतातिरिक्तप्रमितमात्र-परः। श्रुतिशब्दस्य तु शब्दप्रमाणमात्रप्रमितत्वमर्थः। तथा च प्रमाणषट्कप्रमितस्य अर्थान्तरकल्पनं विना अनुपपत्तिमुपलभ्य तदुपपत्तये अर्थान्तरकल्पनमेव अर्थापत्तिः इति फलितम्। सा चार्थापत्तिः द्विविधा। श्रुतार्थापत्तिः दृष्टार्थापत्तिः इति। तत्राद्यः यथा ज्योतिषादिप्रमाणान्तरेण देवदत्तस्य जीवने निश्चिते गृहे अनवस्थितस्य जीवतः देवदत्तस्य बहिर्भावकल्पनां विना जीवनमनुपपन्नं भवतीति जीवनं बहिर्भावं कल्पयति इति अर्थापत्तिः। जीविनः गृहाऽसत्वेन बहिस्सत्वं कल्पयामि इत्येव अनु-व्यवसायः जायते न तु अनुमिनोमीति। देवदत्तो बहिरस्ति, जीवित्वे सति गृहे असत्वात् यदेवं तदेवं यथाहम् इति अनुमाने अन्तर्भावं कर्तुमभिलषन्ति तार्किकाः। परमत्र हेतुः स्वरूपासिद्धः इत्यतः, नास्याः अनुमानेन्तर्भावः। श्रुतार्थापत्तिः यथा 'पीनो देवदत्तः दिवा न भुङ्क्ते' इति वाक्यं श्रुत्वा दिवा-भुञ्जाने देवदत्ते प्रमितः यः पीनत्वरूपार्थः, भोजनं विना पीनत्वान्यथानुपपत्तिमालोच्य पीनत्वोपपत्तये रात्रौ भुङ्क्ते इति रात्रिभोजनरूपार्थकल्पना।

अनुपलब्धिः

अनुपलब्धिर्नाम प्रत्यक्षादिप्रमाणपञ्चकप्रवृत्तिप्रतियोगिकः उपलब्ध्यभावः। उक्तं च वार्तिके-

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता।।[२४]

मानमेनोदये -

अथोपलम्भयोग्यत्वे सत्यप्यनुपलम्भनम्।
अभावाख्यं प्रमाणं स्यात् अभावस्यावबोधकम्।।[२५] इति।

उपलम्भयोग्यता नाम घटादिविषयं तत्सन्निकर्षं विना चक्षुरुन्मीलनालोकसंयोगमनः प्रणि-धानरूपसामग्रीसत्वस्य ज्ञानम्। एतत्सत्वेपि घटस्यानुपलम्भः करणम्, तेन घटाभावो गृह्यते। न हि अभावः इन्द्रियेण गृह्यते। सायङ्काले प्रातःकालीनत्वाभावज्ञानस्य इन्द्रियजन्यत्वाभावात्। लिङ्ग-लिङ्गिनोः सम्बन्धग्रहादेः अभावात् नाप्यनुमेयः। सादृश्यज्ञानाभावात् नाप्युपमानादेः प्रवृत्तिः। अतः अनुपलब्धिजन्यत्वमेव अङ्गीकर्तव्यम्। तथा च सिद्धम् अभावस्य षष्ठप्रमाणत्वम्। सम्भवैतिह्यप्रमाणयोः क्रमेणानुमाने शब्दे च अन्तर्भावात् षडेव प्रमाणानि इति सिद्धम्।

एवं विद्यमानेषु षड्विधप्रमाणेषु प्रत्यक्षस्य वर्तमानोपलम्भकत्वात् अनुमानादीनां प्रत्यक्ष-पूर्वकत्वाच्च धर्माधर्मयोः वेदरूपालौकिकशब्दरूपप्रमाणेनैव अवगतिः इति शम्।

In Public domain. Digitization Muthulakshmi Research Academy

निबन्धान्तटिप्पण्यः

१. जै.सू.१.१.१	२. जै.न्या.मा.१.१.२	३. जै.सू.१.१.२
४. जै.सू.१.१.३	५. मा.मे.१	६. मा.मे.१५
७. मा.मे.१५	८. मा.मे.१४	९. श्लो.वा.पृ.१६४
१०. श्लो.वा.पृ.१७२	११. शा.भा.	१२. श्लो.वा.
१३. मा.मे.३.१	१४. मा.मे.३.४७	१५. मा.मे.३.५०
१६. मा.मे.३.५०	१७. मा.मे.४.१	१८. मा.मे.४.५
१९. मा.मे.५.१	२०. श्लो.वा.	२१. शा.भा.
२२. मा.मे.६.१	२३. शा.भा.	२४. श्लो.वा.
२५. मा.मे.७.१		

परिशीलितग्रन्थाः

१. शावरभाष्यम्
२. श्लोकवार्तिकम्
३. मानमेयोदयः
४. शास्त्रदीपिका
५. प्रकरणपञ्चिका
६. न्यायसिद्धान्तमुक्तावली

In Public domain. Digitization Muthulakshmi Research Academy

मात्रास्पर्शतः मतिमितिः

विद्वान् रघुवीर बिल्लिगद्दे

'तस्मात् युध्यस्व भारत' इति अर्जुनं प्रति भगवतः अनुशासनम्। वैज्ञानिकेऽस्मिन् युगे वेद-वेदान्तपक्षतः जनाः आत्मनः उद्धारार्थमुपायमन्विष्यन्तो दरीदृश्यन्ते। आधुनिकं जीवनमेव युद्धरूपम्। प्राचीनज्ञानमूलप्रमाणतः मतेः मितिमतीत्य गन्तुं कः मार्गः? इति युवानः पृच्छन्ति। प्रमाणमीमांसातः आत्मोद्धारार्थं किं पाथेयं लभ्यते इति अत्र विचिन्त्यते।

भासि रताः एव तितिक्षां स्वजीवनयात्रायामानेतुं क्षमाः। भगवान् गीताचार्योऽपि 'भासि रतमर्जुनं तितिक्षस्व' इति उपदिदेश। भारतदेशे 'यस्य भासा सर्वमिदं विभाति' इति ये सर्वात्मब्रह्मोपासकाः ते एव मात्रास्पर्शाकाण्डताण्डवतः आत्मानमुद्धर्तुं क्षमन्ते। भासि रताः नाम - 'तमसो मा ज्योतिर्गमय'(ब्र.उ.) इत्युक्तप्रकारेण विद्याविनयसम्पन्नाः योगानुष्ठानपराः ईश्वरार्पणबुद्ध्या कर्मानुष्ठानपराः च।

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः।। (भ.गी.५.१९)

इति साम्ये स्थितस्य मनसः शुद्धप्रमासाधकप्रमाणत्वमाह - इह एव जीवद्भिः एव तैः समदर्शिभिः पण्डितैः जितो वशीकृतः सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं मनः अन्तःकरणम्। निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैः तद्दोषैः दोषवदिव विभाव्यते तथापि अस्पृष्टमिति। निर्दोषं दोषवर्जितं हि यस्मात्। नाऽपि स्वगुणभेदभिन्नं निर्गुणत्वात् चैतन्यस्य, वक्ष्यति च भगवान् इच्छादीनां क्षेत्रधर्मत्वम् 'अनादित्वान्निर्गुणत्वात्' इति च। न अपि अन्त्या विशेषा आत्मनो भेदकाः सन्ति प्रतिशरीरं तेषां सत्वे प्रमाणानुपपत्तेः। अतः समं ब्रह्म एकं च तस्मात् ब्रह्मणि, एव ते स्थिताः तस्मान्न दोषगन्धमात्रमपि तान् स्पृशति, देहादिसङ्घातात्मदर्शनाभिमानाभावात् इति शाङ्करभाष्यम्। ब्रह्म तु सर्वगुणदोषसम्बन्धवर्जितम् इति। अतो ब्रह्मणि ते स्थिता इति युक्तम्।

अप्रमेयप्रमामार्गः

देहादिसङ्घाते आत्मदर्शनाभिमानः मतिं विमतीकरोति। समदृष्ट्या यावत्पर्यन्तं विषमदृष्टिः अपाकृता न भवति स्वमानसेव यथार्थज्ञानं निरुणद्धि। भक्तिमार्गे स्थितः साधकोऽपि अभिन्नेन चक्षुषा पश्यन् दानं मानं च अन्येभ्यो दद्यादिति वदन्ति। भागवतस्य तृतीयस्कन्धे विष्णोः अवतारभूतः कपिलः स्वमातरं देवहूतिं प्राह -

---

आचार्यः, वेदविज्ञानगुरुकुलम्, बेङ्गलूरु

In Public domain. Digitization Muthulakshmi Research Academy

अथ मां सर्वेषु भूतेषु भूतात्मानं कृतालयम्।
अर्हयेद्दानमानाभ्यां मैत्र्यभिन्नेन चक्षुषा।। (३.२६.२७)

विषयेन्द्रियसम्बद्धद्वैधीभावमतीत्य यः चिन्तयति सः मैत्र्या समरसदृष्ट्या च प्रपश्चं द्रष्टुमर्हति। भागवते गजेन्द्रमोक्षप्रसङ्गे विद्यमानः श्लोकः अत्र मार्गं निर्दिशति।

'यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयमि'ति श्लोकोक्तप्रकारेण यदा द्रष्टृदृश्यभेदभावं हित्वा मात्रा-स्पर्शमतिमितिमवधूय चैतन्यात्मप्रकाशं सर्वत्र पश्यति तदा अखण्डार्थधीः उदेति।

नित्यं साधनरताः प्रमाण-प्रमेय-प्रमातृ-प्रमिति-मितिमतीत्य अप्रमेयं नित्यबुद्धमुक्तस्वभावं सच्चिदानन्दं ब्रह्मैव भवन्तीति वेदान्तडिण्डिमः। अत्र मनः साम्ये स्थितमुत वैषम्ये स्थितमिति परीक्षणीयं भवति। विषये स्थितं मनः प्रमाणादिषु भेदं मनुते। सुखानन्तरं दुःखं, दुःखानन्तरं सुखमिति द्वन्द्वात्मके गर्ते मानवं पातयति।

प्रमाणात् अप्रमेयसिद्धिः, भवेदिति वेदान्तिनां प्रधानः प्रयत्नः। 'प्रमेयसिद्धिः प्रमाणाद्धि' 'मानाधीना मेयसिद्धिः' इत्यादि नैयायिकप्रपश्चे प्रसिद्धानि वचनानि। 'प्रमाणतः अर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यात् अर्थवत् प्रमाणम्' इति न्यायभाष्यवचनम्। आन्वीक्षिकी नाम - सर्वविद्यानां प्रदीपत्वेन शश्वत् परिगण्यते तार्किकैः।

तत्र कारणं 'प्रमाणानां निष्कम्पप्रवृत्तिजनकत्वम्।' प्रेयसः लोके वर्तमानाः जनाः प्रायेण प्रवृत्ति-पराः भवन्ति प्रमाणतः प्राप्यं परीक्ष्य। अस्यां प्रक्रियायामान्वीक्षिकी अर्थात् तर्कविद्या प्रामाण्यं भजते। संवादिप्रवृत्तिजनकत्वे प्रमाणानां प्रामाण्यं सिद्धं भवति। विसंवादिप्रवृत्तिजनकत्वे प्रमाणानां प्रामाण्यं क्षुण्णं भवति। अतः प्रामाण्यवादिनः नैयायिकाः अर्थक्रियाकारित्वरुपमानदण्डेन मानानां मानं रक्षन्ति। महता आयासेन इत्थं प्रमेयसिद्ध्यनुकूल प्रमाणपरीक्षणे कृतेऽपि नैयायिकानां प्रामाण्यवादः -

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्।। (भ.गी.८.९)

इत्युक्तप्रकारेण गुणगणान्वितं परमात्मानं दर्शयितुमक्षम्। मननस्थानीयानात्मनः मन्यमाना अपि श्रुतिपक्षं न ते प्राविशन्। स्मृतितर्कनितान्तनिष्ठया अप्रमेयात् आत्मनः दूरे एव तस्थः इति खण्डनखण्ड-खाद्यकारः श्रीहर्षः। प्रामाण्यवादपरायणाः तार्किकाः कवीनां कवेः परमात्मनः तत्त्वमजानन्तः कवित्वा-पहारकाः बभूवुः इति वेदान्तपक्षतः औपनिषदैः अगत्या वक्तव्यं भवति। अत एव वेदान्तपरिभाषाकृत् श्रीधर्मराजाध्वरीन्द्रः 'यत् साक्षात् अपरोक्षात् ब्रह्म' इति बार्हदारण्यकं वाक्यम् उदाहरन्- 'प्रत्यक्षप्रमा तु अत्र चैतन्यमेव' इति स्वरूपात्मकं ज्ञानमेव परमार्थं मन्वानः मात्रास्पर्शभेदसापेक्षं वृत्तिज्ञानं ब्रह्मज्ञान-बाध्यं व्यावहारिककुक्षौ निवेश्य प्रामाण्यमीमांसामेव अध्यात्मनिष्ठाम् अकरोत्।

In Public domain. Digitization Muthulakshmi Research Academy

मतिमितिमतीता प्रमितिरत्र, मार्गोपायः

मीयन्ते आभिः शब्दादयः विषयाः इति मात्राः, इन्द्रियाणि इत्यर्थः। मात्राणां स्पर्शाः शब्दादिभिः संयोगः। सुखदुःखस्य मूलमिदमेव। दृग्दृश्यलोकस्य नैकट्यप्रयुक्तप्राकट्यमेव वैकट्यमूलमिति वेदान्त-पक्षः। एतदेव अचिन्त्यरचनारूपस्य प्रतिनियत-देश-काल-निमित्ताक्रियाफलाश्रयस्य अस्य जगतः ह्रासविकासविलासनिदानम्। 'यो यत्पश्यति तस्य तत्' इत्येव अत्र फलीभूतप्रमाहेतुः। द्रष्टुः दृष्टिरेव दृश्यदर्शनहेतुरिति फलितोऽर्थः। 'यद्भावं तद्भवति' इति न्यायोऽपि अत्र आञ्जस्यमश्नुते। 'यथा दृष्टिः तथा सृष्टिः' इत्यपि अनर्थान्तरम्।

अनित्यस्य आगमापायिनः दृश्यलोकस्य दर्शनार्थं भगवता विशेषेण अनुगृहीतोऽयं मानवः स्वकीयजीवनयात्रायामनवरतमसीमप्रमापूरितस्वान्तो भवतीति सार्वजनीनम्। एतदेव Cognitive expansion इति नाम्ना भणन्ति मनोविज्ञान्यपरनामानः आधुनिकचिन्तकाः।

विविधसंयोगसापेक्षं भवति ज्ञानमिति शास्त्रविदः जानन्त्येव। संयोगसचिवत्त्वे ज्ञाने उच्चावचस्थ-पुटितस्थितिः स्वाभाविकी। अनया प्रणाल्या उत्पद्यमानं सर्वं ज्ञानं वासनावासितं चित्रवर्णरञ्जितपुट इव विचित्रं सत् वृत्तिज्ञानमिति निगद्यते। 'प्रत्यक्षप्रमा तु अत्र चैतन्यमेव' इति वदन् धर्मराजाध्वरीन्द्रः सदानन्दरुपायाः चिदः एव स्वरूपज्ञानत्वेन ब्रह्मरूपत्वं प्रतिपादयामास। यज्जानन् यद्भवति, यच्च भवन् यज्जानाति तदेव स्वरूपात्मकं ज्ञानमन्तिमां वृत्तिमपि नाशयत् यथार्थप्रमाभिधानं भजते। इन्द्रियार्थसम्बन्धः चैतन्यस्य निरवच्छिन्नरूपतां निरुणद्धि। इन्द्रियार्थसम्बन्धं द्वारीकृत्य उत्पद्यमानं समस्तं ज्ञानं मतिपरिमितौ उत्पद्यते इति समस्तावरणक्षमं न कदापि भवितुमीष्टे।

समस्तमिदं ब्रह्मज्ञानबाध्यम्। व्यवहारे अबाध्या या प्रमा सा प्रमेय-प्रमाण-प्रमातृ गतावरण-राहुग्रस्तदिवाकरेन्दुसदृशी सदा चकास्ते। अन्तःकरणवृत्यवच्छिन्नचैतन्यप्रमाणं द्वारीकृत्य कथं वा प्रमेय-गतावरणनिवारणे समर्थं स्यात्? चैतन्याभेदप्रक्रियां दूरतो अपसार्य मात्रास्पर्शस्थले प्रत्यक्षादिप्रमाण-प्रक्रियां निरूपयन्तो नैयायिकाः प्रामाण्यवादादीन् ग्रन्थान् प्रणीयापि कुण्ठीभवन्ति विकुण्ठसच्चिदानन्दा-स्पर्शयोगाभावात्।

अस्पर्शयोगो वै नाम सर्वसत्वसुखो हितः।
अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम्।। (गौ.का.अलात.प्र.२.२)

इति अद्वैतिनां सूत्रमेव याथातथ्यतः प्रामाण्यवादसूत्रम्। 'अस्मिन् योगे स्पर्शः = सम्बन्धः तद्रहितः योगः ब्रह्मणि एकीभावः इत्युक्ते ब्रह्मभावं प्राप्तस्य सर्वसंबन्धाभावसिद्धिः' स्पर्शनं स्पर्शः सम्बन्धो न विद्यते यस्य योगस्य केनचित्कदाचिदपि सोऽस्पर्शयोगो ब्रह्मस्वभाव एव, वै नामेति ब्रह्मविदामस्पर्श-

In Public domain. Digitization Muthulakshmi Research Academy

योग इत्येवं प्रसिद्ध इत्यर्थः। स च सर्वसत्वसुखो भवति। कश्चिदत्यन्तसुखसाधनविशिष्टोऽपि दुःखरूपः, यथा तपः। अयं तु न तथा। किं तर्हि सर्वसत्वानां सुखः। यथेह भवति कश्चिद्विषयोपभोगः सुखो न हितः। अयं तु सुखो हितश्च। नित्यमप्रचलितस्वभावत्वात्। किं चाविवादो विरुद्धवदनं विवादः पक्षप्रतिपक्षपरिग्रहेण यस्मिन्न विद्यते सोऽविवादः। कस्मात्? यतोऽविरुद्धश्च य ईदृशो योगो देशित उपदिष्टः शास्त्रेण तं नमाम्यहं प्रणमामीत्यर्थः।'

प्रकृते मात्रास्पर्शतः सुखदुःखयोगः यः भोगद्वारा रोगे पर्यवस्यति सः त्यक्तव्यः। अस्पर्शयोगो नाम सर्वसत्वसुखः यत्र लेशतोऽपि दुःखस्पर्शो नास्ति। एतां स्थितिमेव अन्ततो गत्वा सर्वे जीविनः कामयन्ते इति विदितमेव। मतिशुद्ध्यर्थमयमेव योगः आश्रयणीयः। अत्र अस्पर्शयोगो नाम ब्रह्मस्वभाव एव। विषयैः सह इन्द्रियस्य संलग्नताज्ञानमज्ञानी करोति, चित् अचित्करोति। आनन्दमनानन्दं करोति। अत एव एषः हितः इत्युच्यते। अस्पर्शयोगः हितः इति भण्यते। भगवद्गीतायाम् -

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्।।(भ.गी.९.२)

इत्यादिनाऽपि मनोग्रन्थिभिः अलिप्तं यत्किश्चित् सत्यमेव प्रतिपाद्यते। अतः एव अस्पर्शयोगे विरोधोऽपि नास्ति। एतादृशयोगः शास्त्रतः एव ज्ञातुं योग्यः। इयं मानवयात्रा मात्रास्पर्शतः आरभ्यते, क्रमेण उत्क्रान्तिपथे अस्पर्शयोगस्थितिं गच्छति। विहितकर्मानुष्ठानतः चित्तशुद्धिं प्राप्य ब्रह्माण्डं पिण्डाण्डं पश्यन्तः साधकाः अप्रमेयं शुद्धं रूपं ज्ञातुमर्हन्ति मनोलयद्वारा। अत्र मनोलय एव अस्पर्शयोगेन अभिधीयते। त्रैगुण्यविषयवेदमवलम्ब्य निस्त्रैगुण्यस्थितिं गच्छति तथा गुणगणविगुणपरिगणनां विगणय्य अगुणो भवति। तद्वदेव शुद्ध्या बुद्ध्या विचिन्तयन् आत्मनिष्ठया मनसा च भावयन् अमनीभावं गतो मानवः परमपुरुषार्थं विन्दते इति अलमतिविस्तरेण।

प्रमाणेषु साक्षिप्रत्यक्षस्य वैशिष्ट्यम्

आगमप्रामाण्यं समर्थयद्भिः वेदापौरुषेयत्वं समर्थनीयमेव। वेदानामपौरुषेयत्वाभावे आगमस्यापि प्रामाण्यं न सिद्ध्यति। यतो हि आगमेषु परस्परविरोधः दृश्यते। परस्परविरुद्धागमाः वर्तन्ते चेत् आगमेन कस्याप्यर्थस्य सिद्धिर्भवति। वेदस्य अपौरुषेयत्वे तु वेदमूलकत्वं यस्यागमस्यास्ति तेनागमेनैव अर्थसिद्धिर्भवति, प्रमेयसिद्धिर्भवति। तथैव प्रत्यक्षप्रामाण्यवादिभिरपि साक्षिप्रत्यक्षस्य नियतयथार्थत्वं नियतप्रामाण्यं समर्थनीयमे। साक्षिप्रत्यक्षस्य नियतार्थत्वे सति तादृशसाक्षिसिद्धस्य बाह्यप्रत्यक्षस्य प्रामाण्यं सिद्ध्यति। अन्यथा इदं प्रत्यक्षं प्रमाणं वा तत्प्रत्यक्षं प्रमाणं वेत्याशङ्कायां परिहारः कः? यथा वा आगमयोः विरोधे सति कस्यचिदागमस्य प्रामाण्यं वेदमूलकतया सिद्ध्यति, तथैव नियतयथार्तभूतेन

In Public domain. Digitization Muthulakshmi Research Academy

साक्षिणा यस्य प्रत्यक्षस्य प्रामाण्यं निश्चितं तदेव प्रत्यक्षं प्रमाणमिति निश्चेतुं शक्यते। साक्षिणः नियतयथार्तत्वाभावे साक्षिसिद्धस्य प्रत्यक्षस्यापि प्रामाण्यं न सिद्ध्यति। यथा वा कश्चन पुरुषः सर्वान् प्रति एवं कर्तव्यमेव वर्तितव्यमित्युपदिशति। परन्तु स्वयं सम्यक् नास्ति चेत्, स्वयं सदाचारी न्यायनिष्ठः न भवति चेत् तस्येतरान् प्रत्युदेशाधिकारः नास्ति। तथैव साक्षी तावत् सर्वेषां प्रत्यक्षाणां प्रामाण्यनिश्चायकः। स एव साक्षी नियतयथार्थो न भवति चेत् साक्षिणः प्रत्यक्षप्रामाण्यनिश्चायने सामर्थ्यमेव नास्ति। तस्मात् वेदापौरुषेयत्वं यथा वाऽवश्यं समर्थनीयमागमप्रामाण्यवादिभिः, तथैव साक्षिप्रत्यक्षस्य नियतयाथार्थ्यं समर्थनीयमेव।

प्रत्यक्षप्रमाणं सर्वैर्दार्शनिकैः लौकिकैः परीक्षकैः आधुनिकविज्ञानिभिश्चाङ्गीक्रियते। तस्य लक्षणे, विभागे, ज्ञानजनकत्वप्रकारे, तज्जन्यमानस्वरूपादिविषये चास्ति महान् मतभेदः। अस्य च मतभेदस्य अस्ति कारणद्वयम् । तत्तन्मतेषु प्रमेयस्वरूपभेदः सर्वविदित एव। तत्तत्प्रमेयसमर्थनाय तदानुगुण्येन प्रमाणस्वरूपनिरूपणं तत्तद्दार्शनिकैः क्रियते। तथा हि - बौद्धैः पदार्थस्य स्वलक्षणमात्रमङ्गीकुर्वद्भिः नामजात्यादिकल्पविरहितस्यैव प्रत्यक्षत्वं, कल्पनाविशिष्टग्रहणस्य भ्रान्तित्वमुच्यते। अद्वैतिभिः सर्वस्य चैतन्याधिष्ठिानत्वमङ्गीकुर्वद्भिः वृत्त्यवच्छिन्नचैतन्यविषयावछिन्नचैतन्ययोः ऐक्यं प्रत्यक्षमित्युच्यते। पुरुषस्य पुष्करपलाशवत् निर्लेपत्वमङ्गीकुर्वद्भिः साङ्ख्यैः 'चितिच्छायापन्ना बुद्धिवृत्तिः प्रत्यक्षम्' इत्युच्यते। एवं स्वस्वप्रमेयानुगुण्येन प्रत्यक्षस्वरूपनिरूपणं दार्शनिकेषु प्रत्यक्षविषये मतभेदे प्रथमं कारणम्।

द्वितीयङ्कारणन्तु, इन्द्रियार्थसम्बन्धनिरूपणादिप्रक्रियाभेदप्रयुक्तमतभेदः। नामजात्यादिधर्माणां प्रत्यक्षेऽवगाहनक्रमनिरूपणभेदप्रयुक्तमतभेदः। तथा हि - समवायसम्बन्धमङ्गीकुर्वद्भिः न्यायवैशेषिकैः संयोगसमवायघटिताः षट्सम्बन्धाः अङ्गीक्रियन्ते। समवायसम्बन्धमङ्गीकुर्वद्भिः भाट्टैः स्वप्रकाशत्वं वा अनुव्यवसायगम्यत्वं वा ज्ञाततानुमेयत्वं वा साक्षिवेद्यत्वं वा इत्यत्र मतभेदः प्रक्रियाभेदरूपः। प्रक्रियाभेदेष्वपि प्रमेयभेदस्पर्शोऽपि तत्र तत्र वर्तत एव। निर्विकल्पकं ज्ञानं प्रत्यक्षमुतानुमेयम्। किमिदं प्रमा वा भ्रमप्रमाभिन्नं वा ततस्थं वा इत्यादयोऽपि प्रक्रियाविशर्तात्मकाः। एवं प्रमेयभेदानुगुण्यसम्पादनाय प्रक्रियासौष्ठवसम्पादनाय च दार्शनिकेषु प्रत्यक्षप्रमाणविषये मतभेदाः प्रवर्तन्ते।

द्वैतवेदान्ते निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम्। विषयं प्रति स्थितेनाक्षेण ज्ञानोपत्त्या अक्षाणामपि कारणत्वेन प्रत्यक्षत्वं सम्मतम्। तथा च टीकाकृत्पादः जयतीर्थभिक्षुः प्रमाणलक्षणटीकायाम् - 'अर्थं प्रति स्थितमक्षरं प्रत्यक्षम्' इति। चक्षुरादिपञ्चेन्द्रियाणि मनश्च ज्ञानेन्द्रियाणीति प्रायः सर्वदार्शनिकसम्मतानि। द्वैतवेदान्ते तु सप्तमं ज्ञानेन्द्रियं संलक्षितम्। तदेव साक्षी। तथा च श्रीमध्वाचार्यवचनं प्रमाणलक्षणे-

In Public domain. Digitization Muthulakshmi Research Academy

'प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेन' इति। अयश्च साक्षी प्रमाता आत्मैव। आत्मस्वरूपम्, अन्तः-करणधर्माश्च सुखादयः बाह्याश्चाकाशकालादयोऽस्य साक्षिणो विषयाः।

मुख्यविषयप्रतिपादनम्

इन्द्रियं द्विविधम्। प्रमातृस्वरूपं तद्भिन्नश्चेति। तत्र स्वरूपेन्द्रियं साक्षीत्युच्यते। आत्मा एव आन्तरपदार्थद्रष्टृत्वात् साक्षीत्युच्यते। स च ज्ञानरूपः स्वप्रकाशश्च। तस्य आत्मस्वरूपं मनः आत्मधर्म-भूताश्च आन्तरा ज्ञानेच्छाप्रयत्नसुखदुःखभयाभयकृपाऽविद्यादयः तदभावाश्च विषयाः। एवं बाह्याः आकाश-कालद्व्यणुकपरमाणुप्रकृत्यादयोऽपि साक्षीन्द्रियग्राह्याः।

यद्यपि न्यायमते इव 'मन एव सुखादिकं गृह्णाति' इति वक्तुं यदि स्वरूपेन्द्रियभिन्नैरिन्द्रियैः जायमानं ज्ञानं प्रमात्मकमेव भवेत किन्तु तत् भ्रमात्मकमपि दरीदृश्यते। एवञ्च ज्ञानेन्द्रियाणां भ्रमजनकत्वात् ज्ञानमात्रे प्रामाण्यसन्देहः सुस्थ एव। न हि सुखदुःखादिविषये कदाचिदपि विभ्रममनुभवामः। तेन च ज्ञायते इदं च ज्ञानं न विभ्रमजनकेन्द्रियजन्यमिति। विभ्रमाऽजनकश्च इन्द्रियं साक्षिरूपमेव नान्यत् इत्युक्तम् अनुव्याख्याने -

स च साक्षी क्वचिद्दुष्टः कथं निर्णय ईयते।
विशेषास्सर्व एवैते साक्षिप्रत्यक्षगोचराः।।
तस्मात् सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये।
साक्षी निर्दोष एवैकः सदाऽङ्गीकार्य एव नः।।

किञ्च अनुभूतपदार्थविषयकं कदाचिदपि अभ्रमरूपं सुखदुःखादिविषयकं ज्ञानं सर्वेषामस्तीति सुविदितम्। इदञ्च निर्णयात्मकं ज्ञानं साक्षीन्द्रियग्राह्यमित्युच्यते। भिन्नेन्द्रियजन्यमानप्रामाण्ये अनाश्वास-परिहाराय पुनः प्रमाणान्तरान्वेषणेन अनवस्थादिदोषसद्भावेऽपि साक्षिणः स्वप्रकाशत्वेन स्वस्य तत्प्रमाणस्य च तेनैव ग्रहणाङ्गीकारेण न अनवस्थादिदोषप्रसक्तिः। तदेव प्रतिपादयति आचार्यः जयतीर्थमुनिः विषमपद-वाक्यार्थविवृतौ -

नियमेन सुखाद्येषु प्रामाण्यं साक्षिगोचरम्।
स्वप्रामाण्यं सदा साक्षी पश्यत्येव सुनिश्चयात्।।
ज्ञानग्राहकेणैव साक्षिणा मानता मितेः।
दोषाभावे प्रमाणत्वं दोषाभास्य साक्षिणा।।
निश्चितत्वं क्वचिच्चैव स्वः प्रमाण्यमिष्यते।

In Public domain. Digitization Muthulakshmi Research Academy

अतो न सर्वमानानां प्रामाण्यं निश्चितं भवेत्।
साक्षिणां निश्चितं यत्र तत्प्रामाण्यं स्वलक्षणम्।।

तथा च साक्षिणः स्वप्रकाशत्वेन स्वस्य स्वगृहीतज्ञानस्य च प्रामाण्यग्रहणे संवादानपेक्षात् न अनवस्थादिदोषाः। अविज्ञाते अननुभूते च पदार्थे साक्षी प्रामाण्यं न गृह्णाति दोषाभावे एव प्रमाणमिति व्यवस्थया प्रवर्तते। प्रामाण्यग्रहणे साक्षिणः स्वारसिकशक्तिसद्भावेन दोषाभावस्य प्रयोजकत्वमात्रमभ्युपगम्यते। साक्षी ज्ञानमात्रं गृहीत्वा पश्चात् क्वचित् जिज्ञासायां सत्यां परीक्षया ज्ञानप्रामाण्यं गृह्णातीत्यनङ्गीकारे सर्वेषामपि ज्ञानानां प्रथममेव प्रामाण्यं विज्ञायेत। न च एतदानुभाविकम्। तेन उक्तैव व्यवस्था युक्ता। साक्षिणः प्रामाण्यग्रहणस्वभाववत्त्वेन क्वचिदपि कस्यचिदपि सुखदुःखानुभवादौ न संशयो जातः। बाह्येऽननुभूतेऽर्थे तु व्यवस्थया प्रामाण्यग्रहणम् इत्युक्तम्।

ननु साक्षिवेद्यत्वेऽपि अनवस्था दुर्वारैव। ज्ञानग्राहकः साक्षी ज्ञाने प्रामाण्यं गृह्णाति। तत्प्रामाण्यमपि प्रमाणान्तरेण प्रसाधनीयम्। एवं तत्राऽपि, इति अप्रामाणिकपरम्पराकल्पनातः अनवस्था कथं परिह्रियते इति चेदत्रोच्यते - साक्षी हि स्वयंप्रकाशः स्वात्मानं स्वप्रामाण्यञ्च गोचरयतीत्युक्तम्। अतोऽत्र प्रामाण्यपरतस्त्ववाद इव नाऽप्रामाणिकपरम्पराकल्पनमिति भोवेनोक्तम् अनुव्याख्याने - 'न परीक्षानव्था स्यात् साक्षिसिद्धे त्वसंशयात्' इति ।

साक्षिणः काल-तत्सम्बन्धिपदार्थग्राहित्वम्

सर्वेषां वर्तत एव अनागतादिकालज्ञानम्। अन्यथा कथं लिङन्तलृङन्तपदानामवबोधः? मुक्तो भविष्यामीति विश्वासेन हि साधकोऽध्ययनाध्यापनादौ प्रवृत्तो भवति। उत्तरकालज्ञानाभावे कथं तद्गतमोक्षज्ञानं भवेत्? एवञ्च सुविदितमिदं यत् सर्वेषामतीतानागतकालज्ञानमस्तीति। तस्य चानुभवः न प्रमाणान्तरगोचर इति साक्षिगोचर एव भवेत्। पदानां पदार्थेषु शक्तिग्रहस्तावत् सर्वापेक्षितः। तेन विना वाक्यैः पदार्थसंसर्गविशेषलक्षणवाक्यार्थस्य बोधासम्भवात्। शक्तिग्रहश्च शक्तिविषयपदार्थबोधमपेक्षते। सम्बन्धज्ञानस्य सम्बन्धिज्ञानपूर्वकत्वनियमात्। एवञ्च पदार्थग्रहः प्रमाणान्तरादेव भवेत्। न तु पदादेव। पदात् पदार्थबोधे जाते सम्बन्धिज्ञानस्य जातत्वेन तत्र वाचकत्वशक्तिग्रहः, शक्तिग्रहे सति पदात् पदार्थबोध इत्यन्योन्याश्रयप्रसङ्गात्। यत्र च अतीतानागतार्थसंसर्गो वाक्यार्थस्तत्रातीतानागतार्थग्रहणमावश्यकम्। इदञ्च ग्रहणं साक्षिणा एव भवेत् न तु मानान्तरेण। सुखकालाकाशादिग्राहकप्रमाणत्वेन सिद्धस्य साक्षिणः एतत्सामर्थ्यकल्पनं सुकरम्। साक्षिणमनङ्गीकुर्वतां तु अतीतानागतार्थग्रहणोपाय एव नास्तीति पदार्थशक्तिग्रहः दुरुपपादः स्यात्।

In Public domain. Digitization Muthulakshmi Research Academy

अनुमानस्य व्याप्तिः पक्षधर्मता इति द्वयं सामर्थ्यं ननु। ततश्च अतीतानागतवर्तमानेषु सर्वेषु धूमादिषु तथाविधैः सर्वैः वहन्यादिभिः व्याप्तिर्ग्रह्यैव। तदर्थं च अतीतादिसकलधूमवह्न्यादीनां ज्ञानं पूर्वं भवेदेव। प्रसिद्धं चक्षुरादिप्रमाणं तु तज्ज्ञानोत्पादनेऽसमर्थमिति सर्वसम्मतम्। तथा च साक्षिण एव अतीतादिसकलधूमवह्न्यादि ज्ञानजनकत्वमङ्गीकर्तव्यम्। अन्यथा अनुमानप्रमाणस्यैव भङ्गः स्यात्।

किञ्चास्ति तावत् सर्वेषां सर्व इति शब्दस्य शक्तिग्रहः। अन्यथा 'सर्वं खल्विदं ब्रह्म' इत्यादि व्यवहारविलोपप्रसङ्गात्। शब्दशक्तिग्रहश्चार्थग्रहापेक्ष इति सर्वेषां सामान्यतः सर्वपदार्थज्ञानमस्ति इत्यङ्गीकार्यम्। अतीतादिसर्वगोचरं च न साक्षीतरं प्रमाणमस्तीति साक्षिण एव सामान्यतः सर्वपदार्थग्रहजनकत्वमङ्गीकर्तव्यम्। यथोक्तम् -

अतः सर्वे पदार्थाश्च सामान्यात् साक्षिगोचराः।
सर्वमित्येव विज्ञानं सर्वेषां कथमन्यथा।। (अनु.व्या.३.२.१.७८)

सुदृढनिर्णयस्वरूपस्य साक्षिणोऽनङ्गीकारे ज्ञानेषु अनाश्वासपरिहारोपायाभावेन अनवस्थादिदोषप्रसक्तेः, कदाप्यनाश्वासाऽविषयकस्य सुखादिविषयकजन्यज्ञानस्य प्रामाण्यं साक्षिवेद्यमित्येव वाच्यम्। किञ्च अस्ति तावत् सर्वेषाम् 'एतावन्तं कालमहं सुखमस्वाप्समि'ति सुषुप्त्युत्तरकालीनानुस्मृतिः। न चेयं स्मृतिः अनुभवमन्तरोपपद्यते। न च सुषुप्तिदशायां सुखज्ञानकालग्राहकमान्तरं मनो जागर्ति। तदुपरमस्यैव सुषुप्तित्वात्। एवञ्च सुखकालाज्ञानादिग्राहकं किमपि इन्द्रियं स्वरूपभूतम् अङ्गीकर्तव्यमेव, यदभावे सौषुप्तिकानुस्मृतिर्नोपपद्यते। तच्चेन्द्रियं स्वरूपभूतं स्वप्रकाशं साक्षिशब्दव्यपदेश्यमिति युक्तमुत्पश्यामः। यथोक्तं- 'सुषुप्तौ हीन्द्रियाणामुपरतत्वान्न बाह्यप्रत्यक्षानुमानागमानां तत्र प्रवृत्तिः। अस्ति तदाऽपि कालप्रतिभासः। एतावन्तं कालं सुखमहस्वाप्सम्' इति सुषुप्त्युत्थितस्य परामर्शदर्शनात्। न ह्यननुभूतस्य परामर्शो युज्यते, अतिप्रसङ्गात्। अतः परिशेषात्साक्षिवेद्य एवेति गम्यते इति। एवञ्च एतादृशं बहूपकारिणं बहुविप्लवपरिहारिणं साक्षिणं लक्षितवता पूर्णप्रज्ञदर्शनेन तत्वबुभुत्सोर्लोकस्य महाननुग्रहः कृत इत्यलं पल्लवतल्लजकल्पानल्पजल्पनेन।

परामृष्टग्रन्थाः

१.प्रमाणलक्षणम् - श्रीपूर्णप्रज्ञमुनिकृतम्

२.अनुव्याख्यानम् - श्रीपूर्णप्रज्ञमुनिकृतम्

३.प्रमाणलक्षणटीका - श्रीजयतीर्थभिक्षुविरचितम्

४.विषमपदवाक्यार्थविवृत्तिः - श्रीजयतीर्थभिक्षुविरचितम्

In Public domain. Digitization Muthulakshmi Research Academy

५.भारतीयदर्शनेषु प्रत्यक्षम् - पूर्णप्रज्ञसंशोधनमन्दिरम्

६.ज्ञानस्वरूपम् - पूर्णप्रज्ञसंशोधनमन्दिरम्

७.प्रमाणपद्धतिः - श्रीजयतीर्थभिक्षुविरचितम्

८.विष्णुतत्वविनिर्णयः - श्रीपूर्णप्रज्ञमुनिकृतम्

९.प्रमाणलक्षणटीकाटिप्पणी - श्रीविजयीन्द्रतीर्थविरचितम्

एतेभ्यो गुरुभ्यः सकार्तज्ञ्यं वन्दनानि

श्रीश्रीविद्यामान्यतीर्थगुरुचरणाः, भूतपूर्वपरिव्राजकाः,पलिमारुमठः,उडुपि।

श्रीश्रीविश्वेशतीर्थश्रीचरणाः, कुलपतयः, पूर्णप्रज्ञविद्यापीठम् ।

श्रीहरिदासभट्टमहोदयः, प्रांशुपालः, पूर्णप्रज्ञसंस्कृतमहाविद्यालयः, वेङ्गळूरु।

श्री आनन्दतीर्थः नागसम्पिगे महोदयः, निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, वेङ्गळूरु।

श्री श्रीनिवासमूर्तिमहोदयः सि.एच्., प्राध्यापकः, पूर्णप्रज्ञविद्यापीठम्, वेङ्गळूरु।

In Public domain. Digitization Muthulakshmi Research Academy

तर्कप्रयुक्तप्रत्यक्षप्रपञ्चनस्य पाक्षिकत्वम्

आचार्यः मञ्जुनाथ न. हेगडे

प्रस्तावना

प्रमाणमीमांसा प्राचीनार्वाचीनोभयपक्षतः कर्तव्या भवति। 'मनो हि जन्मान्तरसङ्गतिज्ञम्' 'भावस्थिराणि जननान्तरसौहृदानि' इत्यादीनि कालिदासवचनानि आलोड्य मनसः लौकिकालौकिकोभयविधप्रमाणपरीक्षणं कर्तुं शक्यं भवति इति मनोवैज्ञानिकाः प्रमाणीकृतवन्त इति प्रथितम्। आधुनिकं प्रमाणशास्त्रं प्रमाणमीमांसायां प्राचीनचिन्तनपक्षमेव एकदेशतः पोषयति। प्राचीनप्रमाणचिन्तकाः नैयायिकाः प्रतीतिमेव प्राधान्येन शरणीकुर्वाणाः तथ्यसाक्षात्कारार्थम् अलौकिकं लौकिकं च सन्निकर्षं साधनत्वेन मन्वानाः प्रत्यक्षप्रक्रियां प्राचीनार्वाचीनमनोहारिणीम् अकार्षुः। अर्वाचीनाः मनौवैज्ञानिकाः अपि इन्द्रियशक्तिम् अत्यद्भुतां भावयन्तः त्रिकोणीय प्रत्यक्षसिद्धिमेव बहु मन्यमानाः प्रत्यक्षप्रमाणम् उच्चकुक्षिपक्षे निवेशयामासुः। अनया दृष्ट्या नैयायिकसम्मतः आर्षपक्षः आधुनिकैरपि परिपोषितः इति साभिमानं प्रशंसन्ति सामरस्यवादिनः। 'आ नो भद्राः क्रतवो यन्तु विश्वतः' इति मन्यमानाः अपि वयम् आर्षपथीयाः जनाः केचन वैज्ञानिकं मन्याः अस्मदीयं किञ्चित् प्रशंसन्ति इति उत्सिक्ताः न भवेम। उपपत्यनुपपत्तिफलकविचारपराः आर्षपथिकाः सिद्धं प्रसिद्धं वा अर्थम् एकपक्षतः न स्वीकुर्युः। 'स्वबोधपरिशुद्धिः विपश्चिन्निकषाशमसु' इति सविनयं स्वीकृत्य नीरक्षीरविवेकिन एव भवेयुः।

अद्वैतपक्षतः प्रमाणमीमांसायाः औचित्यम्

अणुरेणुतृणकाष्ठादयः जडप्रकृतित्वात् न प्रत्यक्षमीक्षन्ते किञ्चित्। चेतनविहीनानां जडानां प्रत्यक्षप्रक्रियायां भागभाक्त्वं नास्ति। 'आत्मा मनसा संयुज्यते' चेदेव तत्प्रेरितानि इन्द्रियाणि तत्तद्विषयं प्रति अनुधावन्ति। अतः समस्तप्रत्यक्षप्रक्रिया एव चिद्विलासः इति वक्तुं शक्यते। इत्थं गते सच्चिदानन्दब्रह्मवादिनः वेदान्तिनः प्रत्यक्षविषये यां प्रक्रियां दर्शयन्ति सा एव पुनः पुनः परीक्षणीया विविधशास्त्रविद्भिः गुणग्राहिभिः।

तत्पूर्वं इन्द्रियतत्सन्निकर्षपारम्यवादिनां तार्किकादीनां प्रत्यक्षप्रमाणप्रक्रियायाः निस्सारत्वं सयुक्तिप्रतिपादनीयम्। आत्मपरचिन्तनं विज्ञानिलोकेऽपि मान्यतां बिभर्ति इत्येतत् अत्र प्राधान्येन प्रस्तोतव्यम्। केनोपनिषदि उदाहरणद्वारा भौतविज्ञानिनः अपि इन्द्रियमनोबुद्ध्यतीतम् आत्मतत्वं

आचार्यः, वेदविज्ञानगुरुकुलम्, बेङ्गलूरु.

In Public domain. Digitization Muthulakshmi Research Academy

समस्तव्यापारेषु महत्वमावहति इति साधयन्तः सन्ति। इत्थं गते तर्कप्रयुक्तप्रत्यक्षप्रपञ्चनस्य पाक्षिकत्वं सयुक्तिप्रतिपादयितुम् अयमेकोऽवसरः।

अक्षमक्षं प्रतीत्य उत्पद्यते इति प्रत्यक्षम्। अक्षाणि इन्द्रियाणि घ्राण-रसन-चक्षुः-त्वक्-श्रोत्र-मनांसि षडिति काणादः प्रशस्तपादः। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति सामान्यतः प्रत्यक्ष-लक्षणम्। इन्द्रियत्वावच्छिन्नकारणतानिरूपितकार्यताशालिज्ञानत्वमिति फलितोऽर्थः। आत्मा मनसा संयुज्यते मनः इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षज्ञानम् उत्पद्यते इति वात्स्यायनः। ज्ञानाकरणकं ज्ञानमिति न्यायबोधिनीकारः। जीवेश्वरोभयप्रत्यक्षसाधारणं लक्षणमिदम्। ईश्वरप्रत्यक्षस्य नित्यत्वेन किञ्चिदपि कारणं न तत्रास्ति। जीवप्रत्यक्षस्य इन्द्रियमेव करणम्। न किञ्चिदपि ज्ञानादन्यत् तत्र करणमिति उभयोः प्रत्यक्षयोः ज्ञानाकरणत्वमक्षुण्णमिति नैयायिकाः आशेरते।

साक्षात्कारत्वव्यञ्जकविषयताविशेषत्वज्ञानं प्रत्यक्षमिति व्याख्यानान्तरम्। साक्षात्कारत्वं नाम साक्षात्करोमीति अनुव्यवसायगम्यः जातिविशेष इति प्राभाकराः आमनन्ति। सम्बन्धसापेक्षज्ञानस्य आंशिकत्वं सम्बन्धप्रयुक्तत्त्वादेवेति तद्वति तत्प्रकारकं ज्ञानम् इन्द्रियसन्निकर्षद्वारा उत्पत्तुमेव नार्हति। एतच्च लक्षणम् ईश्वरीयप्रत्यक्षमपि कक्ष्यातः दूरीकरोतीति नेदं क्षोदक्षमं लक्षणम्। अन्तःकरणवृत्यवच्छिन्न-चैतन्येन विषयस्फुरणं प्रत्यक्षमिति अद्वैतिनो ब्रह्मवादिनः श्रुतियुक्त्यनुभूतिभिः प्रमाणयन्ति।

एतन्मतानुसारं प्रत्यक्षलक्षणं तु स्वाकारवृत्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्त्वशून्यत्वे सति वर्तमानत्त्वे सति योग्यत्वमिति पर्यवस्यति। अत्र प्रमात्रभिन्नत्वं प्रत्यक्षत्वविनिगमकम्। अभिन्नत्वं तु चैतन्यस्तरे एव सुशकम्। अधिष्ठानातिरिक्तस्वतन्त्रसत्ताकत्वस्य अध्यस्ते सम्भवायोगात् प्रमातृसत्तैव विषयसत्ता इति प्रमात्रभिन्नत्वस्य युक्तिसहः पक्षः।

खण्डितं ज्ञानं न मण्डनाय

वस्तुनः वस्तुत्वेन ग्राहकं ज्ञानमेव प्रमा। इन्द्रियाणां शक्तेः सावधिकत्वमत्र प्राधान्येन चिन्त्यम्। का इन्द्रियाणां प्रकृतिः इत्याकाङ्क्षायां परिमितिरेव तेषां प्रकृतिरिति वक्तव्यम्। उपनिषत्कथा अत्र मार्गं निर्दिशति। एकैकमिन्द्रियमपि स्वसन्निकृष्टमर्थं परिच्छिनत्ति। सन्निकर्षो नाम संयोगः। संयोगस्य स्वभावो नाम पाक्षिकत्वम्। वस्तुनः एकदेशेन सह वस्त्वन्तरस्य संयोगः सम्भवेत्, न कात्स्न्येन।

बृहदारण्यकोपनिषदि तृतीयाध्याये आर्तभागप्रश्ने ग्रहातिग्रहचर्चा याज्ञवल्क्येन कृता। 'चक्षुर्वै ग्रहः सः रूपेणातिग्रहेण गृहीतः' इत्यादि तत्र वर्णितम्। 'अन्यत्रमना अभूवम् नाश्रौषम्' इत्यपि वाक्यं प्रत्यक्षस्य मनोऽधीनत्वेन मनसश्च चञ्चलत्वात् प्रत्यक्षसाधनीभूतसकलघटकानां विघटकत्वे पर्यवसानं

In Public domain. Digitization Muthulakshmi Research Academy

भवति। अतः चैतन्यस्तरे अद्वैतानुभूत्यैव प्रत्यक्षत्वस्य परमार्थत्वसिद्धिरिति वेदान्तपक्ष एव साधीयान्। अत एव मधुसूदनसरस्वतीमहानुभावः प्रत्यक्षबलखण्डनावसरे प्राबल्यमागमस्यैव इति आर्षापरोक्षस्यैव ज्यैष्ठ्यं प्रतिपादयामास।

सविकल्पकनिर्विकल्पकविवेकः

नैयायिकसम्मतः पक्षः सखण्डधीसमुत्पादकः। तथा हि इन्द्रियजन्यप्रत्यक्षस्य करणं त्रिविधम्। कदाचिदिन्द्रियं कुत्रचिदिन्द्रियार्थसन्निकर्षः कदाचित् ज्ञानम्। तत्र इन्द्रियस्य करणत्वं नाम यदा अर्थसन्निकृष्टेन इन्द्रियेण निर्विकल्पकात्मकं ज्ञानं फलमुत्पद्यते तस्य ज्ञानस्य इन्द्रियं करणम्। सविकल्पकानामपि इन्द्रियमेव करणम्। सन्निकर्षादीनां तु अवान्तरव्यापारत्वम्। यदा तु निर्विकल्पकज्ञानानन्तरं सविकल्पकज्ञानमुत्पद्यते तदा इन्द्रियार्थसन्निकर्षः करणं, निर्विकल्पकज्ञानमवान्तरव्यापारः, सविकल्पकं ज्ञानं फलम्। अस्यां प्रक्रियायां सविकल्पकं यच्च ज्ञानं विशिष्टवैशिष्ट्यावगाहि तदेव ज्ञानस्य पराकाष्ठत्वेन परिगण्यते। खण्डिता धीरेव अस्याः प्रक्रियायाः फलम्। एतद्वासनावासिताः नैयायिकाः प्रकारताविशेष्यतासंसर्गताअनवच्छिन्नविशेष्यमात्रग्राहिज्ञानस्य एकस्य निरवच्छिन्नस्य गङ्गोत्रिगाङ्गपयः कल्पज्ञानोच्चसीमायाः धारणां कर्तुमशक्ताः 'दन्द्रम्यमाणाः परियन्ति' इति अगत्या वक्तव्यम्। वेदान्तिनामयं डिण्डिमः यत् निर्विकल्पकं ज्ञानमेव अखण्डधीगोचरीभूतं गुडघनवत् संसर्गासङ्गिसम्यग्धीसमुद्भूतं प्रातिपदिकार्थमात्रग्राहकं सकलसविकल्पवृत्तिशुष्कपत्रानलायमानं चकास्तीति अहो अद्वैतिनां महिमा महीयते प्रमाणपरीक्षणक्षणगणनायाम्। चित्सुखाचार्यवचनमत्र स्पष्टां प्रतिपत्तिं जनयति -

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता।।

अखण्डार्थबोधः

ज्ञाने द्वैतमेव विकल्पः। यत्र ज्ञानं विशेषणविशेष्यावगाहि भवति तदा ज्ञाने विविधकल्पाः जायन्ते यथा नीलमुत्पलम्, श्वेतमुत्पलमित्यादि। 'विषयेण विशेषो हि निराकारतया धियाम्' इति वाक्योदाहरणपुरस्सरं वाचस्पतिः धियां निराकारत्वं मूलरूपेण सोपपत्तिप्रतिपादयामास। ज्ञानं ब्रह्मरूपत्वात् स्वस्वाभाव्येन अखण्डमेव। तच्च अखण्डत्वं निर्विकल्पकज्ञाने प्राकट्यमेति। यत्र संसर्गासङ्गित्वं तत्रैव सम्यग्धीत्वम्। अतः स्वरूपात्मकं ज्ञानमेव परमार्थज्ञानमिति वेदान्तडिण्डिमः।

'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि वाक्यं संसर्गागोचरज्ञानजनकं स्वरूपलक्षणवाक्यत्वात् इति शास्त्रीयमर्यादा। परस्परसंसर्गवदर्थबोधकत्वं वाक्यानां स्वभावः। एतां मितिमतीत्य वाक्यतः वाक्य-

In Public domain. Digitization Muthulakshmi Research Academy

स्वभावातीतज्ञानमुत्पद्यत इति अद्वैतवेदान्तिनः। प्रत्यक्षतः इन्द्रियातीतं ज्ञानं चैतन्यरूपमुत्पद्यते शब्दतश्च शब्दस्वभावातीतं प्रातिपदिकार्थमात्रावगाहि, विशेषणवैशिष्ट्यानवगाहि ज्ञानमुत्पद्यत इतीदमपूर्वयोगदानं वाङ्मयलोकं प्रति अद्वैतिनाम्।

शाब्दापरोक्ष्यमहिमा

द्रष्टृदृश्यभेदबुद्धिविलयनतः चैतन्यमात्रावभासदशायां शुद्धापरोक्ष्यमिति वादेन सह परोक्षसाधन-शब्दतः अपरोक्षानुभूतिः भवतीति वेदान्तिना प्रमेयजातमपि अनितरसाधारणं योगदानमेव। यदा वेद्यं वस्तु स्वस्वरूपमेव तदा नेदिष्ठं तत् ज्ञापकस्तोकनिमित्तसद्भावादपि अपरोक्षानुभूतिं जनयतीति दशम-स्त्वमिति इत्यादिलौकिकोदाहरणेषु अपि विदितमेव। इत्थं वेदान्तिनां प्रमाणमीमांसा प्रामाण्यवादचरम-सीमां नयतीति स्वीकर्तव्यम्। अस्यां दशायां प्रामाण्यविषये स्वतो वा परतोवा इति प्रश्न एव नोत्तिष्ठति। स्वयंप्रकाशचिद्घन स्वरूपं ज्ञानमद्वितीयत्वप्रभासं प्रदीपवत् स्वयंप्रभमिति वेदान्तविनिश्चयः। आधुनिक-भाषाविदः सदृशविज्ञानिनोऽपि ज्ञानोत्पत्तितन्त्रविचक्षणाः क्रमेण ज्ञोनोच्चकोटितन्त्रस्य वेदान्तपक्षमपि कोट्यन्तरत्त्वेन वा स्वीकर्तुं सिद्धा बभूवुरिति वेदान्ते विज्ञानस्य सहयोगं वयम् उदाहरतया स्वीकुर्मः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणेषु साक्षिप्रत्यक्षस्य वैशिष्ट्यम्

विद्वान् सुमन् के.एस्,
डा.एस्.एन्.प्राणेशः

आगमप्रामाण्यं समर्थयद्भिः वेदापौरुषेयत्वं समर्थनीयमेव। वेदानामपौरुषेयत्वाभावे आगमस्यापि प्रामाण्यं न सिद्ध्यति। यतो हि आगमेषु परस्परविरोधः दृश्यते। परस्परविरुद्धागमाः वर्तन्ते चेत् आगमेन कस्याप्यर्थस्य सिद्धिर्भवति। वेदस्य अपौरुषेयत्वे तु वेदमूलकत्वं यस्यागमस्यास्ति तेनागमेनैव अर्थसिद्धिर्भवति, प्रमेयसिद्धिर्भवति। तथैव प्रत्यक्षप्रामाण्यवादिभिरपि साक्षिप्रत्यक्षस्य नियतयथार्थत्वं नियतप्रामाण्यं समर्थनीयम्। साक्षिप्रत्यक्षस्य नियतार्थत्वे सति तादृशसाक्षिसिद्धस्य बाह्यप्रत्यक्षस्य प्रामाण्यं सिद्ध्यति। अन्यथा इदं प्रत्यक्षं प्रमाणं वा तत्प्रत्यक्षं प्रमाणं वेत्याशङ्कायां परिहारः कः ? यथा वा आगमयोः विरोधे सति कस्यचिदागमस्य प्रामाण्यं वेदमूलकतया सिद्ध्यति, तथैव नियतयथार्थभूतेन साक्षिणा यस्य प्रत्यक्षस्य प्रामाण्यं निश्चितं तदेव प्रत्यक्षं प्रमाणमिति निश्चेतुं शक्यते। साक्षिणः नियतयथार्थत्वाभावे साक्षिसिद्धस्य प्रत्यक्षस्यापि प्रामाण्यं न सिद्ध्यति। यथा वा कश्चन पुरुषः सर्वान् प्रति एवं कर्तव्यमेव वर्तितव्यमित्युपदिशति। परन्तु स्वयं सदाचारी न्यायनिष्ठः न भवति चेत् तस्येतरान् प्रत्युपदेशाधिकारः नास्ति। तथैव साक्षी तावत् सर्वेषां प्रत्यक्षाणां प्रामाण्यनिश्चायकः। स एव साक्षी नियतयथार्थो न भवति चेत् साक्षिणः प्रत्यक्षप्रामाण्यनिश्चायने सामर्थ्यमेव नास्ति। तस्मात् वेदापौरुषेयत्वं यथा वाऽवश्यं समर्थनीयमागमप्रामाण्यवादिभिः, तथैव साक्षिप्रत्यक्षस्य नियतयाथार्थ्यं समर्थनीयमेव।

प्रत्यक्षप्रमाणं सर्वैर्दार्शनिकैः लौकिकैः परीक्षकैः आधुनिकविज्ञानिभिश्चाङ्गीक्रियते। तस्य लक्षणे, विभागे,ज्ञानजनकत्वप्रकारे, तज्जन्यमानस्वरूपादिविषये चास्ति महान् मतभेदः। अस्य च मतभेदस्य अस्ति कारणद्वयम् । तत्तन्मतेषु प्रमेयस्वरूपभेदः सर्वविदित एव। तत्तत्प्रमेयसमर्थनाय तदानुगुण्येन प्रमाणस्वरूपनिरूपणं तत्तद्दार्शनिकैः क्रियते। तथा हि - बौद्धैः पदार्थस्य स्वलक्षणमात्रमङ्गीकुर्वद्भिः नामजात्यादिकल्पविरहितस्यैव प्रत्यक्षत्वं, कल्पनाविशिष्टग्रहणस्य भ्रान्तित्वमुच्यते। अद्वैतिभिः सर्वस्य चैतन्याधिष्ठानत्वमङ्गीकुर्वद्भिः अन्तःकरणावच्छिन्नवृत्त्यवच्छिन्नचैतन्यविषयावछिन्नचैतन्ययोः ऐक्यं प्रत्यक्षमित्युच्यते। पुरुषस्य पुष्करपलाशवत् निर्लेपत्वमङ्गीकुर्वद्भिः साङ्ख्यैः 'चितिच्छायापन्ना बुद्धिवृत्तिः प्रत्यक्षम्' इत्युच्यते। एवं स्वस्वप्रमेयानुगुण्येन प्रत्यक्षस्वरूपनिरूपणं दार्शनिकेषु प्रत्यक्षविषये मतभेदे प्रथमं कारणम्।

१. संस्कृतविभागाध्यक्षः, २. उपाचार्यः, संस्कृतविभागः - जैन् कलाशाला, बेङ्गलूरु

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयङ्कारणन्तु, इन्द्रियार्थसम्बन्धनिरूपणादिप्रक्रियाभेदप्रयुक्तमतभेदः। नामजात्यादिधर्माणां प्रत्यक्षेऽवगाहनक्रमनिरूपणभेदप्रयुक्तमतभेदः। तथा हि - समवायसम्बन्धमङ्गीकुर्वद्भिः न्यायवैशेषिकैः संयोगसमवायघटिताः षट्सम्बन्धाः अङ्गीक्रियन्ते। समवायसम्बन्धमनङ्गीकुर्वद्भिः भाट्टैः स्वप्रकाशत्वं वा अनुव्यवसायगम्यत्वं वा ज्ञातत्तानुमेयत्वं वा साक्षिवेद्यत्वं वा इत्यत्र यः मतभेदः सः प्रक्रियाभेदरूपः। प्रक्रियाभेदेष्वपि प्रमेयभेदस्पर्शोऽपि तत्र तत्र वर्तत एव। निर्विकल्पकं ज्ञानं प्रत्यक्षमुतानुमेयम्। किमिदं प्रमा वा भ्रमप्रमाभिन्नं वा तटस्थं वा इत्यादयोऽपि प्रक्रियाविर्शात्मकाः। एवं प्रमेयभेदानुगुण्यसम्पादनाय प्रक्रियासौष्ठवसम्पादनाय च दार्शनिकेषु प्रत्यक्षप्रमाणविषये मतभेदाः प्रवर्तन्ते।

द्वैतवेदान्ते निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम्। विषयं प्रति स्थितेनाक्ष्णा ज्ञानोपत्त्या अक्ष्णामपि कारणत्वेन प्रत्यक्षत्वं सम्मतम्। तथा च टीकाकृत्पादः जयतीर्थभिक्षुः प्रमाणलक्षणटीकायाम् - 'अर्थं प्रति स्थितमक्षं प्रत्यक्षम्' इति। चक्षुरादिपञ्चेन्द्रियाणि मनश्च ज्ञानेन्द्रियाणीति प्रायः सर्वदार्शनिकसम्मतानि। द्वैतवेदान्ते तु सप्तमं ज्ञानेन्द्रियं संलक्षितम्। तदेव साक्षी। तथा च श्रीमध्वाचार्यवचनं प्रमाणलक्षणे- 'प्रत्यक्षं साप्तविधं साक्षिषडिन्द्रियभेदेन' इति। अयञ्च साक्षी प्रमाता आत्मैव। आत्मस्वरूपम्, अन्तः-करणधर्माश्च सुखादयः बाह्याश्चाकाशकालादयोऽस्य साक्षिणो विषयाः। अस्य साक्षिणः न कुत्रापि अन्तर्भावः। पार्थक्येन तदङ्गीकारः अनिवार्यः।

मुख्यविषयप्रतिपादनम्

इन्द्रियं द्विविधम्। प्रमातृस्वरूपं तद्भिन्नश्चेति। तत्र स्वरूपेन्द्रियं साक्षीत्युच्यते। आत्मा एव आन्तरपदार्थद्रष्टृत्वात् साक्षीत्युच्यते। स च ज्ञानरूपः स्वप्रकाशश्च। तस्य आत्मस्वरूपं मनः आत्मधर्म-भूताश्च आन्तरा ज्ञानेच्छाप्रयत्नसुखदुःखभयाभयकृपाऽविद्यादयः तदभावाश्च विषयाः। एवं बाह्याः आकाश-कालद्व्यणुकपरमाणुप्रकृत्यादयोऽपि साक्षीन्द्रियग्राह्याः।

न्यायमते इव 'मन एव सुखादिकं गृह्णाति' इति वक्तुं यदि स्वरूपेन्द्रियभिन्नैरिन्द्रियैः जायमानं ज्ञानं प्रमात्मकमेव भवेत किन्तु तत् भ्रमात्मकमपि दरीदृश्यते। एवञ्च ज्ञानेन्द्रियाणां भ्रमजनकत्वात् ज्ञानमात्रे प्रामाण्यसन्देहः सुस्थ एव। न हि सुखदुःखादिविषये कदाचिदपि विभ्रममनुभवामः। तेन च ज्ञायते इदं च ज्ञानं न विभ्रमजनकेन्द्रियजन्यमिति। विभ्रमाऽजनकश्च इन्द्रियं साक्षिरूपमेव नान्यत् इत्युक्तम् अनुव्याख्याने -

स च साक्षी कचिद्दुष्टः कथं निर्णय ईयते।
विशेषास्सर्व एवैते साक्षिप्रत्यक्षगोचराः।।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मात् सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये।
साक्षी निर्दोष एवैकः सदाऽङ्गीकार्य एव नः।।

किञ्च अनुभूतपदार्थविषयकं कदाचिदपि अभ्रमरूपं सुखदुःखादिविषयकं ज्ञानं सर्वेषामस्तीति सुविदितम्। इदञ्च निर्णयात्मकं ज्ञानं साक्षीन्द्रियग्राह्यमित्युच्यते। भिन्नेन्द्रियजन्यमानप्रामाण्ये अनाश्वास-परिहाराय पुनः प्रमाणान्तरान्वेषणेन अनवस्थादिदोषसद्भावेऽपि साक्षिणः स्वप्रकाशत्वेन स्वस्य तत्प्रमा-णस्य च तेनैव ग्रहणाङ्गीकारेण न अनवस्थादिदोषप्रसक्तिः। तदेव प्रतिपादयति आचार्यः जयतीर्थमुनिः विषमपदवाक्यार्थविवृतौ -

नियमेन सुखाद्येषु प्रामाण्यं साक्षिगोचरम्।
स्वप्रामाण्यं सदा साक्षी पश्यत्येव सुनिश्चयात्।।
ज्ञानग्राहकेणैव साक्षिणा मानता मितेः।
दोषाभावे प्रमाणत्वं दोषाभावस्य साक्षिणा।।
निश्चितत्वं क्वचिच्चैव स्वः प्रमाण्यमिष्यते।
अतो न सर्वमानानां प्रामाण्यं निश्चितं भवेत्।।
साक्षिणां निश्चितं यत्र तत्प्रामाण्यं स्वलक्षणम्।।

तथा च साक्षिणः स्वप्रकाशत्वेन स्वस्य स्वगृहीतज्ञानस्य च प्रामाण्यग्रहणे संवादानपेक्षात् न अनवस्थादिदोषाः। अविज्ञाते अननुभूते च पदार्थे साक्षी प्रामाण्यं न गृह्णाति दोषाभावे एव प्रमाणमिति व्यवस्थया प्रवर्तते। प्रामाण्यग्रहणे साक्षिणः स्वारसिकशक्तिसद्भावेन दोषाभावस्य प्रयोजकत्वमात्र-मभ्युपगम्यते। साक्षी ज्ञानमात्रं गृहीत्वा पश्चात् क्वचित् जिज्ञासायां सत्यां परीक्षया ज्ञानप्रामाण्यं गृह्णाती-त्यनङ्गीकारे सर्वेषामपि ज्ञानानां प्रथममेव प्रामाण्यं विज्ञायेत। न च एतदानुभविकम्। तेन उक्तैव व्यवस्था युक्ता। साक्षिणः प्रामाण्यग्रहणस्वभाववत्त्वेन क्वचिदपि कस्यचिदपि सुखदुःखानुभवादौ न संशयो जातः। बाह्येऽननुभूतेऽर्थे तु व्यवस्थया प्रामाण्यग्रहणम् इत्युक्तम्।

ननु साक्षिवेद्यत्वेऽपि अनवस्था दुर्वारैव। ज्ञानग्राहकः साक्षी ज्ञाने प्रामाण्यं गृह्णाति। तत्प्रामाण्य-मपि प्रमाणान्तरेण प्रसाधनीयम्। एवं तत्राऽपि, इति अप्रामाणिकपरम्पराकल्पनातः अनवस्था कथं परिह्रियते इति चेदत्रोच्यते - साक्षी हि स्वयंप्रकाशः स्वात्मानं स्वप्रामाण्यञ्च गोचरयतीत्युक्तम्। अतोऽत्र प्रामाण्यपरतस्त्ववाद इव नाऽप्रामाणिकपरम्पराकल्पनमिति भावेनोक्तम् अनुव्याख्याने - 'न परीक्षानवस्था स्यात् साक्षिसिद्धे त्वसंशयात्' इति ।

In Public domain. Digitization Muthulakshmi Research Academy

साक्षिणः काल-तत्सम्बन्धिपदार्थग्राहित्वम्

सर्वेषां वर्तत एव अनागतादिकालज्ञानम्। अन्यथा कथं लिङन्तलृङन्तपदानामवबोधः? मुक्तो भविष्यामीति विश्वासेन हि साधकोऽध्ययनाध्यापनादौ प्रवृत्तो भवति। उत्तरकालज्ञानाभावे कथं तद्गतमोक्षज्ञानं भवेत्? एवञ्च सुविदितमिदं यत् सर्वेषामतीतानागतकालज्ञानमस्तीति। तस्य चानुभवः न प्रमाणान्तरगोचर इति साक्षिगोचर एव भवेत्। पदानां पदार्थेषु शक्तिग्रहस्तावत् सर्वापेक्षितः। तेन विना वाक्यैः पदार्थसंसर्गविशेषलक्षणवाक्यार्थस्य बोधासम्भवात्। शक्तिग्रहश्च शक्तिविषयपदार्थबोधमपेक्षते। सम्बन्धज्ञानस्य सम्बन्धिज्ञानपूर्वकत्वनियमात्। एवञ्च पदार्थग्रहः प्रमाणान्तरादेव भवेत्। न तु पदादेव। पदात् पदार्थबोधे जाते सम्बन्धिज्ञानस्य जातत्वेन तत्र वाचकत्वशक्तिग्रहः, शक्तिग्रहे सति पदात् पदार्थबोध इत्यन्योन्याश्रयप्रसङ्गात्। यत्र च अतीतानागतार्थसंसर्गो वाक्यार्थस्तत्रातीतानागतार्थग्रहणमावश्यकम्। इदञ्च ग्रहणं साक्षिणा एव भवेत् न तु मानान्तरेण। सुखकालाकाशादिग्राहकप्रमाणत्वेन सिद्धस्य साक्षिणः एतत्सामर्थ्यकल्पनं सुकरम्। साक्षिणमनङ्गीकुर्वतां तु अतीतानागतार्थग्रहणोपाय एव नास्तीति पदार्थशक्तिग्रहः दुरुपपादः स्यात्।

अनुमानस्य व्याप्तिः पक्षधर्मता इति द्वयं सामर्थ्यं ननु। ततश्च अतीतानागतवर्तमानेषु सर्वेषु धूमादिषु तथाविधैः सर्वैः वह्न्यादिभिः व्याप्तिर्ग्राह्यैव। तदर्थं च अतीतादिसकलधूमवह्न्यादीनां ज्ञानं पूर्वं भवेदेव। प्रसिद्धं चक्षुरादिप्रमाणं तु तज्ज्ञानोत्पादनेऽसमर्थमिति सर्वसम्मतम्। तथा च साक्षिण एव अतीतादिसकलधूमवह्न्यादि ज्ञानजनकत्वमङ्गीकर्तव्यम्। अन्यथा अनुमानप्रमाणस्यैव भङ्गः स्यात्।

किञ्चास्ति तावत् सर्वेषां 'सर्व' इति शब्दस्य शक्तिग्रहः। अन्यथा 'सर्वं खल्विदं ब्रह्म' इत्यादि व्यवहारविलोपप्रसङ्गात्। शब्दशक्तिग्रहश्चार्थग्रहापेक्ष इति सर्वेषां सामान्यतः सर्वपदार्थज्ञानमस्ति इत्यङ्गीकार्यम्। अतीतादिसर्वगोचरं च न साक्षीतरं प्रमाणमस्तीति साक्षिण एव सामान्यतः सर्वपदार्थग्रहजनकत्वमङ्गीकर्तव्यम्। यथोक्तम् -

> अतः सर्वे पदार्थाश्च सामान्यात् साक्षिगोचराः।
> सर्वमित्येव विज्ञानं सर्वेषां कथमन्यथा।। (अनु.व्या.३.२.१.७८)

सुदृढनिर्णयस्वरूपस्य साक्षिणोऽनङ्गीकारे ज्ञानेषु अनाश्वासपरिहारोपायाभावेन अनवस्थादिदोषप्रसक्तेः, कदाप्यनाश्वासाऽविषयकस्य सुखादिविषयकजन्यज्ञानस्य प्रामाण्यं साक्षिवेद्यमित्येव वाच्यम्। किञ्च अस्ति तावत् सर्वेषाम् 'एतावन्तं कालमहं सुखमस्वाप्समि'ति सुषुप्त्युत्तरकालीनानुस्मृतिः। न चेयं स्मृतिः अनुभवमन्तरोपपद्यते। न च सुषुप्तिदशायां सुखज्ञानकालग्राहकमान्तरं मनो जागर्ति।

In Public domain. Digitization Muthulakshmi Research Academy

तदुपरमस्यैव सुषुप्तित्वात्। एवञ्च सुखकालाज्ञानादिग्राहकं किमपि इन्द्रियं स्वरूपभूतम् अङ्गीकर्तव्यमेव, यदभावे सौषुप्तिकानुस्मृतिर्नोपपद्यते। तच्चेन्द्रियं स्वरूपभूतं स्वप्रकाशं साक्षिशब्दव्यपदेश्यमिति युक्तमुत्पश्यामः। यथोक्तं - 'सुषुप्तौ हीन्द्रियाणामुपरतत्वान्न बाह्यप्रत्यक्षानुमानागमानां तत्र प्रवृत्तिः। अस्ति तदाऽपि कालप्रतिभासः। एतावन्तं कालं सुखमहमस्वाप्सम्' इति सुषुप्त्युत्थितस्य परामर्शदर्शनात्। न ह्यननुभूतस्य परामर्शो युज्यते, अतिप्रसङ्गात्। अतः परिशेषात्साक्षिवेद्य एवेति गम्यते इति। एवञ्च एतादृशं बहूपकारिणं बहुविप्लवपरिहारिणं साक्षिणं लक्षितवता पूर्णप्रज्ञदर्शनेन तत्वबुभुत्सोर्लोकस्य महाननुग्रहः कृत इत्यलं पल्लवतल्लजकल्पानल्पजल्पनेन।

परामृष्टग्रन्थाः

१.प्रमाणलक्षणम्	-	श्रीपूर्णप्रज्ञमुनिकृतम्।
२.अनुव्याख्यानम्	-	श्रीपूर्णप्रज्ञमुनिकृतम्।
३.प्रमाणलक्षणटीका	-	श्रीजयतीर्थभिक्षुविरचितम्।
४.विषमपदवाक्यार्थविवृत्तिः	-	श्रीजयतीर्थभिक्षुविरचितम्।
५.भारतीयदर्शनेषु प्रत्यक्षम्	-	पूर्णप्रज्ञसंशेधनमन्दिरम्।
६.ज्ञानस्वरूपम्	-	पूर्णप्रज्ञसंशोधनमन्दिरम्।
७.प्रमाणपद्धतिः	-	श्रीजयतीर्थमिक्षुविरचितम्।
८.विष्णुतत्वविनिर्णयः	-	श्रीपूर्णप्रज्ञमुनिकृतम्।
९.प्रमाणलक्षणटीकाटिप्पणी	-	श्रीविजयीन्द्रतीर्थविरचितम्।

एतेभ्यो गुरुभ्यः सकार्तज्ञ्यं वन्दनानि

श्रीश्रीविद्यामान्यतीर्थगुरुचरणाः, भूतपूर्वपरिव्राजकाः, पलिमारुमठः, उडुपि।

श्रीश्रीविश्वेशतीर्थश्रीचरणाः, कुलपतयः, पूर्णप्रज्ञविद्यापीठम् ।

श्रीहरिदासभट्टमहोदयः, प्रांशुपालः, पूर्णप्रज्ञसंस्कृतमहाविद्यालयः, बेङ्गळूरु।

श्री आनन्दतीर्थः नागसम्पिगे महोदयः, निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गळूरु।

श्री श्रीनिवासमूर्तिमहोदयः सि.एच्., प्राध्यापकः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गळूरु।

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणविषयतयोः परस्परम् उपकार्योपकारकभावः

श्री सन्दीपकुमारशर्मा

धर्म अर्थः कामो मोक्षश्चेति चतुर्विधः पुरुषार्थः लोके प्रसिद्धः। कश्चित् प्रत्यक्षेण गम्यते, कश्चित् श्रुत्यादिभिः प्रतिपाद्यते। स्ववासनावशः पुरुषः तं तं पुरुषार्थमिच्छति तत्र प्रवर्तते च इति दृश्यते लोके। एतेषां च पुरुषार्थानां प्रमा एकविधा, द्विविधा, चतुर्विधा, पञ्चविधा, षड्विधा चेति तत्तन्मते प्रतिपाद्यते। परं सर्वैरपि प्रमा तज्जनकं प्रमाणं च अवश्यमङ्गीक्रियते एव। यतः पशूनामपि प्रवृत्तिः प्रमाणविहीना न दृश्यते। किमुत मनुष्याणामिति प्रमाणानामावश्यकता स्वतः सिद्धा अस्ति। अत एव प्रमाणस्य लक्षणादिभिः निरूपणे परीक्षायां च शास्त्राणां प्रवृत्तिः।

अत्रेदानीं न्यायनयमनुसृत्य कश्चिद्विचारः क्रियते। प्रमायाः लक्षणं यदसाधारणं कारणं तच्च प्रमाणमित्युच्यते। तथा च प्रमात्वावच्छिन्नजन्यतानिरूपितजनकताश्रयत्वं प्रमाणस्य लक्षणं पर्यवसति। तच्च प्रमाणं न्यायमते चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदेन स्वीक्रियते। एतेषां प्रमाणानां स्वरूपनिर्धारकेषु पदार्थेषु अन्यतमो भवति विषयतानामकः पदार्थः। इयं च विषयता मुख्यतः त्रिविधा भवति, प्रकारता, विशेष्यता, संसर्गता इति च कथ्यते। अस्याः अवच्छेदकता, विधेयता, उद्देश्यता इत्येवमवान्तरभेदाश्च भवन्ति। एताः विषयताः सविषयकस्य पदार्थस्य स्वरूपनिर्धारणे उपयुज्यन्ते। एतासां कैश्चित् अखण्डोपाधि-रूपता कैश्चित् स्वरूपसम्बन्धविशेषरूपता, अतिरिक्तपदार्थता वा स्वीक्रियते तच्च न प्रकृतमिति नाऽत्र अधिकं चिन्त्यते। एतासां प्रमाणस्वरूपनिर्धारणे कथमुपयोगः इति चेत् - प्रमाणं नाम प्रमाकरणमित्युक्तम्, तथा च प्रमाकरणत्वं प्रमाणमिति लक्षणं भवति। प्रमाणत्वेन प्रमाणं ज्ञातव्यं चेत् विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात् प्रथमं प्रमाणत्वं ज्ञातव्यं भवति। प्रमाणत्वशरीरे च प्रमायाः प्रवेशात्, घटितज्ञानं प्रति घटकज्ञानस्य कारणत्वात् प्रमाणत्वज्ञानं प्रति प्रमायाः ज्ञानं कारणम्, अतः पूर्वं प्रमायाः ज्ञानम् अपेक्ष्यते। प्रमायाश्च ज्ञानं प्रमात्वेनैव असाधारणधर्मेणापेक्ष्यते इति प्रमात्वेन प्रमा ज्ञानं प्रति प्रमात्वज्ञानस्य कारणत्वं विशिष्टबुद्धिं प्रतीतिपूर्वोक्तन्यायेनैव। प्रमात्वं च पूर्वोक्तरीत्या तद्वतितत्प्रकारक-ज्ञानत्वात्मकम्।

न च प्रमात्वं जातिरिति वाच्यम्। अयं घटः तत्तद्विषयकप्रमाणं प्रमात्वं तत्तद्विषयभेदेन भिन्नमिति तस्य प्रमासामान्ये अननुगतत्वात्। एवं च प्रमात्वस्य विषयताघटितत्वात्, घटितज्ञानं प्रति च घटकज्ञानस्य कारणत्वनियमेन प्रमात्वज्ञानं प्रति विषयताज्ञानं कारणमिति विषयतां विजानानः प्रमात्वं विज्ञाय

शोधच्छात्रः, न्यायविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

प्रमात्वेन प्रमां, तज्जनकत्वेन प्रमाणत्वेन च रूपेण प्रमाणं जानाति इति परम्परया विषयतायाः ज्ञातायाः प्रमाणज्ञानं प्रति कारणत्वं वर्तते।

एवं विषयतामादायैव तत्प्रयोजकस्य प्रमाणस्य तत्तदंशे प्रामाण्यमिति निर्धार्यते। प्रत्यक्षे च द्विविधः सन्निकर्षः लौकिकालौकिकभेदेन कारणत्वेन स्वीक्रियते। किंचित् प्रत्यक्षं लौकिक-सन्निकर्षेण, किञ्चिदलौकिकसन्निकर्षेण किञ्चिच्च उभाभ्यामपि सन्निकर्षाभ्यां जायते।

अत्र तृतीयस्य उदाहरणं दीयते, यथा ज्ञातो घट इति प्रत्यक्षं चक्षुरिन्द्रियजन्यम्। अस्मिन् प्रत्यक्षे ज्ञाने च ज्ञाननिरूपिता विषयता भवति। तत्र घटनिष्ठविषयताया एव प्रयोजकं भवति चक्षुरिन्द्रियं न तु ज्ञाननिष्ठविषयतायाः इति तादृशविषयताप्रयोजकत्वादेव इन्द्रियस्य घटांशे प्रामाण्यमित्येवं रीत्या विषयतां द्वारीकृत्य विषयपरिच्छित्तिर्भवति। अनुमाने च यथा - घटः तद्व्यक्तित्वव्याप्याभिधेयवानिति परामर्शेण जायमानायाः अनुमितेः घटोद्देश्यकत्वं तद्व्यक्तिविधेयकत्वं च भवति। अत्र तज्जनकस्य अनु-व्यवसायस्य अभिधेयत्वेन रूपेण जगद्विषयकत्वेऽपि तस्य न जगद्विषये प्रामाण्यं स्वीक्रीयते किन्तु तद्व्यक्तित्वविशिष्टघटांशे एव, यतः तत्परामर्शप्रयोज्यविषयतायाः तादृशघटे एव सत्त्वादित्येवमन्यत्र शब्दादिष्वपि प्रमाणेषु तु सुतरां वक्तुं शक्यन्ते।

'उदाहरणवाक्यमि'ति परार्थानुमानप्रयोजकपञ्चावयववाक्येषु प्रतिज्ञाहेतूदाहरणोपनयनिगमा-नाख्येषु तृतीयं भवति। 'यत्र पर्वतो वह्निमानि'ति प्रतिज्ञावाक्यं भवति, धूमात् इति च हेतुवाक्यं भवति तस्मिन् स्थले तत्र व्याप्तेर्जिज्ञासायां 'यो यो धमवान् स वह्निमान् यथा महानस' इति उदाहरणवाक्यं प्रयुज्यते इति प्रथितम्। अस्मिन् वाक्ये यत्पदवीप्सा वर्तते। तत्र प्रथमयत्पदेन दृष्टान्तत्वेनोपन्यस्तः महानसः बोद्ध्यते। द्वितीययत्पदेन महानसभिन्नं यद्धेत्वधिकरणं तद्बुध्यते। स वह्निमान् इत्यत्र तत्पदम् अस्ति तेन च महानसः महानसभिन्नश्च साध्याधिकरणं विद्यते। तथा च यो यो धूमवान् स वह्निमान् इति वाक्यात् महानसं धूमवत्, महानसभिन्नं धूमवत् महानसं वह्निमत् महानसभिन्नं च वह्निमत् इति रीत्या समूहालम्बनात्मकः शाब्दबोधं जायते। अत्रैकस्मिन् समूहालम्बनात्मके बोधे एतावतां पदार्थानां विषयत्वेऽपि महानसं धूमवत् इत्येवं रीत्या ये चत्वारो अंशाः सन्ति तेषामेकैकस्यांशस्य प्रयोजकश्च सम्पूर्णं वाक्यमिति न कथ्यते। किन्तु तत्तद्वाक्यघटकः तत्तदंश एव। यथा महानसं धूमवत् इत्याकारक-बोधनिष्ठविषयता प्रयोजकः धूमवान् इत्यंश एव न तु अतिरिक्ताः अन्ये अंशाः। एतत्तत्वं निरूपयितुं बोधनिष्ठजन्यतायां तत्तद्विषयत्वावच्छिन्नत्वं निवेश्यते। तदेवमवधेयं यत् महानसनिष्ठविशेष्यतानिरूपित-धूमत्वावच्छन्नप्रकारत्वावच्छिन्नजन्यतानिरूपितजनकता 'यो धूमवानि'ति प्रथमानुपूर्व्यामेव महानस-भिन्ननिष्ठविशेष्यतानिरूपितप्रकारताऽवच्छिन्नजन्यतानिरूपितजनकता द्वितीयायां यो धूमवान् इत्यानु-

In Public domain. Digitization Muthulakshmi Research Academy

पूर्व्यामेव, महानसनिष्ठविशेषतानिरूपितवह्नित्वावच्छिन्नप्रकारत्वावच्छिन्नजन्यतानिरूपितजनकता च 'स वह्निमान्' इति भागे एव भवति। तथा एकवाक्यघटकानामपि अवान्तरवाक्यानां तत्तदंशे जनकत्वं विषयतां द्वारीकृत्यैव निरूपितं भवति। एतावता विषयाप्रयुक्तः उपकारः प्रदर्शितः, इदानीं विषयतां प्रति प्रमाणप्रयुक्तः उपकारः प्रदर्श्यते।

यथा हि कस्यचित् पुरुषस्य घटः इत्याकारकं प्रत्यक्षं भवति तदुत्तरं घटमहं जानामि इति अनुव्यवसायः जायते। अयं चानुव्यवसायः आत्मानं तत्समवेतत्वेन ज्ञानं, ज्ञाने च प्रकारतया घटं घटत्वं च विषयीकरोति। अत्र च आत्मनिष्ठविशेष्यतानिरूपितज्ञाननिष्ठप्रकारतायाः अवच्छेदकः सम्बन्धः समवायो भवति, ज्ञानस्य समवायेन आत्मांशे भानात्। ज्ञाननिष्ठविशेष्यतानिरूपितप्रकारतायाः घटनिष्ठायाः घटत्वनिष्ठायाश्च विशेष्यतासम्बन्धः प्रकारतासम्बन्धश्च विषयतासम्बन्धो भवति। ज्ञानस्य विषयस्य च विषयातिरिक्तप्रकृतोपयोगिसम्बन्धाभावादिति तस्य प्रकारतावच्छेदकत्वं स्वीक्रियते। तथा च विषयता अनुव्यवसाये सम्बन्धविधया भासते। तत्र च अनुव्यवसायनिरूपितसांसर्गिकविषयता स्वीक्रियते। विषयता अनुव्यवसाये इंन्द्रियप्रमाणेन ज्ञायते इति प्रमाणस्य विषयताया भाने उपकार अस्ति। एवं चानयोः परस्परमुपकार्योपकारभावः स्यादेव।

न च विषयतां ज्ञातुं प्रमाणापेक्षा अस्ति, विषयतां च अजानानः न प्रमाणं जानातीत्यन्योन्याश्रयः स्यात् इति वाच्यम्। यतः विषयता ज्ञाता सती प्रमाणज्ञाने उपयुज्यते, परं प्रमाणं न ज्ञातं सत् विषयतां बोधयति किन्तु स्वरूपसदेव। यदि च प्रमाणं ज्ञातं सत् गमकं स्यात् तदा दोषः प्रसज्येत इति नान्योन्याश्रयः। तथा च अनया प्रणाल्या प्रमाणविषयतयोः परस्परम् उपकार्योपकारकभावः निरूपयितुं शक्यः इति शम्।

In Public domain. Digitization Muthulakshmi Research Academy

केवलव्यतिरेक्यनुमानम्

श्री का.ई.गोपालदेशिकन्[1]

नैयायिकाभिमतप्रमाणचतुष्टयेषु अनुमानप्रमाणं त्रिविधं भवति। तच्च - अन्वयव्यतिरेकी, केवलान्वयी, केवलव्यतिरेकी। उक्तं कारिकावल्यां -

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः।
द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः।।
अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत्। इति।

अत्रानुमानशब्दस्य अनुमितिकरणव्याप्तिज्ञानविशेष्यताऽश्रयः इत्यर्थः। तादृशस्तु हेतुरेव भवति। तथा च अनुमानशब्दवाच्यभूतहेतुस्त्रिविधः। केवलान्वयिहेतुः, केवलव्यतिरेकिहेतुः, अन्वयव्यतिरेकिहेतुश्च। अनुमितिप्रयोजकव्याप्तिस्तु द्विविधा - केवलान्वयिनी, केवलव्यतिरेकिणी चेति। तत्रान्वयव्याप्तिस्तु हेतुव्यापकसाध्यसामानाधिकरण्यरूपा पूर्वमेवोक्ता, व्यतिरेकव्याप्तिस्तु अत्रोच्यते साध्याभावव्यापको हेत्वभावः इति। तथा च साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तेस्स्वरूपं भवति। ईदृश्येव व्याप्तिः यादृशहेतौ वर्तते सः केवलव्यतिरेकीत्युच्यते।

मणिकारस्तु अनुमानपदस्य अनुमितिकरणार्थकत्वं स्वीकृत्याह - केवलव्यतिरेकी त्वसत्सपक्षः, यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः इति। अत्र न सपक्षो यस्य इत्यसत्सपक्षः, यथा पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र पक्षातिरिक्ते पृथिवीभिन्ने कुत्रापि साध्यनिश्चयो नास्ति। तत्र भट्टाचार्यास्तु सपक्षपदार्थम् एवं वर्णयन्ति साध्यसाधनोभयवत्तया निश्चीयमानधर्मी इति। बहुत्र ग्रन्थेषु निश्चितसाधवान् सपक्षः इत्येव दृश्यते। परं भट्टाचार्यैः साध्यसाधनोभयवत्तानिश्चयविषयीभूतधर्मी इत्युक्तम्। तत्र निश्चितसाध्यवत्वमात्रकथने सिद्धेरपि ग्रहीतुं शक्यतया तस्यानुमितिप्रतिबन्धकत्वेन तदभावस्य कारणत्वं सर्वमतसिद्धमिति न किञ्चिदिहनिरूपणीयं भवेदिति मनसि निधाय निश्चितसाध्यसाधनोभयवत्वमित्युक्तम्। तेन साध्यसाधनयोः सामानाधिकरण्यरूपम् अन्वयसाहचर्यं लभ्यते। असत्सपक्षः इत्यनेन यत्रान्वयसाहचर्यं नास्ति तत्र व्यतिरेक्यनुमानं भवतीति ज्ञायते। ननु सपक्षः सिद्धो न वा। यदि सिद्धः तदा तस्याभावो न सम्भवति। असिद्धश्चेत् तदा तदभावाप्रसिद्धिः। प्रतियोगिप्रसिद्धिं विना अभावस्य प्रसिद्धिः न भवतीति सिद्ध्यसिद्धिभ्यां व्याघातः स्यादित्यतः मूले यत्रेत्युक्तम्। तथा च यत्र व्यतिरेकसहचारज्ञानमात्रेण व्याप्तिग्रहः स एव व्यतिरेकी इत्यर्थः। तथा च असत्सपक्षपदं पारिभाषिकमिति भट्टाचार्याणामाशयः।

---

[1] संशोधनसहायकः, विशेषसहायपरियोजना, दर्शनविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

माथुर्यां तु असत्सपक्षः इति पदस्य अन्यथा अर्थवर्णनं कृतम्। तच्च असत्सपक्ष इति असन् स्वजन्यानुमित्यव्यवहितपूर्वं स्वाधिकरणे असन्, सपक्षः साध्यवत्त्वेन क्वापि निश्चयो यस्येत्यर्थः। तथा च स्वसमानाधिकरणस्वजन्यानुमित्यव्यवहितपूर्ववर्तिनिश्चयाविषयसाध्यकत्वं केवलव्यतिरेक्यनुमानत्वं इति। अत्र स्वाव्यवहितपूर्ववर्तित्वमात्रोपादाने जन्यानुमित्यव्यवहितपूर्ववर्तित्वानुपादाने च वह्निमान् धूमात् इत्यत्रान्वयव्यतिरेक्यनुमाने अतिव्याप्तिः। तत्र स्वपदेन वह्निधूमसामानाधिकरण्यघटितान्वयसाहचर्यज्ञानस्यापि ग्रहणसम्भवात्। तत्पूर्वं साध्यनिश्चयः कुत्रापि नास्ति अतः अतिव्याप्तिः। न हि तज्ज्ञानस्यानुमितिकरणत्वाभावात्कथं स्वपदेन ग्रहणमिति वाच्यम्। अनुमितिं प्रति व्याप्तिज्ञानस्य साध्यविषयकज्ञानत्वेन लाघवात् करणत्वं स्वीक्रियते। तर्हि साहचर्यज्ञानस्यापि साध्यज्ञानत्वेन स्वपदेन ग्रहीतुं शक्यत्वात्। अतः स्वजन्यानुमित्यव्यवहितपूर्ववर्तित्वं निवेश्यते। तन्निवेशे च उक्तसाहचर्यज्ञानस्य साध्यविषयकत्वेनैव अनुमितिपूर्ववर्तितया तदविषयकत्वाभावेन नातिव्याप्तिः। ननु तथापि केवलव्यतिरेक्यनुमानस्य लक्ष्यत्वमेव दुर्लभम्। अनुमितिपूर्वं क्षणत्रयाभ्यन्तरे साध्यवत्त्वनिश्चयाभावे सहचारज्ञानाभावात् व्याप्तिज्ञानस्यैवासम्भवादित्यतो लक्ष्यं दर्शयति मूले यत्रेति। तथा च स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्तिनिश्चयविषयतानवच्छेदकव्यतिरेकितावच्छेदकधर्मावच्छिन्नविधेयताकानुमितिकरणत्वं केवलव्यतिरेक्यनुमानत्वमिति निष्कर्षः। वस्तुतस्तु अग्रिममूले एव साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकव्याप्तेः स्वरूपमुच्यते ततः प्रागेतादृशपरिष्कारः अनावश्यकः इति प्रतिभाति। अपि च मणिकारैरेव यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहः इति स्पष्टतया उक्तम्, परं तद्वाक्यादत्रैतादृशगुरुपरिष्कारः क्लृष्टकल्पनमर्थान्तरमावहतीति भट्टाचार्यमतं समीचीनमिति चिन्त्यते।

अत्र मीमांसकानां पूर्वपक्षः - ननु व्यतिरेकि नानुमानमिति। तथा हि - केवलव्यतिरेकी नानुमानम्। अत्र युक्तिमाह - व्याप्तिविशिष्टपक्षधर्मताज्ञानस्यानुमितिकारणत्वात्। तच्च प्रकृते न सम्भवति। व्यतिरेकव्याप्तिर्नाम साध्याभावहेत्वभावयोर्व्याप्तिः। पक्षधर्मता तु अन्वयस्य हेतोरेव। तर्हि व्याप्तिविशिष्टपक्षधर्मत्वं हेतौ न सम्भवति। व्याप्तिस्तु साध्याभावे, पक्षधर्मता तु हेतौ। अस्तु व्याप्तिपक्षधर्मता साध्याभावव्यापकीभूताभावप्रतियोगित्वमुभयमप्यनुमितिप्रयोजकमिति चेन्न - अननुगमात्, अर्थात् अनुमितिं प्रति कारणत्वद्वयस्वीकारे व्यतिरेकव्यभिचारादिति भावः। एवमन्यतरत्त्वेनापि कारणत्वं वक्तुं न शक्यते। तथा सति उक्तरीत्या चतुर्णामपि प्रमाणानामन्यतमत्वेन कारणत्वसम्भवात् एकप्रमाणपरिशेषापत्तिः। एवमपि तृणारणिमणिन्यायेनानुमितिविशेषे तद्धेतुत्वमिति वक्तुं न शक्यते। तथा सति व्यतिरेकव्याप्तिज्ञानजन्यानुमितेः अनुमितित्वासिद्धेः। उभयमतसाधारणकारणस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य तत्राभावात्। न च साध्याभावव्यापकीभूताभावप्रतियोगित्वमेवानुमितिप्रयोजकं भवतु इति वाच्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

तस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानापेक्षया अभावद्वयघटितत्वेन गौरवात्। एवं केवलान्वयिसाध्यकस्थले अनुमितेरेवासिद्धेः। तत्र साध्याभावस्यैव अप्रसिद्धेः।

अथ केवलव्यतिरेकिणि साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपहेतुना साध्यव्याप्यत्वमनुमीयते। तथा हि अनुमानं - हेतुः साध्यव्याप्यः साध्याभावव्यापकीभूताभावप्रतियोगित्वात् अन्वयव्यतिरेकिहेतुवदिति। एवं व्यतिरेकव्याप्त्या साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपया अन्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते तथा चान्वयव्यतिरेकतो भेदः केवलव्यतिरेकिण इति चेन्न। यद्यन्वयव्याप्तेर्व्यतिरेकिण्यपि गमकतोच्यते तदा व्यतिरेकव्याप्त्युपन्यासे अर्थान्तरत्वापत्तिः स्यात्। प्रकृतानुपयुक्तस्योक्तिः अर्थान्तरम्। प्रकृते हेतुवाक्यप्रयोगानन्तरं गमकतौपायिकजिज्ञासायाम् अन्वव्याप्तेरेवोपयुक्तत्वात्। ननु अन्वयव्याप्त्यनुकूला व्यतिरेकव्याप्तिर्भवति। व्यतिरेकव्याप्त्याऽन्वयव्याप्तिरनुमीयते इति कृत्वा अन्वयव्याप्त्यनुकूलता व्यतिरेकव्याप्तेर्भवतीति चेन्न। तथा सति अप्राप्तकालता स्यात्। अनाकाङ्क्षिताभिधानमप्राप्तकालता। प्रकृते वाऽऽकाङ्क्षा अन्वयव्याप्तेः, तदनुक्त्वा व्यतिरेकव्याप्तेः कथनम् अप्राप्तकालतामावहति इति। अतः व्यतिरेकव्याप्तिः कथञ्चिदपि न सम्भवतीति पूर्वपक्षः प्रवर्तते।

तत्र उदयनाचार्य मतमाह मणिकारः - उच्यते। निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते, प्रतियोग्यनुयोगिभावस्य नियामकत्वात् अन्वयव्यतिरेकिवत् इति। अत्र निरुपाधिपदेन उपाधिज्ञानाहितव्यभिचारज्ञानाभावः प्रदर्शितः। तथा च व्यभिचारज्ञानाभावसहितव्यतिरेकसहचारज्ञानादन्वयव्याप्तिरेव गृह्यते। अभावयोः सहचारेण भावयोरेव व्याप्तिर्गृह्यते इति प्रतियोग्यनुयोगिभावस्य नियामकत्वादित्यनेन सूचितम्। अत्र एवकारेण नियतसाहचर्यरूपव्याप्तिः प्रदर्शिता। तेन पूर्वोक्तार्थान्तरत्वं न भवति। नियतसहचाररूपा या व्यतिरेकव्याप्तिः तस्याः अन्वयव्याप्तिज्ञानार्थमेवोपन्यासः। तथा च अर्थान्तरता न भवति, व्यतिरेकव्याप्तिज्ञानस्यान्वयव्याप्तिज्ञाने उपयुक्तत्वात्। वस्तुतस्तु अवयव्याप्तिघटकतावत्पदार्थोपस्थित्यादिकं विना अन्वयव्याप्तिज्ञानं न सम्भवति, तत्सत्त्वे तत एव अन्वयव्याप्तिज्ञानसम्भवे व्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभावः। अतः एतद्दोषं मनसि निधाय मणिकारः यद्वा कल्पमनुसरति।

यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्यगमकभावः। साध्याभावव्यापकसाधनाभावाभावेन साधनेन पक्षे साध्याभावाभावस्य साध्यस्य साधनात्। व्यापकाभावेन व्याप्यभावावश्यम्भावात् इति। तथा च साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तेः स्वरूपमिति लभ्यते। पृथिवी इतरभिन्ना पृथिवीत्वादित्यत्र साध्याभावः इतरभेदाभावः यत्र तत्र पृथिवीत्वाभावः, तस्य पृथिवीत्वाभावस्याभावेन पृथिवीत्वेन पक्षे पृथिव्याम् इतरभेदाभावरूपेतरभेदस्यानुमितिः भवतीत्यर्थः। नन्वेवमपि इच्छावानात्मत्वात् इति व्यतिरेकिण्यव्याप्तिः, इच्छायाः अव्याप्यवृत्तित्वात् तदभावस्यात्मनि सत्वात्तत्रात्मत्वाभावस्यासत्त्वात्।

In Public domain. Digitization Muthulakshmi Research Academy

एवम् आत्मा संयोगादित्यत्र व्यभिचारिणि अतिव्याप्तिः। संयोगाभावस्य केवलान्वयितया साध्याभावव्यापकत्वाक्षतेः। अतः साध्यतावच्छेदकावच्छिन्नसाध्यासमानाधिकरणत्वेन साध्याभावः, साधनतावच्छेदकावच्छिन्नसाधनासमानाधिकरणत्वेन च साधनाभावश्च विशेषणीयौ। तेन न पूर्वोक्ताव्याप्त्यतिव्याप्ती।

ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादिति व्यतिरेकिणि साध्यमप्रसिद्धं यदि तदा अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् साध्याप्रसिद्धौ तदभावघटितव्यतिरेकव्याप्तिग्रहः न सम्भवति। एवमितरभेदः यदि न प्रसिद्धः तदा पृथिवी इतरभेदवती न वेति संशयो न स्यात्। तथा च साध्यसंशयरूपपक्षता अनुमितिकारणीभूता न स्यात्, तेन अनुमित्यप्रसिद्धिः। एवञ्च लिङ्गज्ञानजन्यं यत् साध्यविशिष्टज्ञानं अनुमितिरूपं, तन्न सम्भवति। विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वात्, व्याप्तिज्ञाने साध्यस्य विशेषणस्याभाने अनुमितावपि तस्य भानं न स्यात्। किञ्च साध्यं यदि प्रसिद्धं तत्र हेतोरवगमे अन्वयित्वम्। निश्चितसाध्यसाधनोभयवत्वमेवान्वयित्वमिच्युत्यते। यदि तत्र हेतुः न गृह्यते तर्हि निश्चितसाध्यतदभाववद्व्यावृत्तत्वरूपासाधारण्यापत्तिः। अपि च भेदस्त्रिविधः - स्वरूपं, वैधर्म्यम्, अन्योन्याभावश्चेति। तत्र इतरभेद इत्यनेन स्वरूपमुच्यते तर्हि तदनुयोगिस्वरूपं प्रतियोगिस्वरूपं वा वाच्यम्। प्रकृते पृथिवी अनुयोगि, जलं प्रतियोगि, उभयस्यापि पूर्वं सिद्धत्वात् सिद्धसाधनम्। नापि वैधर्म्यं, तच्च जलादिनिष्ठात्यन्ताभावप्रतियोगित्वं, तद्धि पृथिवीत्वादिकं, तच्च सिद्धमेव। न च जलादिनिष्ठात्यन्ताभावप्रतियोगित्वेन पृथिवीत्वं न सिद्धमिति वाच्यम्। जलादौ पृथिवीत्वात्यन्ताभावग्रहदशायां पृथिवीत्वेऽपि तुल्यवित्तिवेद्यतया तत्प्रतियोगित्वग्रहात्सिद्धसाधनं तदवस्थमेव। अस्तु अन्योन्याभावरूपभेदः स्वीक्रियते। तस्य पूर्वमसिद्धत्वान्न सिद्धसाधनमिति चेन्न। तत्र किं जलादिप्रत्येकान्योन्याभावः साध्यः उत जलादित्रयोदशत्वावच्छिन्नप्रतियोगिताकभेदः। उभयमपि न, प्रत्येकान्योन्याभावकथने जलभेदवति तेजसि पृथिवीत्वस्याभावादसाधारण्यम्। त्रोयदशत्वावच्छिन्नप्रतियोगिताकभेदस्य कथने तस्यानुमितेः प्राक् कुत्राप्यसत्त्वेन अप्रसिद्धिः। तथा च पृथिवी इतरेभ्यो भिद्यते इत्यत्र कथञ्चिदपि अनुमानं न सम्भवतीति पूर्वपक्षः।

एवं पूर्वपक्षे कृते मणिकारः सिद्धान्तमाह - उच्यते, घटादावेवेतरसकलभेदस्य प्रत्यक्षतः प्रसिद्धिः घटो न जलादिरिति प्रतीतेः इति। तथा च घटादेरेव साध्यप्रसिद्धिः सम्भवति अतः साध्यविशिष्टानुमितिः भवत्येव। ननु घटादौ कथं त्रयोदशाभावानां प्रत्यक्षेण ग्रहणं सम्भवति। आकाशकालादिभेदानाम् अतीन्द्रियप्रतियोगिकत्वात्, अयोग्यधर्मानवच्छिन्नयोग्यमात्रवृत्तिप्रतियोगिताकत्वम् अभावप्रत्यक्षे तन्त्रमिति चेन्न यो ह्यनुलम्भोऽधिकरणे प्रतियोगिमत्त्वविरोधी सोऽभावं ग्राहयति, न तु योग्यानुलब्धिमात्रम्, अन्यथा वायौ रूपाभावप्रतीतिवज्जलपरमाणौ पृथिवीत्वाभावग्रहप्रसङ्गात् इति। तथा च अत्यन्ताभावप्रत्यक्षे एव प्रतियोगिनः योग्यता अपेक्षिता अन्योन्याभावप्रत्यक्षे तु अधिकरणे योग्यता अपेक्षितेति

In Public domain. Digitization Muthulakshmi Research Academy

तात्पर्येणोक्तम्। तथा चाधिकरणेषु मध्ये निरुक्तनिश्चयाभावविशिष्टो यो देशः प्रतियोगिमत्त्वविरोधी प्रतियोगितावच्छेदकसम्बन्धसंसर्गकाधिकरणत्वसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि-मत्तयाऽऽपादितसाक्षात्कारकः, सः देशः अभावं ग्राहयति, अतीन्द्रियप्रतियोगिकस्याप्यभावस्य लौकिक-प्रत्यक्षविषयत्वं सम्भवति इति भावः। ननु घटस्यापि पक्षत्वात्तत्र साध्यसिद्धौ सिद्धसाधनमिति चेन्न। पृथिवीत्वावच्छेदेनैव साध्यानुमितिरुद्देश्या अत्र, तथा च अवच्छेदकावच्छेदनानुमितौ सामानाधिकरण्य-सिद्धेः अप्रतिबन्धकत्वात् न कोपि दोषः। ननु प्रकृते हेतोरेव पक्षतावच्छेदकतया घटे पृथिवीत्वग्रहदशायां इतरभेदरूपसाध्यस्य सामानाधिकरण्यग्रहसम्भवात् अन्वयव्याप्त्यैवानुमितिनिर्वाहो भवति किं व्यतिरेक-व्याप्त्येति चेत् - सत्यम् ,तथापि अन्वयव्याप्तिवत् व्यतिरेकव्याप्तेरपि अनुमितिजननसामर्थ्यसम्भवात्। एवमन्वयव्याप्त्यपतिसन्धानदशायां साध्यसाधनोभयसामानाधिकरण्यग्रहाभावदशायां व्यतिरेकव्याप्ति-ज्ञानादनुमितेरनुभवसिद्धत्वाद्व्यरेकव्याप्तेरप्यावश्यकत्वात्। तदेवोक्तं मणिकारैः - आस्तां तावदयं सुहृदुपदेशः केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम् इति।

एवं प्रकारान्तरेण तत्रानुमितिमुपपादयति - अथवा जलादीनां त्रयोदशान्योन्याभावाः त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते इति। जलभेदादयः प्रत्येकं तेजः प्रभृतिषु प्रसिद्धाः तेषां कूटः पृथिव्यां साध्यते। तादृशत्रयोदशभेदकूटस्य पक्षातिरिक्ते कुत्राप्यसत्त्वेन अन्वयित्वासाधारण्यापत्ती न भवतः। एवं त्रयोदशभेदप्रतियोगिनः सर्वे अपि प्रसिद्धाः इति न अभावाप्रसिद्धोऽपि। तथा च अत्र व्यतिरेक-व्याप्त्यैवानुमितिनिर्वाहो भवतीति केवलव्यतिरेक्यनुमानसिद्धिः। तथा हि पृथिवी इतरेभ्यो भिद्यते पृथिवात्वादित्यत्र साध्याभावस्य इतरस्य जलादेर्व्यापकः पृथिवीत्वाभावो गृहीत इति पृथिवीत्वाभावा-भावरूपेण पृथिवीत्वेन पृथिव्यामित्यन्योन्याभावः पूर्वमप्रसिद्ध एव सिध्यति।

ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञानं विशेषणज्ञानजन्यत्वाद्विशिष्टज्ञानस्येति चेन्न। पक्षे साध्यानुमितिसामग्रीसत्त्वात् पक्षविशेषणकः साध्यविशेष्यक एव प्रत्ययो जायते भूतले घटो नास्तीत्य-भावविशेष्यकप्रत्ययवदिति मूलम्। तथा च पक्षे साध्याभावव्यापकीभूताभावप्रतियोगी हेतुः इति परामर्शात् पक्षे साध्यः अर्थात् पृथिव्याम् इतरभेदः इति साध्यविशेष्यकानुमितिरेव तत्र जायते। तथा च विशिष्टज्ञानं प्रति विशेषणज्ञानस्यैव कारणत्वं न तु विशेष्यज्ञानस्येति भावः। ननु तथापि साध्याभावव्यापकाभावप्रति-योगिहेतुमत्तया पक्षज्ञानं व्यतिरेकिणि गमकतौपयिकम्। तत्तु साध्यप्रसिद्धिं विना न सम्भवतीति चेन्न। योऽभावो यस्य भावस्य व्यापकत्वेन गृहीतः तदभावाभावेन तस्य व्याप्यस्याभावः पक्षे साध्यते इत्यनुगताननतिप्रसक्तस्य गमकतौपयिकत्वात् इति मणिः। तथा च पृथिव्यां इतरभेदः इत्यत्र इतरभेदा-भावरूपसाध्याभावस्य इतररूपभावात्मकतया इतरत्वव्यापकाभावप्रतियोगित्वस्यैव पृथिवीत्वे ग्रहात्

In Public domain. Digitization Muthulakshmi Research Academy

न तत्र साध्यप्रसिद्ध्यपेक्षा। इदमेव मनसि निधाय पक्षतागन्थे दीधितिकारः आह अत एव प्रसिद्धाध्यक-स्थले पक्षविशेष्यकैवानुमितिरनुभूयते इति। तत्र भट्टाचार्यैः प्रसिद्धसाध्यकस्थले इत्यस्य अभावरूप-साध्यप्रसिद्धिस्थले न तु भावसाध्यकस्थले इत्यर्थः तत्र परामर्शस्य नियमतः साध्यघटितव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिद्ध्या साध्यप्रसिद्धिप्रतिबन्धकतायाः कल्पयितुमशक्यत्वादिति व्याख्यातम्। अनेन ज्ञायते यत् अभावरूपसाध्यस्य यत्र प्रसिद्धिर्नास्ति तत्रैव केवलव्यतिरेक्यनुमानं प्रवर्तते। भाव-साध्यकस्थले कुत्रापि तन्न सम्भवतीति। एवमयं व्यतिरेकिप्रकारः स्वार्थ एव, परार्थस्थले नास्ति। साध्यस्याप्रसिद्ध्या साध्यवत्तयापक्षवचनरूपप्रतिज्ञायाः तत्र असम्भवादिति सर्वं समञ्जसम्।

In Public domain. Digitization Muthulakshmi Research Academy

योग्यताज्ञानस्य शाब्दबोधहेतुत्वम्

डा. ओ.जि.पि.कल्याणशास्त्री

इह खलु लौकिकाः परीक्षकाश्च बुभुत्सितं श्रोतृपुरुषानवगतमर्थं बोधयितुमिच्छन्तः वाक्यं उच्चारयन्ति, प्रतिपत्तुमिष्टं च प्रमेयम् । एवं लोकयात्रां निर्वहति शब्दः । अत एव शब्दः सर्वार्थप्रकाशकं ज्योतिः इत्याह दण्डी -

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।[१] इति।

भर्तृहरिरपि- 'अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्'[२] इत्याह।

'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'[३] इति गोतमीयन्यायसूत्रेण ज्ञायते यत् चत्वारि प्रमाणानि अङ्गीकृतानि न्यायविद्यायाम्। तत्र शाब्दरूपविलक्षणप्रमाजनकत्वेन शब्दप्रमाणस्य सिद्धिर्भवति। तत्र वाक्यात्मकशब्दजन्यो बोधः शाब्दबोध इत्युच्यते। शाब्दबोधजनिका सामग्री का? इत्यस्मिन् सन्दर्भे विश्वनाथपञ्चाननेन इत्थमुक्तं कारिकावल्याम् -

पदज्ञानं तु करणं, द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं, तत्र शक्तिधीः सहकारिणी।। इति।

आदौ पदज्ञानं ततः पदार्थस्मरणम् ततः शाब्दबोधरूपं फलम्। पदजन्यपदार्थोपस्थितौ च शक्तिज्ञानस्योपयोगः। शक्तिधीश्च क्वचित् 'अस्मात्पदादयमर्थो बोद्धव्यः' इति पदप्रकारकार्थविशेष्यकेश्वरेच्छात्मिका। एतावता शाब्दसामान्यं प्रति वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिद्वारा पदज्ञानस्य कारणत्वम् इत्यायातम्।

एवमपि 'गिरिर्भुक्तमग्निमान् देवदत्तेन', 'वह्निना सिञ्चति', 'घटः कर्मत्वमानयनं कृतिः'[४] इत्यादौ वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिद्वारा पदज्ञानात्मकस्य कारणस्य सत्त्वेऽपि शाब्दबोधात्मकस्य फलस्यानुदयात् अन्वयव्यभिचारः स्यात्। अतः आसक्तियोग्यताकाङ्क्षातात्पर्यज्ञानानां सहकारिकारणता कल्पनीया। अत एव मणिकारेण शब्दप्रामाण्यसमर्थनवादान्ते 'तस्य निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वात् आकाङ्क्षादिकं सहकारि'[५] इत्युक्तम्। अनेन आकाङ्क्षायाः सहकारित्वं ज्ञायते, आदिपदेन योग्यतया अपि परिग्रहः।

सहाचार्यः, शाब्दबोधविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

मणिग्रन्थे योग्यताविचारः

योग्यतापूर्वपक्षवादे मणिकारेण बहवः पक्षाः उक्ताः खण्डिताश्च। तेषु केचनपक्षाः अत्र कथ्यन्ते-

१. सजातीयेऽन्वयदर्शनम्।[६]

२. अनन्वयनिश्चयविरहः।[७]

३. समभिव्याहृतपदार्थसंसर्गाभावव्याप्यधर्मशून्यत्वम्।[८]

४. बाधकप्रमाणभावः।[९]

५. इतरपदार्थसंसर्गाभावप्रमाविषयत्वाभावोऽपरपदार्थे।[१०]

६. बोधनीयसंसर्गाभावप्रमाविरहः।[११]

मणिग्रन्थे सिद्धान्तः

"बाधकप्रमाविरहो योग्यता। बाधकप्रमाविरहश्च इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावः।"[१२] 'जलेन सिञ्चति' इत्यादौ जलनिष्ठकरणतायाः निरूपकत्वसंसर्गे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावोऽस्ति, 'जलनिष्ठकरणतानिरूपकत्वं सेकनिष्ठात्यन्ताभावप्रतियोगि' इत्याकारकप्रमायाः असत्वात् इति तत्र समन्वयः।

'वह्निना सिञ्चति' इत्यत्र तु 'वह्निनिष्ठकरणतानिरूपकत्वं सेकनिष्ठात्यन्ताभावप्रतियोगि' इत्याकारकप्रमायाः विद्यमानत्वेन वह्निनिष्ठकरणतानिरूपकत्वसंसर्गे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वस्यैव सत्वात्, तादृशविशेष्यत्वाभावस्य असत्वात् न तत्र योग्यता। सर्वत्र शाब्दबोधात्पूर्वं तादृशप्रतियोगित्वप्रमात्वावच्छिन्नस्योपस्थितिः नियमेन न संभवति इत्यालोच्य लक्षणान्तरमुक्तं मणौ - 'वस्तुतस्तु इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदक धर्मशून्यत्वं योग्यता, लाघवात् शक्त्यज्ञानत्वाच्च।'[१३]

'जलेन सिञ्चति' इत्यत्र जलनिष्ठकरणतानिरूपकत्वे सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वमस्तीति तत्र समन्वयः। 'वह्निना सिञ्चति' इत्यत्र तु वह्निनिष्ठकरणतानिरूपकत्वे सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मस्यैव सत्वात् न तत्र योग्यता।

मुक्तावल्यां योग्यताविचारः

'आसत्तियोग्यताऽऽकाङ्क्षातात्पर्यज्ञानमिष्यते'[१४] इति कारिकया आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानानां चतुर्णां शाब्दबोधं प्रति सहकारिकारणत्वमुक्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

'सन्निधानं तु पदस्यासत्तिरुच्यते'[१५] इत्यनेन आसक्तिपदार्थं निरूप्य क्रमप्राप्तं योग्यतामित्थं निरूपयति - 'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता'[१६] इति। निरुक्तकारिकया 'स्वस्मिन् स्ववत्त्वं योग्यता' इति साक्षादर्थः लभ्यते, परन्तु तस्यानुपयोगात् व्याख्यायां - 'एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः'[१७] इति स्पष्टीकृतम्।

योग्यताज्ञानस्य अवश्यं शाब्दबोधं प्रति कारणत्वं स्वीकार्यम् , अत एव 'वह्निना सिञ्चति' इत्यत्र सेचने वह्निकरणकत्वस्य योग्यत्वस्य अभावान्न शाब्दबोधः। योग्यताज्ञानस्य अकारणत्वे तु 'वह्निकरणकसेचनानुकूलकृतिमान्' इति शाब्दबोधापत्तिः, योग्यताज्ञानातिरिक्तसकलसामग्रीसत्वात्। एतस्याः योग्यतायाः ज्ञानं शाब्दबोधात्प्राक् सर्वत्र भवितुं नार्हति, वाक्यर्थस्यापूर्वत्वात् इति तु न मन्तव्यम्। योग्यताज्ञानस्य संशयनिश्चयसाधारणरूपेण योग्यताज्ञानत्वेन कारणत्वमुच्यते, अतः तत्तत्पदविषयकवृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थविषयकस्मरणे जायमाने सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्भवात् न क्षतिः। "नीलो घटः द्रव्यं पटः" इत्यादौ 'प्रथमान्त-घटपदार्थे प्रथमान्तनीलपदार्थान्वयो न वा' इति संशयात्मकयोग्यताज्ञानं, 'घटमानय' इत्यादौ च लोडन्ताऽऽनयनपदार्थे द्वितीयान्तघटपदार्थान्वयस्य निरूपितत्वस्य निश्चयात्मकयोग्यताज्ञानं दृष्टान्त-विधयाऽत्र ज्ञेयम्।

नव्यास्तु - योग्यताज्ञानस्य शाब्दबोधहेतुत्वं न स्वीकुर्वन्ति, तर्हि 'वह्निना सिञ्चती'त्यत्र 'वह्निकरणकसेचनानुकूलकृतिमान्' इत्याकारकबोधापत्तिः इति तु नाशङ्क्यम्। तत्र सेके वह्निकरण-कत्वाभावरूपायोग्यतानिश्चयस्य सत्वेन, तादृशायोग्यतानिश्चयस्य शाब्दबोधं प्रति प्रतिबन्धकत्वं कल्प्यते, एवं च योग्यताज्ञानस्य शाब्दबोधं प्रति न कारणत्वं, किन्तु अयोग्यतानिश्चयस्य शाब्दबोधं प्रति प्रतिबन्धकत्वं, प्रतिबन्धकाभावविधया अयोग्यतानिश्चयाभावस्य कारणत्वम्।

नवीनाः स्वमते लाघवम् इत्थं प्रतिपादयन्ति - हेत्वाभासप्रकरणे रत्नकोशकारमतनिरूपणाऽ-वसरे लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतद्वत्ताबुद्धिमात्रं प्रति अनाहार्याऽप्रामाण्यज्ञानाऽ-नास्कन्दिततद्धर्मिकतदभाववत्तानिश्चयस्य प्रतिबन्धकत्वं लाघवात् सिद्धान्तितम्। उक्तं च तत् - 'तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषात् शाब्दबोधादेरनुदयाल्लौकिकसन्निकर्षाजन्यदोष-विशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता लाघवात्'[१८] एवं 'तद्धर्मिकतदभावनिश्चयो लौकिकसन्निकर्षा-जन्यतद्धर्मिक तज्ज्ञानमात्रे विरोधीति।'[१९] इत्थं च 'वह्निकरणकसेकानुकूलकृतिमान्' इति शाब्द-बोधस्य लौकिकसन्निकर्षाजन्यत्वात् दोषविशेषाजन्यत्वात् 'वह्निकरणकसेकानुकूलकृतिमानि'ति शाब्दबोधस्य लौकिकसन्निकर्षाजन्यत्वाद्दोषविशेषाजन्यत्वात् सेकधर्मिकवह्निकरणकत्वान्वयप्रकारक-

In Public domain. Digitization Muthulakshmi Research Academy

शाब्दबोधात्मकज्ञानं प्रति अनाहार्यस्याऽप्रामाण्यज्ञानानास्कन्दितस्य 'सेकः वह्निकरणकत्वान्वयाऽभावान्' इत्याकारकायोग्यतयानिश्चयस्य बाधनिश्चयविधया प्रतिबन्धकत्वं सिध्यति, अतः तेनैव शाब्दबोधापत्तिवारणसम्भवे योग्यताज्ञानस्य अतिरिक्तकारणत्वकल्पनम् अनुचितम्। अयोग्यतानिश्चयाभावस्तु प्रतिबन्धकाभावविधया स्वाभावतः एव कारणं भवतीति न तत्र कल्पनाधिक्यम्।

न च योग्यताज्ञानस्य कारणत्वमवश्यं स्वीकार्यम्, अन्यथा यत्र न बाधनिश्चयः, न वा योग्यताज्ञानं तत्र बाधनिश्चयाभावसत्वात् शाब्दबोधापत्तिः, अतः योग्यताज्ञानं कारणम्, अयोग्यतानिश्चयस्य शाब्दबोधप्रयोजकत्वं च वक्तव्यमिति वाच्यम्। योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्धः इत्याहुः।[२०] तर्हि पूर्वोक्तस्थले शाब्दबोधापत्तिः इति चेत् - इष्टापत्तिः। यत्र यथार्थबाधनिश्चयः तत्रैव शाब्दबोधाभावः, यत्र तु बाधनिश्चयभ्रमः तत्स्थले यावत्पर्यन्तं भ्रमः तावत्पर्यन्तं शाब्दबोधस्य विलम्बः, भ्रमनाशे सति प्रमात्मकशाब्दबोधः।

दिनकरीये लाघवगौरवविचारः

दिनकरीये तु अयोग्यतानिश्चयस्य प्रतिबन्धकत्वपक्षं खण्डयित्वा योग्यताज्ञानस्य कारणत्वपक्ष एव व्यवस्थापितः दिनकरभट्टैः। 'आहुरित्यनेन अस्वरसः सूचितः, तद्बीजं तु'[२१] इत्यादिना ते योग्यताज्ञानस्य कारणत्वस्वीकार एवोचितः इति व्यवस्थापितवन्तः। यद्वस्तुविशेषविषयकम् अनुमित्यादिकं न जातं, शाब्दबोध एव जातः, तत्र अयोग्यतानिश्चयाभावत्वेन शाब्दबोधं प्रति कारणत्वकल्पनापेक्षया लघुभूतयोग्यताज्ञानत्वेन कारणत्वकल्पनमुचितम्। इत्थं च स्थलविशेषे योग्यताज्ञानस्यैव कारणत्वस्वीकारात् 'यद्विशेषयोः कार्यकारणभावः असतिबाधके तत्सामान्ययोरपि' इति नियमेन शाब्दसामान्ये योग्यताज्ञानस्य कारणत्वस्वीकारः उचितः। एवं लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयः प्रतिबन्धकः इति सामान्यतया वक्तुं न शक्यते। 'भूतलं घटाभाववत्' इत्याकारकबाधनिश्चयोत्तरमपि 'घटप्रकारकभूतलविशेष्यकचाक्षुषं मे जायताम्' इतीच्छाबलात् 'भूतलं घटवत्' इति प्रत्यक्षोत्पत्या व्यभिचारप्रसक्तेः। अतः प्रतिबन्धकतावच्छेदककोटौ अवश्यं तत्तदिच्छाविरहवैशिष्ट्यस्य निवेशनीयतया, पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावः विशेषे पर्यवस्यति, अर्थात् प्रत्यक्षानुमित्यादि स्थलेषु विशिष्यैव प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः। इत्थं च 'वह्निना सिञ्चन्ति' इत्यत्र शाब्दबोधवारणाय अयोग्यतानिश्चयस्य अतिरिक्तप्रतिबन्धकत्वस्यैव कल्पनीयतया, तदपेक्षया योग्यताज्ञानस्य कारणत्वकल्पनमेवोचितम्। न च योग्यताज्ञानस्य कारणत्वे कारणतावच्छेदककोटौ अप्रामाण्यनिश्चयाभावः निवेशनीयः। अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तु अप्रामाण्य-

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानाभाव एव निवेशनीयः, अतः अवच्छेदककोटौ निश्चयत्वाप्रवेशप्रयुक्तलाघवात् अयोग्यतानिश्चयस्य प्रतिबन्धकत्वपक्ष एव ज्यायान्।

अयं भावः संशयनिश्चयसाधारणज्ञानं यत्र कारणं, तत्राप्रामाण्यसंशयः न कारणताविघटकः, ज्ञानेऽप्रामाण्यसंदेहस्य विषये सन्देहजननात्।[२२] यथा 'पर्वतो वह्निमानि'ति ज्ञानानन्तरं 'पूर्वोत्पन्नं ज्ञानम् अप्रमा न वे'त्याकारकाप्रामाण्यसन्देहस्य 'पर्वतो वह्निमान् न वे'त्याकारकवह्निविषय-सन्देहजनकत्वम्। तस्मात् अप्रामाण्यसन्देहस्य कारणताऽविघटकत्वेन कारणताविघटकस्य अप्रामाण्य-निश्चयस्याभाव एव कारणतावच्छेदककोटौ निवेश्यः। अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तु अप्रामाण्य-संशयस्यापि प्रतिबन्धकताविघटकत्वेनाप्रामाण्यज्ञानाभावमात्रस्यैव निवेशनीयतया अवच्छेदककोटौ संशयान्यत्वविशिष्टज्ञानत्वरूपनिश्चयत्वांशानिवेशप्रयुक्तलाघवस्य सत्त्वेनायोग्यतानिश्चयस्य प्रति-बन्धकत्वपक्ष एव युक्त इति वाच्यम्।

योग्यताज्ञानस्य कारणत्वे 'तदभाववति तत्प्रकारकमि'त्येकविधाप्रामाण्यग्रहाभाव एव निवेश्यते, अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तु तदभाववति तत्प्रकारकं, तद्वति तदभावप्रकारकं प्रतियोगिता-सम्बन्धावच्छिन्नप्रतियोगिताकतदभाववत्यभावे प्रतियोगितासम्बन्धेन तत्प्रकारकमिति त्रिविधा-प्रामाण्यज्ञानानां निवेशनीयतया तन्मते गौरवाधिक्यात्। 'घटवत् भूतलमि'ति शाब्धबोधे घटप्रकारक-भूतलविशेष्यकज्ञानं कारणम्। तत्र च अप्रामाण्यज्ञानं 'घटाभाववति घटप्रकारकम्' इत्येकविधमेव। 'भूतलं घटाभाववत्' इति निश्चये अप्रामाण्यज्ञानं त्रिविधं वक्तुं शक्यम्। 'घटाभावाभाववति घटाभाव-प्रकारकं', 'घटवति घटाभावप्रकारकं' 'प्रतियोगितया घटाभाववत्यभावे प्रतियोगितया घटप्रकारकम्'। एवमयोग्यतानिश्चयस्य बाधविधया प्रतिबन्धकत्ववादिना तदभावव्याप्यतदभावावच्छेदकतागृहीतधर्म-वत्तानिश्चययोरपि शाब्दबोधं प्रति प्रतिबन्धकत्वं कल्पनीयम्, 'तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयस्येव तदभावव्याप्यवत्तानिश्चयस्य, एवं तदभावावच्छेदकतया गृहीतो यो धर्मः तन्निश्चयस्य प्रतिबन्धकत्वम्' इत्यनुभवात्। योग्यताज्ञानस्य कारणत्वे तु तादृशान्यतमनिश्चयसत्त्वदशायां कारणस्य योग्यताज्ञानस्य कथमपि भवितुमशक्यत्वात् अतिरिक्तप्रतिबन्धकत्वाकल्पनाप्रयुक्तलाघवम्।

एवमयोग्यतानिश्चयस्य प्रतिबन्धकत्वे 'घटवद्भूतलम्' इत्यादिशाब्दसामग्र्यां सत्यां 'एकपदार्थेऽ-परपदार्थ प्रकारकज्ञाना ावववानहम्' (योग्यताज्ञानाभाववानहमिति यावत्) इति मानसप्रत्यक्षवारणाय शाब्दसामग्र्याः बलवत्त्याः प्रतिबन्धकत्वं कल्पनीयम्, योग्यताज्ञानस्य कारणत्वपक्षे तु न तथा, शाब्दसामग्रीकारणीभूतयोग्यताज्ञानस्य विद्यमानत्वे 'योग्यताज्ञानाभाववानहम्' इति मानसप्रत्यक्षस्य प्रसक्तिरेव नास्ति। योग्यताज्ञानस्य सत्त्वे योग्यताज्ञानाभावस्यासत्त्वेन विषयाभावादेव तादृशमानस-

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षस्य वारणं सम्भवतीति शाब्दसामग्र्याः तत्र प्रतिबन्धकत्वकल्पनमनपेक्षितमेव। तस्मात् योग्यताज्ञानस्य कारणतास्वीकार एव समुचितः।

निबन्धान्तटिप्पण्यः

१. का.आ.१.४ २. वा.प.१.१३ ३. न्या.सू.३
४. कारि.८१ ५. त.चि.माथुरी, पृ.१८१. ६. तत्रैव, पृ.२४५
७. तत्रैव, पृ.२५० ८. तत्रैव, पृ.२५२ ९. तत्रैव, पृ.२५४
१०. तत्रैव, पृ.२५६ ११. तत्रैव, पृ.२५७ १२. तत्रैव, पृ.२६२
१३. तत्रैव, पृ.२७१ १४. कारि.८२ १५. तत्रैव.८३
१६. तत्रैव, ८३ १७. न्या.सि.मु.पृ.३४६ १८. तत्रैव, पृ.२६७
१९. तत्रैव, पृ.२७२ २०. तत्रैव, पृ.३४७ २१. न्या.सि.मु.दिनकरी, पृ.४२१
२२. सव्यभिचारप्रकरणे व्याप्यसंशयस्य व्यापकसंशयकारणत्वग्रन्थः द्रष्टव्यः।

सन्दर्भग्रन्थसूची

१. कारिकावली (न्यायसिद्धान्तमुक्तावलीसंवलिता दिनकरी-रामरुद्रीव्याख्याभ्यां च)- व्याख्याकारः - आत्मराम नारायण जेरे, चौखम्बा कृष्णदास अकादमी, वाराणसी.

२. काव्यादर्शः - दण्डिप्रणीतः, रङ्गाचार्यविरचितप्रभाव्याख्योपेतः, भण्डाकर् प्राच्यविद्यासंशोधनालयः, पुणे, १९३८.

३. तत्त्वचिन्तामणौ (श्रीमद्गङ्गेशोपाध्यायविरचितं) शब्दखण्डम् - श्रीमथुरानाथतर्कवागीशकृत- रहस्यनाम-कटीकासहितम्, चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली।

४. न्यायसिद्धान्तमुक्तावली (श्रीविश्वनाथपञ्चाननभट्टाचार्यप्रणीता)- व्याख्याकारः - श्रीकृष्णवल्लभाचार्यः, चौखम्बा संस्कृतसंस्थान, वाराणसी ।

५. न्यायसूत्रम् - महर्षिगौतमप्रणीतम्।

६. वाक्यपदीयम् - भर्तृहरिकृतम्, सरस्वतीभवनग्रन्थमाला सं. ९१, सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी।

७. सव्यभिचारप्रकरणम् (मणि-दीधिति-गादाधरी-विवृति-मनोरमा सहिता), मास्टर्, खेलाडीलाल एण्ड सन्स, काशी.

In Public domain. Digitization Muthulakshmi Research Academy

शब्दोपमानयोः प्रमाणान्तरत्वविमर्शः

डा. ई.यम्.देवन्

'मानाधीना मेयसिद्धिः' इत्यभियुक्तिः सर्वेषां सुविदितैव। मानं च प्रमाणम्। प्रमीयते अनेनेति प्रमाणमित्येवं प्रमाणशब्दस्य व्युत्पत्तिः। प्रमाकरणत्वं प्रमाणत्वम्, अज्ञातार्थज्ञापकत्वं प्रमाणत्वमित्येवं प्रमाणत्वस्वरूपं शास्त्रकाराः बहुधा वदन्ति। एवमेव केचन एकमेव प्रमाणं स्वीकुर्वन्ति, केचन द्वयं, केचन त्रितयमित्येवं रीत्या विषयेऽस्मिन् सन्ति शास्त्रकृतां विप्रतिपत्तयः। स्वीयशास्त्रे स्वीकृतानां प्रमाणानां प्रमाणत्वम्, एवमितरेषां प्रमाणान्तरत्वनिरासश्च तत्तच्छास्त्रग्रन्थेषु विस्तृतरूपेण प्रतिपादितमस्ति। तत्र वैशेषिकोक्तदिशा शब्दोपमानयोः प्रमाणान्तरत्वनिरासः तत्र नैयायिकानामभिप्रायश्च यथामति अत्र प्रस्तूयते।

तत्रादौ [१]भाष्यकारणामभिप्रायं निरूप्य तदनु उपस्कारकृन्मतमपि प्रस्तौष्यामि। 'शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात्' इति भाष्यवचनम्। यया रीत्या अनुमानेन अनुमितिरूपप्रमितेः उत्पत्तिः तयैव रीत्या शब्दादपि प्रमित्युत्पत्तिः इत्याशयः। तदेव उपपादयति - अनुमाने हि साध्यहेत्वोः व्याप्तिरूपसम्बन्धज्ञानेन पक्षधर्मताज्ञानव्याप्तिस्मरणाभ्यां परोक्षोप्यर्थः प्रतिपद्यते तथैव शब्दोऽपि व्याप्तिग्रहणबलेनैव प्रवर्तते। यावत्पर्यन्तम् 'अस्य पदस्यायमर्थः' इत्येवं पदपदार्थयोः सम्बन्धः न गृह्यते तावत्पर्यन्तं शब्दः न शाब्दं जनयति। अर्थात् शब्दार्थयोः अव्यभिचरितत्वज्ञानमपेक्ष्यते। अव्यभिचारित्वं हि व्याप्तिः। तथा च अनुमित्यात्मकप्रमितिं प्रति व्याप्तिज्ञानं यथा करणं तथा शाब्दं प्रत्यपि व्याप्तिज्ञानमेव करणमिति शब्दः नातिरिक्तं प्रमाणम्। अत्र अनुमानप्रयोगमपि प्रदर्शयन्ति- 'शब्दः अनुमानं व्याप्तिबलेनार्थप्रतिपादकत्वात् धूमवत्'[२] इति।

अत्र केचन अवान्तरशङ्कामुत्थापयन्ति - अनुमाने साध्यविशिष्टो धर्मी प्रतीयते। शब्दात् यदि अर्थः अनुमीयते तर्हि कस्तावत् धर्मी भवति? अर्थः धर्मी इति वक्तुं न शक्यते। यतः अनुमाने धर्मीज्ञानस्य पूर्वमपेक्षितत्वात् अर्थस्य पूर्वमप्रतीयमानत्वात् नार्थः धर्मी। शब्दः धर्मी इत्युच्यते तर्हि किमस्य साध्यम्? अर्थवत्त्वं साध्यमित्युच्यते चेत् शब्देन साकं तस्य कः सम्बन्ध इति वक्तव्यम्। स च संयोगसमवायादिः भवितुं नार्हति। तयोः बाधात्। अतः प्रतिपाद्यप्रतिपादकभावः एव तयोः सम्बन्धः वक्तव्यः, किन्तु शब्दार्थयोः प्रतिपाद्यप्रतिपादकभावः शब्दात् अर्थप्रतीत्युत्तरमेव अवगन्तुं शक्यते। अतः सोऽपि न युक्तः।

सहाचार्यः (संस्कृतम्), सर्वकारसंस्कृतकलाशाला, पट्टाम्बि, केरलराज्यम्.

In Public domain. Digitization Muthulakshmi Research Academy

एवमनुमानस्थले वह्निधूमयोः व्याप्तिरूपः कश्चित् सम्वन्धः वर्तते येन धूमात् वह्निरनुमीयते। न हि तादृशः कश्चित् सम्बन्धः शब्दार्थयोः सम्भवति, देशकालव्यभिचारात्। व्यभिचारं निरूपयति ग्रन्थकारः - असत्यपि युधिष्ठिरे कलौ युधिष्ठिरशब्दप्रयोगः दृश्यते, एवमसत्यामपि लङ्कायां जम्बुद्वीपे लङ्काशब्दः प्रयुज्यते। अतः अर्थशून्ये काले देशे वा शब्दस्य सत्वात् अर्थव्यभिचारात् व्याप्तिज्ञानविधया शब्दः अर्थं न बोधयति। अतः शब्दः नाऽनुमानम्। अत्रैवमनुमानप्रयोगः शब्दः, नानुमानं, देशविशेषे अर्थव्यभिचारात्। धूमस्तु कदापि वह्निं न व्यभिचरति किन्तु शब्दस्तु स्वार्थं व्यभिचरति तद्यथा चौरशब्दः दाक्षिणात्यानां भक्तृवाचकः औत्तराणां च तस्करवाचकः। अतः शब्दः अर्थं व्यभिचरतीति शब्दानु-मानयोः समाना प्रवृत्तिर्नास्ति तस्मात् शब्दो नानुमानम्। एवमाक्षेपे प्राप्ते तदेवं समादधाति क्रयविक्रय-व्यवहारे काले वणिक् यदा तर्जनीमूर्ध्वीकरोति तदा अन्यस्य ततः संख्याबोधः जायते इत्यनुभवसिद्धम्। स च बोध अनुमित्यात्मकः इति वक्तव्यम्। तथा सति तत्र कस्तावद्धर्मी इति विचार्यमाणे संख्या भवितुं नार्हति। तस्याः अमुमितेः प्रागप्रतीयमानत्वात्। अस्तु तर्हि तर्जनीविन्यासः धर्मी इत्युच्यते चेत तदपि न युक्तं, तस्य संख्यारूपसाध्येन साकं सम्बन्धाभावात् तद्विशिष्टबुद्धिः कदापि भवितुं नार्हति। तथा च अत्र कथं संख्याविशिष्टस्य तर्जनीविन्यासरूपधर्मिणः प्रतीतिः उपपद्यते। वणिजां च क्रयविक्रय-व्यवहारे तादृशतर्जनीविन्यासस्य दशसंख्याप्रतिपादनाभिप्रायव्यभिचारोपलम्भात् कथं तत्रानुमान-प्रवृत्तिरिति।

यदि संख्याबोधाभिप्रायेणायं तर्जनीं विन्यसति इति अवगमपूर्वकमेव तत्रानुमितिरुत्पद्यते इत्युच्यते तर्हि शब्दस्याप्येवमेव प्रवृत्तिः। गोशब्दे उच्चार्यमाणे 'वक्त्रा ककुदादिमदर्थविवक्षया शब्दोऽयं प्रयुज्यते' इति वक्त्रभिप्रायावगमेन श्रोतुः तदर्थविषयकानुमितिर्जायते। अत्रायं क्रमः वक्तव्यः - आदौ गोशब्दे श्रुते श्रोता पुरुषः वक्तुः विवक्षामनुमिनोति। तत्रैवमनुमानप्रयोगः - 'पुरुषः धर्मी, ककुदादिमदर्थ-विवक्षावान्, गोशब्दोच्चारणकर्तृत्वात् अहमिव इति। तदनु पदस्य अर्थबोधकत्वमनुमीयते - यथा - गोशब्दः, ककुदादिमद्बोधकः ककुदादिमद्बोधेच्छया उच्चारितत्वात्' यः यद्विषयकबोधेच्छया यत्पदं प्रयुङ्क्ते तत् तदर्थबोधकम्। एवं रीत्या अनुमानेन तदर्थविषयकबोधः जायते। ननु वक्तृविवक्षां ज्ञात्वा अर्थः अनुमीयते इत्युच्यते चेत् अर्थाभावेऽपि अनाप्तानां विवक्षोपलब्धिरस्तीत्यतः वक्तृविवक्षां ज्ञात्वाऽर्थसिद्धिः इति न युक्तमिति कश्चित् शङ्कते तर्हि शब्दस्याऽपि समाना रीतिः। शक्तिभ्रमेण वा विप्रलम्भधिया वा अर्थशून्यस्य शब्दस्य प्रयोगात्। यदि आप्ताऽभिप्रायादेव अर्थानुमितिरिति वयमपि वदामः इति समाना रीतिः। एवं पूर्वं देशविशेषे शब्दः अर्थं व्यभिचरति इति यदुक्तं तत्रेवं समाधिः - धूमः

In Public domain. Digitization Muthulakshmi Research Academy

स्वाभाविकसम्बन्धेनाग्नेर्लिङ्गम्, शब्दस्तु न तथा। यथा तर्जनीविन्यासरूपचेष्टया संख्यामनुमिनोति तथैव शब्दोऽपि पुरुषेच्छाकृतेन सङ्केतेन प्रवर्तते। तथा च यत्र यत्रार्थे पुरुषस्य सङ्केतः तस्य तस्यार्थस्य विवक्षामवगम्य अर्थबोधः जायते इति वक्तव्यम्। तथा च चौरशब्दस्य भक्ते विवक्षामवगम्य भक्तस्य बोधः, तस्करे विवक्षामवगम्य तस्करस्य बोधः इति न व्यभिचारः।

एवं रीत्या शब्दस्य अनुमानान्तर्भावं साधयित्वा उपमानस्याऽपि तथात्वं साधयति - 'आप्तेनाऽप्रसिद्धस्य गवयस्य गवा गवयप्रतिपादनादुपमानमाप्तवचनमेव' इति ग्रन्थेन। यः साक्षात्कृतधर्मा यथार्थदृष्टस्यार्थस्य चिख्यापयिषया प्रयोक्ता उपदेष्टा सः आप्तः। आप्तेन वनेचरेण 'गो सदृशो गवयः' इति वाक्ये प्रयुक्ते श्रोतुः पुरुषस्य गवये गोसादृश्यज्ञानं जायते। अतः गोसादृश्येण गवयप्रतिपादनात् उपमानमाप्तवचनमेव, आप्तवचनं च अनुमानम्। तस्मात् उपमानमपि अनुमानमेव, न प्रमाणान्तरम्।

एवंरूपेण भाष्यकाराणां मतमनूद्य उपकारस्थः विषयः किञ्चिदत्र प्रतिपाद्यते। नवमाध्याये द्वितीयाह्निके अनुमानं निरूप्य सूत्रकारः शब्दस्यानुमाने अन्तर्भावं साधयितुं सूत्रयति - 'एतेन शाब्दं व्याख्यातम्'[3] इति। शाब्दं शब्दकारणकं ज्ञानमिति यन्नैयायिकादयो वदन्ति तदपि एतेन लैङ्गिकत्वेन अनुमानत्वेन व्याख्यातमिति सूत्रार्थः। व्याप्तिज्ञानादिधारिता या सामग्री अनुमितिमुत्पादयति सैव सामग्री शाब्दमव्युत्पादयति इत्यर्थः। अयमाशयः - 'पदार्थानां संसर्गज्ञानमेव नैयायिकाभिमतं शाब्दज्ञानम्। इदं च संसर्गज्ञानं यदि अनुमित्यात्मकं स्यात् तर्हि तत्करणमनुमानमेव भवति न तु शब्दः। अतः शब्दप्रमाणगम्यप्रमितेः अनुमितित्वात् तत्करणं शब्दः अनुमानमेव। पदार्थानां संसर्गज्ञानमनुमित्यात्मकं जायते इत्युक्तम्। तत्र इत्थमनुमानप्रयोगः - एते पदार्थाः मिथःसंसर्गवन्तः आकाङ्क्षादिमद्भिः स्मारितत्वात् गामभ्याजेति पदार्थसार्थवत्' इति। अत्र हेतौ आकाङ्क्षादीत्यत्र आदि पदेन आसत्तियोग्यतयोः ग्रहणम्। तथा च यत्र यत्र आकाङ्क्षादिमत्पदकदम्बस्मारितत्वं तत्र पदार्थानां मिथः संसर्गवत्त्वमित्येवं व्याप्तिं गृहीत्वा प्रकृतपक्षे गामानयेत्यादि वाक्यघटकपदार्थेषु आकाङ्क्षादिमत्पदकदम्बस्मारितत्वमवगम्य पदार्थानां मिथः संसर्गवत्त्वमनुमिनोति। अतः शब्दः नातिरिक्तं प्रमाणम्।

अत्र एवं शङ्कामुत्थापयति - अस्मिन्ननुमाने हेतुः व्यभिचारी भवति। कथमिति चेत् नदीतीरे पञ्चफलानि सन्ति इति अनाप्तोच्चारिते वाक्यार्थे पदार्थानां मिथः संसर्गवत्त्वं नास्ति किन्तु आकाङ्क्षादिमद्भिः स्मारितत्वमस्तीति व्यभिचारः। अतः पदार्थानां मिथः संसर्गवत्त्वाभाववतिवृत्तेरहेतुः व्यभिचारी। अतः दोषमिमं वारयितुमाप्तोक्तत्वं हेतौ विशेषणं दीयते। तथा च आप्तोक्तेः आकाङ्क्षादिमद्भिः पदैः स्मारितत्वं पूर्वोक्तस्थले नास्तीति न कश्चिद्दोषः।

In Public domain. Digitization Muthulakshmi Research Academy

अत्राप्तत्वं किमिति प्रतिपादयति ग्रन्थकारः 'आप्तत्वं हि प्रकृतवाक्यार्थगोचर यथार्थवाक्यार्थज्ञातवत्वं न त्वप्रतारकत्वमात्रम्'[४] इति। तथा च नदीतीरे पञ्चफलानि सन्ति इति वाक्यं येन प्रयुक्तं तस्य तद्वाक्यार्थगोचरयथार्थवाक्यार्थज्ञानं नास्तीति दोषाभावेऽपि एतादृशमाप्तत्वं वाक्यार्थप्रतीतेः प्राक् दुर्ग्रहमिति कथं तद्घटितहेतुज्ञानं, तेन अनुमितिर्वा जायते इति शङ्का।

ननु शब्दस्य प्रमाणान्तरत्वमङ्गीकुर्वद्भिः नैयायिकैरपि अनाप्तोक्तशब्दस्य प्रामाण्यापत्तिभिया आप्तोक्तः शब्द एव प्रमाणमिति वक्तव्यम्। तथा च तन्मतेऽपि वाक्यार्थप्रतीतेः पूर्वमाप्तत्वं दुर्ग्रहमिति चेन्न, यतः आप्तोक्तत्वज्ञानं च वाक्यार्थप्रतीतौ न प्रयोजकमपि तु तत्र प्रामाण्यनिश्चये एव प्रयोजकम्। अतः वाक्यार्थप्रतीतौ जातायां सत्यां तत्र प्रामाण्यनिश्चयः आप्तत्वग्रहमन्तरा न भवति चेदपि शाब्दबोधस्तु भवत्येव।

शब्दस्य अनुमानवादिनां मते हेतोः आप्तत्वघटितत्वात् आप्तत्वज्ञानं विना पक्षधर्मताज्ञानं न सम्भवति। आप्तत्वज्ञानं च अनुमित्यात्मकवाक्यार्थप्रतीतेः प्राक् न सम्भवतीति मतद्वये वैलक्षण्यमस्त्येव। तस्मात् पूर्वोक्तानुमानेन कथं वाक्यार्थप्रतीतिर्भवतीति चेत् तत्रैवं समाधीयते - अनुमितेः प्राक् विशिष्य प्रकृतवाक्यार्थगोचर यथार्थवाक्यार्थज्ञानवत्वरूपाप्तत्वस्य ग्रहीतुमशक्यत्वेऽपि 'अयमत्राभ्रान्तः' इति सामान्यतः आप्तत्वग्रहणं सम्भवति। ननु 'अयमत्राभ्रान्तः' इत्यत्र 'अत्र' इत्यस्य प्रकृतसंसर्गे इत्येवार्थः वक्तव्यः। तथा सति संसर्गज्ञानात् पूर्वमाप्तत्वग्रहणमशक्यमेव इति चेन्न प्रकरणसमभिव्याहारादिना सामान्यतः आप्तत्वनिश्चयसम्भवात् तद्घटितस्य हेतोः निश्चयः सम्भवति अतः न पूर्वोक्तदोषः।

अत्र अनुमानान्तरमपि प्रदर्शयन्ति 'एतानि पदानि, स्मारितार्थसंसर्गप्रमापूर्वकाणि, आकाङ्क्षायोग्यताऽसत्तिमत्पदकदम्बत्वात्, गामभ्याजेति पदकदम्बवदिति। एतानि पदानि' इत्यनेन 'घटमानये' त्यादि पदानि स्वीक्रियन्ते। तथा च यत्र यत्र आकाङ्क्षादिमत्पदकदम्बत्वं तत्र स्मारितार्थसंसर्गज्ञानपूर्वकत्वमिति व्याप्तिं गृहीत्वा, प्रकृते गामानयेत्यादिपदेषु आकाङ्क्षादिमत्पदकदम्बत्वमपि गृहीत्वा स्मारितार्थसंसर्गज्ञानपूर्वकत्वानुमितिर्जायते। तेन च साध्यतावच्छेदककोटिप्रविष्टं स्मारितार्थसंसर्गज्ञानमपि सिद्ध्यति।

हेतुघटकदलानां सार्थक्यं किञ्चिदत्र निरूप्यते - हेतौ आकाङ्क्षावत्वानिवेशे घटः कर्मत्वम्, आनयनं कृतिरित्यत्र स्मारितार्थसंसर्गप्रमापूर्वकत्वाभाववति योग्यतादिमत्पदकदम्बत्वमस्तीति व्यभिचारः। अतः आकाङ्क्षावत्वं निवेशनीयम्। तथा च उक्तस्थले आकाङ्क्षादिमत्पदकदम्बत्वाभावात् न व्यभिचारः। एवं हेतौ योग्यतावत्वानुपादाने वह्निना सिञ्चति इति वाक्ये व्यभिचारः अतस्तद्वारणार्थं

In Public domain. Digitization Muthulakshmi Research Academy

योग्यतावत्वोपादानम्। एवमसहोच्चारितेषु गामानय इत्यादिषु व्यभिचारवारणार्थमासत्तिमत्वनिवेशः। तथा च एवं रीत्या अनुमानेनैव पदार्थसंसर्गज्ञानं भवतीति शब्दः नातिरिक्तं प्रमाणम्।

एवमुपमानमपि नातिरिक्तं प्रमाणं किन्त्वनुमानमेव। तथा हि गोसदृशः गवयः इति वनेचरवाक्यं श्रुत्वा पुरुषः 'यः गोसदृशः सः गवयशब्दवाच्यः इत्येवंरूपेण गोसादृश्यगवयपदवाच्यत्वयोः सामानाधिकरण्यमवगच्छति तथा च अतिदेशवाक्येनैव गवयपदवाच्यत्वज्ञानं सम्भवति। तदनु वनं गत्वा पुरुषः गो सदृशपिण्डं दृष्ट्वा अयं गवयपदवाच्यः' इति निश्चिनोति। तथा च गवयपदवाच्यत्वज्ञानं शाब्दमेव जातमिति तत्करणं शब्दः एव। तस्य अनुमाने अन्तर्भावः पूर्वं निरूपितः। अतः उपमानमप्यनुमाने अन्तर्भवति।

ननु गवयशब्दस्य गवयत्वं प्रवृत्तिनिमित्तम्। तादृशगवयरूपशक्यतावच्छेदकस्य अतिदेशवाक्यात् अप्रतीतेः कथं तद्विशिष्टस्य बोधः इति चेन्न लक्षणया गवयत्वस्यापि प्रतीतिर्भवत्येव। अथवा तत्र अनुमानस्वरूपमित्थं निरूप्यते 'गवयशब्दः गवयवाचकः असतिवृत्यन्तरे शिष्टैः प्रयुज्यमानत्वात्।' अत्र सामान्यमुखीव्याप्तिं प्रदर्शयन्ति ग्रन्थकाराः असतिवृत्यन्तरे यः शब्दः शिष्टैः यत्र प्रयुज्यते सः तस्य वाचकः यथा गोशब्दः इति। एवं रीत्या सामान्यमुखीं व्याप्तिं गृहीत्वा अनुमाने प्रवृत्तमानः गवयपदवाच्यत्वं गवये अवगच्छति। अत्रानुमानान्तरमप्युच्यते - गवयपदं सप्रवृत्तिनिमित्तकं, साधुपदत्वात् घटपदवत् इति। अतः उपमानस्यापि अनुमानविधयैव प्रवृत्तिः। अतः उपमानमपि न प्रमाणान्तरम् इति।

किन्तु मतमिदं नैयायिकाः एवं निराकुर्वन्ति यत् सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्ति इति वक्तुं न शक्यते। व्याप्तिज्ञानं विनाऽपि शब्दबोधस्यानुभवसिद्धत्वात्। किञ्च सर्वत्र शब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तर्हि सर्वत्रानुमितिस्थले पदज्ञानं कुतो न कल्प्यते। अतः विनिगमकाभावात् शब्दः नानुमानम्। मणिकारा अपि वैशेषिकोक्तानुमाने दोषं प्रदर्शयन्ति। तथाहि 'एते पदार्थाः मिथः संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात्' इति अनुमाने हेतौ योग्यतावत्वं विशेषणं दत्तमस्ति। योग्यताज्ञानं संशयनिश्चयसाधारणं शाब्दबोधं प्रति कारणं भवति। किन्तु अनुमितौ हेतुज्ञानं निश्चयात्मकमेव कारणं भवितुमर्हति। तस्मात् योग्यतावत्वघटितहेतुना शब्दः अनुमीयते इति न युक्तम् इति शब्दोपमानयोः पृथक् प्रामाण्यं सिद्धम्।

निबन्धान्तटिप्पण्यः

१. प्रशस्तपादभाष्यस्य कर्तारः आचार्याः प्रशस्तपादाः।
२. न्यायकन्दली
३. वैशेषिकसूत्रम्, ९.२.३
४. वैशेषिकसूत्रोपस्कारः

In Public domain. Digitization Muthulakshmi Research Academy

अक्षपादसूत्रोक्तरीत्या प्रत्यक्षलक्षणविमर्शः

डा. का.ई. वेङ्कटनाथन्

'मानाधीना मेयसिद्धिः' इति वचनानुसारं जगति वर्तमानां प्रेमेयाणां सिद्धिः प्रमाणाधीना भवति। अर्थात् कस्यापि प्रमाणं विना प्रमेयस्य सिद्धिः न भवति। तच्च प्रमाणं कतिविधमित्यत्र दार्शनिकाः विवदन्ते। तत्र चार्वाकः प्रत्यक्षमेकमेव इति, काणादाः प्रत्यक्षानुमानद्वयमेव, कपिलाः प्रत्यक्षानुमानशब्दाः इति त्रयमेव, गौतमीयाः प्रत्यक्षानुमानोपमानशब्दाः इति अङ्गीकुर्वन्ति।

तत्र प्रत्यक्षविषये दार्शनिकानां सर्वेषां वैमत्याभावात् बहुवादिसम्मतत्वात् प्रमाणान्तराणां प्रत्यक्षमूलकत्वाच्च तद्विषये किंचित् प्रस्तूयते - शास्त्रं हि शिष्याकाङ्क्षाक्रमेण प्रवर्तते। निःश्रेयसं कुतः प्राप्यते इति जिज्ञासायां प्रमाणादितत्वज्ञानात् निःश्रेयसाधिगमः इत्युक्तम्। तत्कथं प्राप्यते इत्याकाङ्क्षायां द्वितीयं सूत्रं दुःखजन्मेत्यादि प्रवृत्तम्। ततः प्रमाणादयः के, कति, कानि लक्षणानि इति च जिज्ञासा जायते। अतः प्रमाणादीनां स्वरूपं तेषां विभागः लक्षणं च निरूप्यन्ते। ततः तद्विषयिणी परीक्षा क्रियते शास्त्रे।

तदुक्तं भाष्यकारेण - 'त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशः लक्षणं परीक्षा' चेति। आदिमसूत्रे एव षोडशपदार्थाः प्रमाणादयः नाम्ना कीर्तिताः। इदानीं तेषां लक्षणं निरूपणीयम्। तत्रोद्देशक्रमानुसारेण प्रमाणस्य प्रभेदः लक्षणं च निरूपणीयम्। तत्रादौ प्रत्यक्षस्य लक्षणप्रतिपादनाभिसंधिना पठितं न्याय-सूत्रं तावत् इत्थम् - 'इन्द्रियार्थसान्निकर्षोत्पन्नं ज्ञानम् अव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्'[१] इति।

सूत्रेऽस्मिन् षट् पदानि सन्ति। तत्र प्रत्यक्षमिति पदं लक्ष्यप्रदर्शकम् इतराणि पञ्चपदानि प्रत्यक्षस्य लक्षणप्रतिपादकानि। लक्ष्यभूतस्य प्रत्यक्षशब्दस्य व्युत्पत्तिः भाष्य-वार्तिक-टीका-न्यायसार-न्यायकन्दल्यादिषु बहुधा चर्चिता प्रदर्शिता च दृश्यते। प्रत्यक्षपदं ज्ञाने इन्द्रिये घटादौ विषये चेति त्रिष्वर्थेषु प्रयुक्तं दृश्यते।

उक्तार्थत्रयवाचकतया प्रत्यक्षशब्दस्य व्युत्पादनेऽस्तिभूयान् क्लेशः। तथा हि - 'अव्ययीभावे शरत्प्रभृतिभ्यः'[२] इति टच् प्रकरणे पाणिनीयानुशासनमस्ति। तत्र शरत्प्रभृतिगणे - 'प्रति-पर-सम्-अनुभ्योऽक्ष्णः' इति गणसूत्रम्। तस्य प्रति,पर,सम्,अनु इत्येतत्पूर्वकाक्षि शब्दान्तादव्ययीभावात् टच्प्रत्ययो भवति इत्यर्थः तथा च अक्षिणि प्रतीति विग्रहे लक्षणेनाभिप्रती आभिमुख्ये इति सूत्रेण अव्ययीभावे टचि यस्येति च इति इकारलोपे प्रत्यक्ष इति जाते ततः परमुत्पन्नायाः विभक्तेः

अतिथ्यध्यापकः, न्यायविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

In Public domain. Digitization Muthulakshmi Research Academy

'नाव्ययीभावादतोमूत्वपञ्चम्याः'[3] इति सूत्रेणामादेशे च प्रत्यक्षमिति रूपं सिद्ध्यति। किन्तु विषयपरतया यदा प्रयुज्यते तदा 'प्रत्यक्षा क्रिया' इति विशेष्यसमानलिङ्गतया प्रयोगो दृश्यते। तस्मात् अव्ययीभाव-समासपक्षे कथम् उपपत्तिरिति शङ्कायां भट्टोजिदीक्षितैः इत्थमभिहितम् - ज्ञानपरात् प्रत्यक्षशब्दात् 'अर्शादिभ्योऽच्'[4] इति सूत्रेण मत्वर्थीये अच् प्रत्यये तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां तदव्ययसुपो लुकि प्रत्यक्षशब्दः प्रत्यक्षवदर्थकः विशेष्यानुसारेण लिङ्गं प्राप्नोतीति।

भासर्वज्ञः न्यायसारव्याख्यायां न्यायभूषणे प्रत्यक्षशब्दे नाव्ययीभावसमासः, येन लिङ्गविशेष-समर्थने क्लेशः भवति इत्यतः 'कुगतिप्रादय'[5] इत्यनेन तत्पुरुषसमासः इति अभिप्रैति। एवमेव प्रशस्त-पादभाष्यव्याख्यायां न्यायकन्दल्यां किरणावल्याञ्च गतिसमासपक्ष एव आदृतः।

वात्स्यायनेन भाष्ये - 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि'[6] इति सूत्रविवरणावसरे - 'अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्' इत्युक्तम्। तत्र वार्तिककारः - अयं च सूत्रविवक्षायाम् अव्ययीभावसमासः' इत्याह। टीकाकारश्च अक्षमक्षं प्रति वर्तते इति विगृह्याव्ययीभावे कृते सर्वेन्द्रिया-वरोधो भवति' इत्यव्ययीभावसमासं सूत्रस्थ प्रत्यक्षशब्दस्यावोचत्।

इन्द्रियार्थसन्निकर्षोत्पन्नं चक्षुरादि इन्द्रियाणां घटादीनामर्थानां संयोगेन उत्पन्नम्, अव्यपदेश्यं शाब्दबोधातिरिक्तम्, अव्यभिचारि भ्रमातिरिक्तम्, व्यवसायात्मकं निश्चयात्मकं संशयातिरिक्तम् यत् ज्ञानं तत् प्रत्यक्षमिति सूत्रस्यान्वयः।

व्यपदिश्यते शब्देन जायते इति व्यपदेश्यम्। न व्यपदेश्यम् अव्यपदेश्यम्, अर्थात् न शाब्द-बोधनामधेयं विद्यते यस्मिन् प्रत्यक्षे तत् अव्यपदेश्यम्। इन्द्रियार्थसन्निकर्षे सत्यपि सन्निकृष्टविषयकं शब्देनापि ज्ञानं सम्भवतीति तद्व्युदासाय अव्यपदेश्यमिति विशेषणमुपात्तम्। भ्रमात्मकं ज्ञानं व्यभिचारि भवति, अतस्मिन् तद्बुद्धिरूपत्वात्। यथा अरजतस्य रजतत्व रूपेणग्रहणं तदपि इन्द्रियार्थसन्निकर्षो-त्पन्नम्, अव्यपदेश्यं च भवतीति तन्निरासाय अव्यभिचारि इति विशेषणं दत्तम्। स्थाणुर्वा पुरुषो वेति संशयात्मकज्ञाने अतिव्याप्तिवारणाय व्यवसायात्मकमिति विशेषणं गृहीतम्। संशयस्तु निश्चयात्मको न भवतीति नातिव्याप्तिरिति भावः।

अनुमानस्थले प्रमेयेणेन्द्रियसंयोगाभावात्, शाब्दबोधस्य अव्यपदेश्यत्वात्, उपमानकरणस्य सादृश्यज्ञानस्य च अत्र प्रवेशाभावात् नास्य प्रत्यक्षलक्षणस्यानुमानादावतिव्याप्तिरिति सामान्यत-स्सूत्रार्थः। सूत्रस्थप्रत्यक्षपदं प्रमापरम् उत प्रमाणपरमिति आकाङ्क्षायां प्रत्यक्षप्रमा परमेव इति समाधान-मुक्तम्। भाष्यवार्तिकयोः तथैव व्याख्याततत्वात्। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति पूर्वसूत्रानु-सारं प्रत्यक्षप्रमाणस्योद्देशात् प्रत्यक्षप्रमाणस्यैव अस्मिन् सूत्रे लक्षणमुच्यते इति यदि आलोच्यते

In Public domain. Digitization Muthulakshmi Research Academy

तदा यत इति पदमध्याहृत्य यस्मात् प्रमाणात् इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं भवति तत् प्रत्यक्षं प्रमाणमिति योजनीयम्। तदानीं सूत्रस्थं प्रत्यक्षपदं प्रमाणपरं भवति।

वस्तुतः प्रत्यक्षप्रमायाः लक्षणे कथिते तत्साधनत्वं प्रत्यक्षप्रमाणस्य लक्षणम् इत्यनायासेन बोद्धुं शक्यत इत्यभिप्रायेण सूत्रकारः प्रत्यक्षप्रमायाः लक्षणम् असूत्रयदिति मन्यमानेनोद्योतकराचार्येण ज्ञानपरमेव प्रत्यक्षपदमत्र सूत्रे आदृतम्। तथा च प्रत्यक्षमिति लक्ष्यनिर्देश इति सिद्धम्। इतराणि पञ्चपदानि प्रत्यक्षस्य लक्षणप्रतिपादकानि। तावता सूत्रेऽस्मिन् प्रत्यक्षस्य पञ्चलक्षणान्युक्तानि इति न भ्रमितव्यम्। पञ्चभिरपि पदैः सम्भूयैकमेव लक्षणमुच्यते। पञ्चानां पदानां मध्ये एकस्य, द्वयोः, त्रयाणां, चतुर्णां वा अपनयने लक्षणमतिव्याप्तिग्रस्तं भवतीति पञ्चानामपि एकलक्षणे प्रवेशः आवश्यकः इति भाष्यवार्तिकाभ्याम् अवगम्यते।

इन्द्रियार्थसन्निकर्षोत्पन्नत्वं प्रत्यक्षस्य लक्षणमित्येतावत्युक्ते सुखदुःखयोरपि इन्द्रियविषयसंयोगानन्तरोत्पत्तिकयोः अतिव्याप्तिरिति ज्ञानमित्युक्तम्। भाष्ये सुखदुःखातिव्याप्तिवारणफलकं ज्ञानपदमिति न स्ववाचा उक्तम्। न वा सूचितं यद्यपि, तथापि वार्तिककृता उक्तम् - 'अथ ज्ञानग्रहणं किमर्थं सुखादिव्युदासार्थम्। इन्द्रियार्थसन्निकर्षात् सुखदुःखेऽपि भवतः। तद्व्युदासार्थमाह - ज्ञानमिति' इति।

अत्र न्यायमञ्जर्यां जयन्तभट्टः सुखदुःखयोरतिव्याप्तिवारणार्थं ज्ञानपदमिति यदुक्तं वार्तिककारेण तद्दूषयति। तयोः व्यवसायात्मकमिति पदेनैवातिव्याप्तिनिरासात्। व्यवसायात्मकमित्यस्य हि निश्चयरूपमित्यर्थः। निश्चयश्च संशयान्यज्ञानम्। सुखदुःखयोश्च ज्ञानत्वमेव नास्ति दूरे निश्चयत्वमिति।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमित्येतावन्मात्रोक्तावपि सर्वेषामेव इन्द्रियार्थसन्निकर्षोत्पन्नानां ज्ञानानां विषयनामधेयेन रूपरसादिशब्देन रूपमिति ज्ञानम्, रस इति ज्ञानमित्येवं व्यपदेशात् शब्दविषयकत्वमप्यस्तीति वक्तव्यम्। एतादृशं च शब्दतादात्म्यापन्नार्थविषयकं ज्ञानं प्रत्यक्षं मा प्रसाङ्क्षीदिति अव्यपदेश्यमित्युक्तम्। शब्दार्थसम्बन्धज्ञानं विनापि जायमानं ज्ञानमेव प्रत्यक्षम्। शब्दतादात्म्यापन्नार्थविषयकं ज्ञानं तु शब्दार्थयोस्तादात्म्यरूपस्य संबन्धस्य ज्ञानमपेक्षत इति तद्व्युदासः।

एवमपि इन्द्रियार्थसन्निकर्षादुत्पन्ने शुक्तिरजतादिभ्रमेऽतिव्याप्तिः स्यादिति तद्वारणायाव्यभिचारीत्युक्तम्। व्यभिचारि नाम तदभाववति तत्प्रकारकं ज्ञानम्। अतादृशमव्यभिचारि, भ्रमस्य च व्यभिचारित्वात् न तत्रातिव्याप्तिः। दूरस्थोर्ध्वव्यक्तेश्चक्षुस्संयोगानन्तरं जायमाने स्थाणुर्वा पुरुषो वेति संशयेऽतिव्याप्तिनिरासाय व्यवसायात्मकमिति। निश्चयात्मकमिति तदर्थः। संशयस्य च निश्चयरूपत्वाभावात् नातिव्याप्तिः। एवं रीत्या समस्तमेकं लक्षणमिति भाष्यवार्तिककारयोरभिप्रायः। तथा च वार्तिकम् - 'लक्षणं चेदम्। अतः संदेहः किं समस्तम् उत असमस्तमिति। समस्तमित्याह। यस्मात्

In Public domain. Digitization Muthulakshmi Research Academy

एकदेशोऽनुमानसुखशाब्दविपर्ययसंशयज्ञानानि निवर्तन्ते'[7] इति। अत्रेन्द्रियार्थसंनिकर्षजन्यत्वानुपादाने अनुमितावतिव्याप्तिः। अतस्तदुपादानमित्याशयेन अनुमानेत्युक्तम्।

टीकाकृत्तु इन्द्रियार्थसंनिकर्षोत्पन्नं, ज्ञानं, अव्यभिचारि इति त्रीण्येव पदानि लक्षणघटकानि। अव्यपदेश्यं, व्यवसायात्मकमिति पदद्वयमपि प्रत्यक्षविभागपरमित्यभिप्रैति। अव्यपदेश्यमित्यस्य निर्विकल्पकमित्यर्थः। व्यपदेशः विशेषणमुपलक्षणं वा नामजात्यादि, तत्कर्म व्यपदेश्यम्, विशेष्यमिति यावत्। न विद्यते व्यपदेश्यं यस्मिन् प्रत्यक्षे तदव्यपदेश्यम्। जात्यादिस्वरूपमात्रविषयकं जात्यादीनां मिथो विशेषणविशेष्यभावानवगाहि प्रत्यक्षं निर्विकल्पकाख्यमव्यपदेश्यशब्दार्थः। व्यवसायात्मकपदं तु साक्षात् सविकल्पकस्य वाचकम्। व्यवसायो विकल्पः विनिश्चय इत्यनर्थान्तरम्। तथा च इन्द्रियार्थसंनिकर्षोत्पन्नत्वे सति अव्यभिचारितत्वे सति ज्ञानत्वं प्रत्यक्षप्रमाया लक्षणमिति वाचस्पतिमिश्राणामाशयः।

प्रत्यक्षस्योक्तं लक्षणं परीक्षते 'प्रत्यक्षलक्षणानुपपत्तिः असमग्रवचनात्' इत्यारभ्य 'न अर्थविशेषप्राबल्यात्'[8] इत्यन्तैः दशभिः सूत्रैः। तथा हि इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं यतो भवति तत् प्रत्यक्षप्रमाणमिति कार्यद्वारकं प्रत्यक्षप्रमाणलक्षणमुक्तम्। प्रत्यक्षज्ञाने न केवलमिन्द्रियार्थयोः सन्निकर्षः कारणम्, अपि तु आत्ममनस्सन्निकर्षः, इन्द्रियमनस्सन्निकर्षश्च। अत एव युगपत् नानेन्द्रियैः नानार्थविषयाणि ज्ञानानि न जायन्ते। एवं प्रत्यक्षज्ञानकारणस्य संपूर्णस्यानुपादानात् प्रत्यक्षलक्षणं नोपपद्यत इति पूर्वपक्षः।

आत्ममनस्सन्निकर्षः प्रत्यक्षानुमित्यादिसकलज्ञानसाधारणकारणम्। इन्द्रियार्थसन्निकर्षस्तु प्रत्यक्षमात्रे असाधारणकारणम्। सुप्तो जनः तीव्रे ध्वनौ स्पर्शे च सति प्रबुध्यते। तत्र प्रबोधज्ञाने इन्द्रियार्थसन्निकर्षः प्रधानम्। नात्ममनस्संयोगः। न ह्यात्मा जिज्ञासमानः प्रयत्नेन मनः तदा प्रेरयति। निस्संकल्पस्य निर्जिज्ञासस्य व्यासक्तमनसः बाह्यविषयोपनिपातात् ज्ञानं जायते। अत इन्द्रियार्थसन्निकर्ष एव प्रधानम्।

किञ्च चाक्षुषं ज्ञानं, रूपज्ञानमिति इन्द्रियार्थेन च ज्ञानविशेषाः व्यपदिश्यन्ते। अतोऽपीन्द्रियार्थसन्निकर्षः प्रधानम्। न चैवं मन्तव्यम् इन्द्रियार्थसन्निकर्ष एव हेतुः, न मनस्सन्निकर्ष इति युगपत् ज्ञानानि जायेरन्निति। इन्द्रियार्थस्य तीव्रत्वादिविशेषेण सुप्तानां व्यासक्तचित्तानां च ज्ञानमुदेति। तच्च इन्द्रियार्थसन्निकर्षविषयमिति इन्द्रियार्थसन्निकर्षः प्रधानमित्युच्यते। न तु मनस्सन्निकर्षः न कारणमिति। तस्मात् असाधारणत्वात् प्रधानत्वात् प्रत्यक्षलक्षणे इन्द्रियार्थसन्निकर्षः उपात्तः नेतरः सन्निकर्ष इत्युपपन्नमेव प्रत्यक्षलक्षणमिति समाधिः।

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रियार्थसन्निकर्षात् जायमानमयं वृक्षः इति ज्ञानं प्रत्यक्षमित्यभिधीयते। तच्चानुमानमेव। पुरोवर्तिनं वृक्षभागं गृहीत्वा वृक्षमुपलभते पुरुषः। न चैकदेशः पुरोवर्तीवृक्षः। तस्मात् धूमदर्शनेन वह्निमिव पुरोवर्तिभागदर्शनेन वृक्षमुपलभते इति न प्रत्यक्षं प्रमाणमिति पूर्वपक्षः।

तत्रेदं समाधानं - पुरोवर्तिभागस्य प्रत्यक्षं भवताप्यङ्गीकृतमिति प्रत्यक्षं न प्रमाणमिति वचनं व्याहतं भवति। प्रत्यक्षस्याभावे तत्पूर्वकस्यानुमानस्य प्रमाण्यं दूरापस्तं वेदितव्यम्। नापि वृक्षपुरोवर्तिभागमात्रस्य प्रत्यक्षं, किन्तु, अवयवातिरिक्तस्यावयविनः सत्वात् अवयविना वृक्षपुरोवर्तिभागमात्रस्य प्रत्यक्षं, किन्तु अवयवातिरिक्तस्यावयविनः सत्वात् अवयविना वृक्षेण सन्निकर्षात् अवयविनोपि पुरोवर्तिभागसहचरितस्य प्रत्यक्षं जायते एव। तस्मात् प्रत्यक्षं प्रमाणमेवेति सिद्धम्।

।। इति शम् ।।

निबन्धान्तटिप्पण्यः

१. न्या.सू.१.१.४
२. पा.सू.५.४.१०७
३. पा.सू.२.४.८३
४. पा.सू.५.२.१२७
५. पा.सू.२.२.१८
६. न्या.सू.१.१.३
७. न्या.वा.पृ.२०६
८. न्या.सू.वा.

परिशीलितग्रन्थाः

१. न्यायसूत्रम्
२. पाणिनीयसूत्रम्
३. न्यायवार्तिकम्
४. न्यायरत्नम्
५. प्रत्यक्षतत्त्वचिन्तामणिविमर्शः
६. न्यायमञ्जरी

In Public domain. Digitization Muthulakshmi Research Academy

न्यायनये उपमानप्रमाणम्

श्री गौरीशङ्कर षणै

भारतीयजीवनपरम्परानुसारेण पुरुषार्थस्य चत्वारो भेदाः भवन्ति। ये च पुरुषाथसंज्ञाम् अलभन्त। ते च धर्मार्थकाममोक्षाः। तत्र तत्त्वप्रतिपादकानां दर्शनानामपि प्रयोजनं धर्मार्थकाममोक्षेभ्यः भिन्नं भवितुं नैव शक्नोति। अधिकांशतः दर्शनानां प्रयोजनं परमपुरुषार्थतो मोक्ष एव अस्ति। मोक्षो नाम अमरतायाः प्राप्तिः। यथार्थावगमादेव बन्धननिवृत्तिरूप मोक्षः सम्भवति। तदुक्तं च ईशावास्ये - "विद्ययाऽमृतमश्नुते।"[1]

ये वा वेदप्रामाण्यं नाभ्युपगच्छन्ति नास्तिकाः चार्वाकादयः तैः मोक्षः पुरुषार्थत्वेन नैव परिगण्यते। यादृशश्च मोक्षपदार्थः आस्तिकैरभिवर्ण्यते। तत्तु अलीक एव नास्तिक मते। आस्तिकमते तु परमपुरुषार्थः मोक्ष एव। तादृशमोक्षश्च तत्त्वज्ञानादेव भवति इति तु निश्चप्रचम्। तत्प्रदर्शितं च न्यायदर्शने - "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः"[2] इति।

तत्त्वज्ञानं नाम यथार्थज्ञानं तदेव प्रमेत्युच्यते। तत्करणं प्रमाणम्। प्रमाणानि च प्रत्यक्षादीनि भवन्ति। तत्र नास्तिकैः चार्वाकैः प्रत्यक्षमेकमेव प्रमाणमिति स्वीक्रियते। वैशेषिकैः, बौद्धैश्च अनुमान-मपि स्वीक्रियते। उपमितिरपि नैयायिकैकदेशिनः अङ्गीकुर्वन्ति। शब्दादि प्रमाणानि च नैयायिकैः तदितरैः प्राभाकारादिभिः अङ्गीक्रियन्ते।

तत्र प्रमाणानि न्यायदर्शने चतुर्धा विभक्तानि - "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[3] इति।

चतुर्षु प्रत्यक्षादिषु प्रमाणेषु प्रत्यक्षानुमानशब्दानां व्यवस्था च न्यायदर्शनरीत्या एवं प्रदर्शिता-लौकिकस्य योगशक्तिरहितस्य पुंसः स्वर्गविषयकम् अनुमानमपि न सम्भवि - स्वर्गव्याप्यलिङ्गदर्शना-भावात्। प्रत्यक्षमपि न सम्भवति किंतु "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादि शब्दमात्रबोध्यत्वं स्वर्गेऽस्तीति शब्दप्रमाणद्वारैवावगम्यते। एवं मेघादेः शब्दः श्रुते सति गृहाभ्यन्तः स्थितस्य शब्दलक्षण-हेतुना मेघादेरनुमानमेव भवति। न तत्र प्रत्यक्षं वा आगमो वा असम्भवात्। पाणौ प्रत्यक्षेणोपलभ्यमाने बदरे प्रत्यक्षमेव प्रवर्तते नानुमानादिकमिति।

एतादृश व्यवस्थायाम् उपमानस्य स्थानं न दृश्यते। यतो हि उपमानं मोक्षप्रतिपादकशास्त्रे अस्मिन् कोपयुज्यते ?

अतिथ्यध्यापकः, श्रीवेङ्कटेश्वरवेदान्तवर्धिनीसंस्कृतकलाशाला, भाग्यनगरम्

In Public domain. Digitization Muthulakshmi Research Academy

आगमात्तावदात्मज्ञानं मोक्षसाधनं सेतिकर्तव्यताकमवगम्यते, अनुमानादागमप्रामाण्यनिश्चय-प्रत्यक्षादनुमानस्य व्याप्तिपरिच्छेद इति त्रयमेवोपदेष्टव्यम् इति चेत् ।

सत्यमेव । उपमानमपि क्वचिद्गवयालम्भादि चोदनार्थानुष्ठाने सोपयोगम्, अनवगतगवयस्वरूपे तेनैव अवगमात् । यथा मुद्गस्तम्भः तथा मुद्गपर्णीति ओषधिपरिज्ञानेऽपि तदुपयोगि भवति ।

एवं शास्त्रेतरलौकिकविषयेष्वपि विबुधैः धर्मबोधनादिषु "रामादिवत् वर्तितव्यं न रावणादिवत्" इत्यादि प्रयोगेभ्यः अस्य उपमानप्रमाणस्य उपयोगः विदित एव सर्वेषाम् । अत एव -

सर्वानुग्रहबुद्ध्या च करुणार्द्रमतिर्मुनिः।
मोक्षोपयोगाभावेऽपि तस्य लक्षणमुक्तवान् ।।[४]

महर्षिणा गौतमेन उपमानमपि प्रमाणमिति उपदिष्टम् । तस्य लक्षणञ्च इत्थं सूत्रीकृतम्- "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्"[५] इति । प्रसिद्धेन गवादिभिः यत्साधर्म्यं गवये गोसादृश्यं तस्मात् साध्यस्य गवयगवयशब्दयोर्वाच्यवाचकभावसम्बन्धस्य साधनम् उपमानम् । यथा "गोसदृशो गवयः" इति श्रवणानन्तरं वनं गतः पुरुषो गोसदृशं जीवं पश्यन् "अयं गवयपदवाच्यः गोसदृशत्वात्" इत्येवं गवयगवयशब्दयोर्वाच्यवाचक भावसम्बन्धमवधारयति। तदवधारणे च कारणं प्रसिद्धसाधर्म्यम्। एवं च प्रज्ञातेन गवादि सादृश्यात् प्रज्ञापनीयस्य गवयगवयपदादि वाच्यवाचकभावसम्बन्धस्य प्रज्ञापन(अवधारण) विषयकं यत्प्रमाणं विद्यते तदेव उपमानप्रमाणम् ।

उपमानप्रमाणस्य फलं न गवयादिव्यक्तिज्ञानम्, किन्तु समाख्यसम्बन्धप्रतिपत्त्यात्मक गवयगवयशब्दादि वाच्यवाचकभावसम्बन्धावधारणमेव ।

साधर्म्यादेव एकपदार्थेन अपरपदार्थः उपमातुं शक्यते । तच्च साधर्म्यं त्रिविधं भवति । १.अत्यन्त-साधर्म्यम् २.प्रायस्साधर्म्यम् , ३.एकदेशसाधर्म्यं चेति ।

एभिः अत्यन्तसाधर्म्यादिभिः उपमानं न सिध्यति । यतो हि अत्यन्तसाधर्म्य गोर्गवैव सम्भवति। अत्र नोपमानं प्रवर्तते । लोके "यथा गौस्तथा गौः" इत्येवं न प्रयुज्यते। प्रायस्साधर्म्यं तु वृषभमहिषयोरपि सम्भवति। अत्रापि नोपमानं प्रवर्तते । यतः "यथा वृषभस्तथा महिषः" इति लोके सामान्यतः महिषं वृषभेन सह न कश्चित् पुरुषः उपमिनोति । एकदेशसाधर्म्यं तु सर्वस्य सर्वेण सम्भवति । तत्रापि नोपमान-प्रमाणं प्रवर्तते । न हि सर्वेण सर्वमुपमीयते । गजगवययोश्च पशुत्वादिना एकदेशसाधर्म्यसत्त्वेऽपि "यथा गजस्तथा गवयः" इत्येवं केनापि न प्रयुज्यते । अतः त्रिविधस्यापि साधर्म्यस्य प्रयोजकत्वाभावात् प्रयोजकान्तरासम्भवाच्च "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्" इति यदुक्तं तन्न सिध्यति इति चेत्

In Public domain. Digitization Muthulakshmi Research Academy

प्रसिद्धसाधर्म्याद् उपमानप्रमाणं सिध्यति । तदुक्तं च - "प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः"[६] इति।

प्रसिद्धात् साधर्म्यात् यः साध्यसाधनभावः तमाश्रित्योपमानं प्रवर्तते । तत्र साध्यं गवयगवयशब्दादि वाच्यवाचकभावसम्बन्धज्ञानम् । तस्य साधनम् उपमानप्रमाणम् । एतादृश साध्यसाधनभावमाश्रित्योपमानप्रमाणं प्रवर्तते । अत्र च प्रसिद्धसाधर्म्यं हेतुः, अतः प्रसिद्धसाधर्म्याद् उपमानं सिध्यति । न्यायभाष्यवार्तिककारेण भारद्वाजोद्योतकरेण अत्यन्तसाधर्म्यादिभिरपि उपमानं सिध्यतीति प्रतिपादितम् । तद्यथा- अत्यन्तसाधर्म्यादुपमानं सिध्यति, यथा तत्क्रिययैव तत्क्रियोपमीयते। यथा "रामरावणयोर्युद्धं रामरावणयोरिव" इति ।

प्रायः साधर्म्येणापि उपमानं सिध्यति, यदा गोर्बलप्रकर्षजिज्ञासा भवति । तदा भूयः साधर्म्येणोपमानम्। "यथा महिषस्तथा गौरिति" इति ।

एकदेशसाधर्म्यादपि भवति। यदा तु सन्मात्रं जिज्ञासानिमित्तं भवति, मेरोः सत्ता किं रूपेति। तदा "यथा सर्षपस्य तथा मेरोः" इति ।

उपमानप्रमाणस्य प्रयोजकत्वम्

उपमानस्य अनेकविध उपमितिरूपप्रयोज्यस्य प्रयोजकत्वं विद्यते । यथा - न्यायनये उपमानप्रमाणेन गवयादिपदशक्तिग्राहो भवति । अत एवोक्तं -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।।

इत्यत्र शक्तिग्राहकेषु उपमानस्यापि अन्यतमत्वम् । एवमेतादृश प्रयोजकत्वं उपमानप्रमाणे वर्तते । एवं यथाशक्तिज्ञानमुपमितिः तथा कार्यकारणभावज्ञानमप्युपमितिः । तद्यथा - मुद्गपर्णसदृशौषधिर्ज्वरहरेति वैद्यवाक्यं श्रुत्वा तदर्थबोधाऽनन्तरं मुद्गपर्णसादृश्यविशिष्टौषधिदर्शनेन मुद्गपर्णसादृश्यविशिष्टविशेष्यकज्वरहरत्वप्रकारकाऽतिदेशवाक्यार्थस्मरणानन्तरम् इयं ज्वरहरेत्याकारक कार्यकारणभावज्ञानम् उपमितिः। तत् करणं च उपमानम् भवतीति प्रमाणस्य अस्य अनेकत्र प्रयोजकत्वं वर्तत इति उपमानप्रमाणम् अङ्गीकार्यं भवति।

प्राचीनानां मते अतिदेशवाक्यार्थबोधः करणम् । अतिदेशवाक्यार्थस्मरणं व्यापारः। सादृश्यविशिष्टपिण्डदर्शनं सहकारिकारणम् । गवयः गवयपदवाच्यः इत्युपमितिः फलं भवति ।

गङ्गेशोपाध्यायानां मते सादृश्यज्ञानमात्रं करणम्, विशेषणज्ञानविधया तज्जन्यमतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्टपिण्डदर्शनं च द्वयमेव व्यापारः, गवयः, गवयपदवाच्यः इति उपमितिः फलं भवति।

In Public domain. Digitization Muthulakshmi Research Academy

इदं च उपमानं त्रिविधं भवति । १. सादृश्यविशिष्टपिण्डदर्शनम्, २. असाधरणधर्मविशिष्टपिण्डदर्शनम्, ३. वैधर्म्यविशिष्टपिण्डदर्शनं च ।

तत्र प्रथमं यथा - आरण्यकेन केनचिद् ग्रामीणायोक्तं ''गोसदृशो गवयपदवाच्य'' इति। पश्चाच्च ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टस्तत्र गोसादृश्यदर्शनं यज्जातं तदुपमिति करणम् ।

द्वितीयं यथा - भल्लूकः कीदृगिति पृष्टे ''पञ्चाङ्गुलिविशिष्टपाद चतुष्टयसम्पन्नो लम्बनासिकालसन्मुखो दीर्घोऽनत्युच्चतरः कृष्णदीर्घरोमाकुलितशरीरो भल्लूकः'' इति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे तादृशाऽसाधारणधर्मविशिष्टपिण्डं पश्यति, तत उपदेशवाक्यार्थस्मरणं, ततो ''भल्लूको भल्लूकपदवाच्य'' इत्युपमितिर्भवति।

तृतीयं यथा - सिंहः कीदृगिति पृष्टे ''करशृङ्गपक्षखुरादिविरहितशरीर'' इति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे करशृंगादिधर्मविरुद्धधर्मविशिष्टपिण्डदर्शनं करोति, तत उपदेशवाक्यार्थस्मरणं भवति, ततः ''सिंहः सिंहपदवाच्य'' इति उपमितिर्जायते।

उपमानप्रमाणस्य प्रमाणान्तरत्वम्

गौतमीयैः उपमानस्य पृथक् प्रमाणत्वमभ्युपगम्यते । वैशेषिकादिभिः प्रमाणस्यास्य पृथक् प्रमाणत्वं नाङ्गीक्रियते। अपि तु प्रत्यक्षादौ एव तस्यान्तर्भावो भवतीति कथ्यते । तत्र काणादाः उपमानस्य अनुमानेऽन्तर्भावमभ्युपगच्छन्ति।

उपमानस्यानुमानान्तर्भावः इत्थं भवति - यथा अनुमाने प्रत्यक्षेण धूमेन अप्रत्यक्षस्य वह्नेः सिद्धिर्भवति। तथोपमानेऽपि प्रत्यक्षेण गवा गवयपदवाच्यत्वरूपेण अप्रत्यक्षस्य गवयस्य सिद्धिर्भवति। अनुमानप्रकारस्तु ''गवयः गवयपदवाच्यः गोसादृश्यात् '' इति। अनेन अनुमानेन ''गवयपदवाच्यत्वव्याप्यगोसादृश्यवान्गवयः'' इति परामर्शोत्तरं ''गवयः गवयपदवाच्यः'' इति अनुमितिरुत्पद्यते। अतः अस्य उपमानप्रमाणस्य अनुमाने एव अन्तर्भावः भवतीति न उपमानप्रमाणस्य पृथक् प्रमाणत्वम् इति चेत् - उपमानेन गवये गवयशब्दशक्तिर्गृह्यते । अनुमानं च न तादृशशक्तिग्राहकं भवति । गवयसादृश्यं च गोनिष्ठं तच्च गोदर्शनकाले ग्रहीतुं न शक्यते । तदानीं प्रत्यक्षेण गवयस्यादृष्टत्वात् गवयप्रतियोगिकस्य गोनिष्ठसादृश्यस्य ग्रहणासम्भवात् । गवयदर्शनकाले च गोरेवाप्रत्यक्षत्वेन तन्निष्ठसादृश्यस्याप्रत्यक्षत्वादिति न उपमाने प्रत्यक्षेणाप्रत्यक्षप्रतिपत्तिः सम्भवति । येन अनुमाने प्रमाणस्यास्य अन्तर्भावः स्यात् । अतः अनुमानाद् भिन्नमेवेदम् उपमानप्रमाणम्।

अनुमानं च स्वार्थं परार्थमिति द्विविधं भवति । उपमानन्तु परार्थमेव भवति । अतः अनुमानात् भिन्नमेवोपमानम् । परार्थोपमानं च यथा - यस्य पुरुषस्य गवयादिज्ञानं नास्ति तस्य तद्विषयकज्ञानार्थं

In Public domain. Digitization Muthulakshmi Research Academy

गवादि प्रसिद्धसादृश्येन गवयादिशब्दशक्तिग्रहाय उपमानं प्रयुज्यत इति तत्स्वरूपम् । अतः प्रमाणमिदं स्वार्थाय नोपयुज्यते ।

उपमानं स्वार्थायापि भवति यथा स्वयमध्यवसायात् यथा गौरेवं गवयः इति स्वयम् अध्यवसायेन अस्य स्वार्थं भवति इति चेत् - एतादृशप्रतीतिस्तु ज्ञातविषयकत्वात् नोपमानं प्रमाणमत्र प्रवर्तते । प्रमाणस्य प्रयोजनं च अज्ञातज्ञापनमेव। अतः उपमानप्रमाणं परार्थमेव भवतीति उपमानम् अनुमानाद्भिन्नमेव।

एवं "यथा गौस्तथा गवयः" इत्येवमुपमाने "तथा" इत्यादि शब्दैरुपसंहारो भवति । अनुमाने च तथा न भवतीति अनुमानोपमानयोर्भेदः वर्तत इति उपमानं पृथक् प्रमाणमिति अङ्गीकार्यमेव ।

एवं च अक्षपाद, वात्स्यायन, उदयनाचार्यादिभिः शक्तिग्रहादि अनेकविध प्रयोजकत्वमुपमाने अस्तीति उपमानं प्रमाणेषु अन्यतमत्वेन परिगीयते ।

॥ इति शम्॥

उपयुक्तग्रन्थसूची

१. न्यायभाष्यम् - वात्स्यायनः, बौद्धभारती वाराणसी, १९९८.

२. न्यायभाष्यवार्तिकम् - भारद्वाजोद्योतकरः, भारतीयदार्शनिकानुसन्धानपरिषत्, १९९७.

३. न्यायमञ्जरी - जयन्तभट्टः, चौखम्बा संस्कृत सीरीज् आफिस, वाराणसी, १९७१.

४. न्यायसिद्धान्तमुक्तावली - विश्वनाथपञ्चाननल भट्टाचार्यः, चौखम्बा संस्कृत संस्थान,वाराणसी, २००३.

५. न्यायमीमांसादर्शनयोः प्रमाणविचारः - डॉ.एस्.बि.रघुनाथाचार्यः, पद्म श्री पब्लिकेशन्स्, तिरुपतिः, १९८३.

In Public domain. Digitization Muthulakshmi Research Academy

The Role of Pramāṇa in Indian Philosophy

Sri Kuppa Kumara Swamy Sastry

Abstract:

Upaniṣads, Śrīmadbhagavadgītā and Brahmasūtras termed the Prasthāna-trayam form the basis of Indian Philosophy. Upaniṣads (also termed Vedānta) answer the critical question of 'why?', laying the foundation, Bhagavadgītā compiles different interpretations from different periods and Brahmasūtras elaborated by revered Sri Ādiśaṅkarācārya establish the last known and recognized complete and correct interpretation of the 'Why', 'What', 'Who' and 'How' of Knowledge.

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेति तत्वतः।। (भ.गी.७.३)

It is no secret that 'only one among the many' understands knowledge (also termed Brahman); passing a message that there are filters that are progressively complex and enlightening.

अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्, तत्तु समन्वयात्। (ब्रह्मसूत्रं-चतुःसूत्री)

Historically and in the contemporary world it is evident that there are distinct characteristics that separate the 'unique' from the 'common'. It is obvious that attributes like 'the quest - Jijñāsā', 'for the whole - Janmādyasya', 'by reference - Śāstrayoniḥ' and 'by correlation - Samanvayaḥ' offer a model for knowledge acquisition that is the supreme goal or delivers it. Together these verses suggest a rational model for achieving the supreme goal.

Indian Philosophy is a compendium of Darśanas (knowledge works) of teachers ranging from Cārvāka through Buddha, Jaina, Rāmānuja, Jaimini, Kapila to Śrī Ādiśaṅkara. They interpreted Upaniṣads based on the framework of Pramāṇas and offered conclusions that had a significant impact on the contemporary society.

Director, Projects CTS India, Hyderabad.

The interpretations depended on acceptance and/or rejection of certain Pramāṇas. E.g. the Cārvāka (lokayata) Darśana accepted only Pratyakṣa and concluded with a negation of the existence beyond life. Śrī Ādiśaṅkara's Advaita and Jaimini's Pūrvamīmāṃsā accepted all six Pramāṇas - Pratyakṣa, Upamāna, Anumāna, Śabda, Arthāpatti and Anupalabdhi to develop well defined, all-inclusive logical view of life.

The other Darśanas accepted a combination of the Pramāṇas developing intermediate Śrī Sāyanamādhavācārya in his 'Sarvadarśanasaṅgraḥ' gives this progressively maturing view of the Darśanas illustrated besides.

Starting with Pratyakṣa, acceptance of additional Pramāṇas helped attain more refined knowledge until one reaches the Brahmātmaika Sthiti or the Svānubhava Sthiti.



Pramāṇarahita Brahmātmaikasthiti

A cursory view into the analytical foundations, structured rational thinking, well-faceted knowledge and varying levels of enlightenment in Indian Philosophy show how man always asked the questions - why, who and how? Responses to them needed to be tested against valid Pramāṇas. Contrary to popular belief, Indian Philosophy based on Pramāṇas presents itself as a rational science and builds a coherent model in man's quest for excellence.

1. Introduction to Indian Philosophy

Vedas (to know) defined as - प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता। (श्री सायणाचार्य - ऋग्वेदभाष्यम्) divided as Mantra, Brāhmaṇa, Āraṇyaka, Dharmas and Dharmasūkṣmas provide a structured foundation to Indian Philosophy. Divided into 4 branches and 1080 Śākhās,

ऋग्वेदस्य तु शाखास्स्युरेकविंशतिसंख्यया
नवाधिकशतं शाखा यजुषो मारुतात्मज।

In Public domain. Digitization Muthulakshmi Research Academy

सहस्रसंख्यया जाता शाखाः साम्नः परंतप
अथर्वणस्य शाखास्स्युः पञ्चाशद्भेदतो हरेः।। (मुक्तिकोपनिषद्)

they provide referenceable knowledge not known by direct perception or by inference.

Upaniṣads at the end of Vedas help define the paradoxes inherent in Vedas. Concluding the finer meaning and establishing logical end-points, Upaniṣads form the critical foundations for Indian Philosophy. Two examples from 'Aitareya' and 'Kena' Upaniṣads evidence 'the Whys' of basic Dharmas ad illustrate their importance.

सा भावयित्री भावयितव्या भवति तं स्त्री गर्भम्
बिभर्ति सोऽग्रे एव कुमारं जन्मनोऽग्रे
ऽधि भावयति। सयत्कुमारं जन्मनोऽग्रेऽ
धि भावयति आत्मानमेव तद्भावयति ए-
षां लोकानां सन्तत्या एवं सन्तता हि
इमे लोकाः तदस्य द्वितीयं जन्म।। (ऐ.ब्रा.२.२.३)

'The woman bears the sperm of her husband; nurtures it; and hence he needs to protect her' - Why? - 'because this world has to be sustained'.

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये
महीयध्वमिति ततोहैव विदाञ्चकार ब्रह्मेति।। (के.उ.४)

The power that Agni, Vāyu, Indra could not overcome is the Brahman emphasizing the need to respect and service our progenitors and be Humble.

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्।।
एवं परम्पराप्राप्तं इमं रजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परन्तप।।

Bhagavadgītā (verses 4.1,4.2) suggest that the knowledge transferred through generations is lost. Indian Philosophers to explain the paradoxes and fill the gaps of lost knowledge through Darśanas. In the process, they heavily

In Public domain. Digitization Muthulakshmi Research Academy

influenced contemporary social thinking. Sixteen of them summarized in the "Sarvadarśanasaṅgrahaḥ" by Śrī Sāyaṇa Mādhavācārya assume significance.

2. Pramāṇas

Society always has the challenge in accepting new hypotheses especially when they propose tenets that go against the past. The new hypothesis had to be defined within a conceptual framework that stands evaluation against a set of valid parameters either by acceptance or denial. Six such parameters termed Pramāṇas formed the conceptual evaluation framework. The hypothesis, the conceptual framework, the evaluation and conclusion them formed the Darśana.

S.No.	Pramāṇa	Definition
1.	Pratyakṣa (perception)	Knowledge perceived by the outward senses (skin, eyes, ears, nose, tongue)
2.	Anumāna (inference)	Knowledge not directory perceived but developed based on previous experiences and related contexts (e.g.Infer fire where you see smoke)
3.	Upamāna (analogy)	Knowledge based on related patterns and forms.
4.	Śabda (Āptavacana, scriptural source/authority)	Knowledge based on faith and belief in ancestral experiences and hence scriptures they handed over to us.
5.	Arthāpatti (presumption)	Knowledge developed as a combination of experiences and conjunctive statements. (e.g.Devadatta is healthy but does not eat during the day. First statement implies a conclusion - healthy people eat during day. Second statement negates it and helps develope a new conclusion - Devadatta might be eating during the night.)

In Public domain. Digitization Muthulakshmi Research Academy

6.	Anupalabdhi (non-apprehension)	Knowledge developed as ~P (negation of a statement) implies ~Q (negation of related statement). (e.g. the pot is not here; because it is not visible. This is based on the assumption - if the pot was here, it would be visible)

3. Modern Science, Hypothesis Testing and Darśanas

Modern Rational science lays emphasis on 'logic and reason' proposes a structured approach to accept new hypothesis. Anything that does not stand to reason and evidenced is considered unacceptable for larger use. The hypothesis has to go through a process of evaluation.

1. Hypothesis or Proposition (Uddeśya)
2. Conceptual Framework or Definition of Terms (Prāmāṇya)
3. Interpretation or Evaluation (Siddhānta against accepted Pramāṇas)
4. Origins (Śāstra Yoniḥ)
5. Controversies
6. Conclusions

As science evolved through the 19th and 20th centuries, a larger emphasis was also place on evidencing the conclusions making it the seventh element.

The sixteen Darśanas map one to one with the above structured evaluation, framework or rational science. The conceptual frameworks they developed in the process formed the knowledge banks for future generations. The interpretations and the conclusions formed the associated wisdom and heavily made use of the Pramāṇas. The table below summarized the sixteen Darśanas.

In Public domain. Digitization Muthulakshmi Research Academy

S.No.	Darśana	Pramāṇas accepted	Core Theme
1.	Cārvāka	Pratyakṣa	Rejection of Vēdaprāmāṇya, Encourage people to make the best use of their life.
2.	Bauddha	Anumāna	Suggest Vedas as cause of all misery in the world, Propose ways to eliminate the cause and Pave the way for elimination of misery.
3.	Jaina (Arhata)	Anumāna, Upamāna	Pure cause and effect might negate the purpose of all acts. Proposes the existence of life after life Elaborates Syādvāda - a set of 7 postulates. Make Philosophy spiritual to influence society positively.
4.	Rāmānuja (Viśiṣṭādvaita)	Pratyakṣa, Śabda	Raises the question on existence vs.non-existence. Establish the Sat (Supreme Lord). Eliminate doubt. Revert people back to Vedas.
5.	Pūrṇaprajña (Madhvācārya)	Pratyakṣa, Śabda, Upamāna	Laid to base to Vaiṣṇava, Śaiva division.
6.	Nakulīśa Pāśupata	Anumāna, Śabda	Reject Viṣṇu as Supreme Lord, Propose Lord Śiva as the Supreme Lord, Paved the way for religious wars in India.
7.	Śaiva	Anumāna	Establish God as the Creator, Ruler and Destroyer. Explains Vidyā, Yoga, Kriyā, and Caryā. Describe God as deliverer of results for people's acts. People are slaves of destiny and listen to learned.
8.	Pratyabhijñā	Pratyakṣa, Upamāna, Śabda	Protect God from criticism for delivering good and bads. Stop people from getting enslaved by destiny.

In Public domain. Digitization Muthulakshmi Research Academy

			Define Maheśvara as independent, achievable and ultimate goal for any human. God is more accessible and leads the man to call himself a reflection of God. (Īśvaroham)
9.	Rasēśvara	Upamāna	Propose Mōkṣa as achievable during life and not after. Establish human body as a combination of Rasa (from Śiva) and Abhraka (from Gauri). Propose 18 Rasakramās helping with Svānubhava.
10.	Vaiśēṣika (Oulūkya, Kaṇāda)	Pratyakṣa, Anumāna, Śabda	Understand matter to achieve Ātmasvarūpajñāna. Purpose 7 forms of matter. Shift philosophy to understand matter and consciousness.
11.	Akṣapāda (Nyāya, Gautama)	Pratyakṣa, Anumāna, Śabda, Upamāna	Describe Pramā (Real knowledge or understanding of matter) as the thing that could be known by Pramāṇa, Defined in 5 parts - section 1 of 2 parts describing on logic (laws) based on 9 Lakṣaṇas and 7 Vedas. Section 2 of 3 parts describing knowledge known from these laws (Prameya).
12.	Jaimini	Pratyakṣa, Śabda, Anumāna, Upamāna, Arthāpatti,	Explained in 12 parts, Re-establish Śrutis (Vedas/Dharmas) at the root of salvation. Raise the question of superiority - Jñāna or Karma?
13.	Pāṇini (Vyākaraṇa)	Anupalabdhi Śabda, Arthāpatti	Language and Grammar helps to define order Propose Vyākaraṇaśāstra as the means of interpreting Vedas and understand knowledge.

In Public domain. Digitization Muthulakshmi Research Academy

14.	Sāṅkhya (Kapila) Pariṇāmavāda	Pratyakṣa, Anumāna, Śabda .	Propose Matter (Padārtha) explained as Pradhāna and Prakṛti. Describe matter as 24 attributes, notion of transformation and appearance of different forms of matter. Nirīśvaravāda - Jīva (Puruṣa) as 25th attribute close to laws of conservations of matter and energy.
15.	Yōga (Patañjali)	Anumāna, Śabda, Arthāpatti	Extend Sāṅkhya, Promotes Seśvaravāda. Explain Īśvara as the 26th attribute different from Jīva. Explain methods to achieve by techniques and means.
16.	Advaita (Ādiśaṅkara)	Pratyakṣa, Anumāna, Upamāna, Śabda, Arthāpatti, Anupalabdhi	Address the unenviable need to bring together ♦ Acceptance against Rejection, ♦ Vaiṣṇava, Śaiva and a host of other religions, ♦ Logic/Reason, Language, Grammar and ♦ Karma/Dharma or Jñāna. Use inclusively and progressivity of knowledge establish oneness (Ēkamēvā'dvitīyaṃ Brahma). Establish this realization as the goal of all Darśanas.

Without relevance to chronology, Indian Philosophy can be depicted as different stages illustrated below.

In Public domain. Digitization Muthulakshmi Research Academy



4. Darśanas, Relevant Pramāṇas and References

The sub-sections below bring sample references to establish 'Pramāṇas' in different Darśanas.

4.1. Cārvākadarśana

Accepting only Pratyakṣapramāṇa, the verses below summarize Cārvāka darśana.

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।
अग्निहोत्रं त्रयो वेदाः त्रिपुण्ड्रं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः।
यावज्जीवेत्सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्।।

4.2. Bauddhadarśana

Bauddhadarśana based on Duḥkhaḥ (sorrow) evolved to address the need to eliminate sorrow.

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमौ दर्शनान्न तु दर्शनात्।।

In Public domain. Digitization Muthulakshmi Research Academy

यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च।
भावा अमी, शक्तिरिहार्थ कर्मणि।।
परिव्राट् कामुकशुनामेकस्यां प्रमदातनौ।
कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पनः।।
रागादित्रानसन्तानवासनोच्चेदसम्भवा।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता।।

Through Anumāna, Buddha proposes that this world is a combination of causes, effects and contexts and temporary. Elimination of sorrow is possible through elimination of causes.

4.3. Arhatādarśana

Arhatādarśana or Jainism proposes that there is something permanent and explains that intellectuals that adopt a way of life defined by the 'Ratnatraya' (Samyag-darśana, Samyagjñāna, Samyagcaritra) will attain Mōkṣa (a state of no return).

Arhatādarśana adopts Anumāna and Upamāna illustrated by the below two statements.

यद्यात्मा कश्चित् नास्थीयेतस्थायी तदा ऐहलौकिक पारलौकिक फलसाधनसम्पादनं विफलं भवेत्।

उदबिन्दौ च सिन्धौ च तोयभावो न भिद्यते।
निरस्तेऽपि ततो बिन्दावस्ति तस्यान्वयोऽम्बुधौ।।
सर्वत्र जितरागादि दोषत्रैलोक्य पूजितः।
यथा स्थितार्थवादी च देवोऽर्हन् परमेश्वरः।।

The conceptual framework of Arhatādarśana has seven attributes that determine the permanent thing, four constraints, eighteen defects and eight (Karmas) activities. Rejecting Vedaprāmāṇya in favor of Syādvāda or reason, Arhatā initiated later day debate on definition of God.

4.4. Rāmānujadarśana

Proposing full faith in the Pratyakṣa and the Śabda Pramāṇas, the Viśiṣṭā-dvaitadarśana of Rāmānuja through references to Purāṇas, Smṛtis and Bhagavad-

In Public domain. Digitization Muthulakshmi Research Academy

gītā explains the Supreme or Permanent being as God. HE creates multiple lives and delivers results of their acts.

ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः।
ईश्वरश्चिदिति प्रोक्तो जीवः दृश्यमचित्पुनः।।
वासुदेवः परं ब्रह्म कल्याणगुणसंयुतः।
भुवनानामुपादानं कर्ता जीवनियामकः।।

A clear proposition of this Darśana is the separation of Jīva (man) from God. Rāmānuja's conceptual framework involved 5 forms of God - Arcā, Vibhava, Vyūha, Sūkṣma and Antaryāmi. Focusing on defining God and his exclusiveness, Rāmānuja emphasizes Karma, limiting man to levels below God and defines Mōkṣa as reaching God by doing things (termed Upāsana) that reduce the Pāpa (wrong).

4.5. Pūrṇaprajñadarśana

Expanding on cause-effect relationship and their clear separation, Dvaita-darśana separates God as the perfect being and proposes his independence through the use of Śabda and Upamāna Pramāṇas.

स्वतन्त्रं परतन्त्रं च द्विविधं तत्त्वमिष्यते।
स्वतन्त्रो भगवान् विष्णुः निर्दोषोऽशेश सद्गुणः।।
घातयन्ति हि राजानो राजानमिति वादिनः।
ददत्यखिलमिष्टं च स्वगुणोत्कर्षवादिनाम्।।

Citing Purāṇas, the dedication of the man is defined through three terms- Aṅkaṇa, Nāmakaraṇa and Bhajana. Bhajana (Seva) is defined as 10 forms - Satya, Hitavacana, Priyavacana, Svādhyāya, Dāna, Rakṣā, Sarvarakṣā, Dayā, Āsakti and Śraddhā. Mokṣa (or Mukti) is defined as reaching close to Viṣṇu and living by his side.

विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः।
निर्दुःखानन्दबुद्धिनित्यं तत्समीपे स मोदते।।

4.6. Nakuliśa Pāśupatadarśana

Citing सेवकाः मुक्ताः न भवन्ति। परमैश्वर्यरहितत्वाद्धा, वद्ध जीववत्। Nakuliśa Pāśupata

In Public domain. Digitization Muthulakshmi Research Academy

builds up a model based on Lord Śiva. Termed as the Pañcārthaśāstra, it adopts a conceptual framework of five terms- Kārya, Kāraṇa, Yoga, Vidhi, Duḥkhānta as the means to knowledge, eight attributes - Lābha, Mālā, Upāya, Deśa, Avasthā, Viśuddha, Dīkṣā, Bāla and three Vṛttis, this Darśana proposes Guru as the means to supreme knowledge.

Nakuliśa Pāśupata bases itself on Anumāna and Āptavacana (Śabda) and proposes that mere knowledge is not sufficient, mere Upāsana (and attempts to see God through it) is not sufficient but rather following the Gurūpadiṣṭaśāstra to conclude on the supreme being is the way.

ज्ञानमात्रे वृथा शास्त्रं साक्षाद्दृष्टिस्तु दुर्लभः।
पदार्थादन्यतो नास्ति यथावत्तत्त्वनिश्चयः।।

4.7. Śaivadarśana

Śaivadarśana proposes God as constrained and dictated by the acts of Man to deliver appropriate results. It focuses on the creation attribute of God with the conceptual framework involving Pati (Śiva), Paśu (Man), four types of Pāśa (Mālā, Karma, Māyā and Rodha) and four sections - Vidyā, Yoga, Kriyā and Caryā.

Based on Anumānapramāṇa, Śaivadarśana defines God (Śiva) as creator, ruler, destroyer, consumer and deliverer. In a similar but variation of Vaiṣṇava theory, Śaivadarśana establishes God as the one who deploys great people (Muktajanaḥ or Samāptakaluṣaḥ) to different places. Śaiva proposes God (Pati), Vidyā, Avidyā, Man (Paśu), Kaluṣaḥ (Pāśa) and Paths (ways to break Pāśas) towards achieving larger goals of life under the rule of the God.

4.8. Pratyabhijñā Darśana

Pratyabhijñā Darśana promotes a new, easy way to achieve life's and heavenly goals (Mōkṣa). When God can be identified through experience (Pratyakṣa), analogy (Upamāna) and Śāstras (Śabda), why should one go through the harder ways of Yoga, Kriyā and Caryā? Recognizing all worldly objects as attributes

In Public domain. Digitization Muthulakshmi Research Academy

of God, this Darśana rejects all Pramāṇas once you build faith/belief through supreme knowledge and realize that 'I am God, not different'.

परे माहेश्वराः प्रत्यभिज्ञशास्त्रमभ्यसन्ति।

There could be multiple ways of realization, the chief among them being Pratyakṣa Anubhava, Śabdārtha or Gurūpadeśa.

4.9. Raseśvaradarśana

Rasēśvaradarśana proposes Jīvanmukti. It prescribes stable and healthy body to achieve Mokṣa and suggests that body has to be protected through Rasa and Rasāyaṇa. A basic prerequisite then becomes the knowledge of this body or self.

इति धनशरीरभोगान्मत्वाऽनित्यान् सदैव यतनीयम्।
मुक्तौ सा च ज्ञानात्, तच्चाभ्यासात् स च स्थिरे देहे।।

It adopts the Upamāna Pramāṇa to demonstrate the possibility of Jīvan-mukti.

अभ्रकस्तव बीजं तु मम बीजं तु पारदः।
अनयोर्मेलनं देवि मृत्युदारिद्र्य नाशनम्।।

देवाः केचिन्महेशाद्याः, दैत्याः काव्यपुरस्सराः, मुनयो वालखिल्याद्याः, नृपाः सोमेश्वरादयः..., एतेऽन्ये बहवः सिद्धाः जीवन्मुक्ताश्चरन्ति हि, तनुं रसमयीं प्राप्य.....।

Once purified, the body will achieve the higher state as evidenced by people who achieved it. At this point, the achiever is as alive as anybody else.

4.10. Vaiśēṣika(Oulūkya)Darśana

Vaiśēṣika(Oulūkya)Darśana of Kaṇāda theorized that unless one under-stands the various forms of matter and the laws governing them one cannot get the knowledge of self. This understanding is made possible by three forms of learning - Śravaṇa (listening from Gurus or learning from Śāstras), Manana (thinking) and Bhāvana (repeated review as a habit).

In Public domain. Digitization Muthulakshmi Research Academy

आगमेन अनुमानेन ध्यानाभ्यास बलेन च।
त्रिधाः प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्।।

Based on Pratyakṣa, Śabda and Anumāna, Kaṇāda proposed a conceptual framework with ten chapters covering seven forms of matter (Padārthas) - Dravya, Rūpa, Guṇa, Karma, Sāmānya, Viśeṣa, Samavāya. Kaṇāda then explicity adopts the model of proposition (Uddeśya), laws or properties (Lakṣaṇa) and hypothesis testing or evaluation (Parīkṣā) as a means to establish hid Darśana.

4.11.Akṣapādadarśana

Akṣapādadarśana of Sage Gautama similar to Oulūkya proposes elimination to sorrow (Duḥkhaḥ) through knowledge of matter as key to Mōkṣa. Adopting a framework divided into two sections, Gautama defines Pramāṇas in the first part and Prameyas (known through Pramāṇas) in the second part.

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः।

In this very elaborate Darśana, Gautama goes on to define two types of evidences (Dṛṣṭāntas), four types of Siddhāntas, eleven forms of Tarka, four types of Nirṇaya, five types of Hetvābhāsa (that does not allow you to conclude), three types of Chala (Distractions), twenty four forms of Jātibhedas (those that enable you to prove) and twenty two forms of Nigrahasthānas (those that could cause you to fail). Also termed Nyāyaśāstra, this forms an important branch of philosophical studies by virtue of the level of detail that it describes.

4.12. Jaiminidarśana

Built on the foundations of the Karmas and Dharmas proposed in the Vedas, Jaiminidarśana in centered around establishing Dharmānuṣṭhāna as the way to attain Mokṣa. Also termed Pūrvamīmāṃsā, this Darśana describes Dharmalakṣaṇa and related Pramāṇas in twelve chapters. In Sūtra 3.3.14 Jaimini explains- श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यतमर्थविप्रकर्षत्। when a question arises

In Public domain. Digitization Muthulakshmi Research Academy

on the purpose of an object (god, ritual, etc.) and what it supports or where it belongs, Pramāṇa helps in deciding. When multiple Pramāṇas apply to a context, then the Pramāṇa that comes first is the strongest. In a way, order of occurrence is established as pre-eminent. With this definition, Jaimini establishes Pramāṇa as the critical foundation of the philosophy.

Establishing performance of Karma in line with Vedas as the supreme duty of man, Jaimini or Pūrvamīmāṃsā Śāstra proposes Śruti (Veda) as Svataḥ Pramāṇa and elaborates its aspects comprehensively in about thousand Adhikaraṇas. Through these, Jaimini establishes a framework for interpretation of the Vedas and elimination of contradictions as they occur. In essence, this Darśana accepts and defines all six Pramāṇa.

4.13. Pāṇinidarśana

While Vedas provide the means to achieve supreme knowledge, how can one interpret and do what is right? Pāṇinidarśana (Vyākaraṇaśāstra) proposes to fill this gap. Picking up from the Jaimini Darśana where Krama (order) is defined as important, how one knows which comes first and which comes later in a word. (Prakṛti, Pratyaya, Vibhāga).

लौकिक व्यवहारेषु यथेष्टं चेष्टतां जनः, वेदिकेषु तु मार्गेषु वेशेषोक्ति प्रवर्तताम् इति पाणिनि-सूत्रानामर्थवत्त्वमसौ यतः, जनिकर्तुरिति ब्रूते तत्प्रयोजक इत्यपि।

Describing the goal of Śabda as defining 'Sattā', Pāṇini explains Brahman as -

अनादिनिधनं ब्रह्म शब्दतत्त्वं तदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

Sattā can be decided only by means of similar 'Asatya' objects. Based on their foundation, Śabda decides the 'Sattā' (Satya).

सत्यं वस्तु तदाकारैरसत्यैरवधार्यते।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते।।

In Public domain. Digitization Muthulakshmi Research Academy

अध्रुवेण निमित्तेन देवदत्तगृहं यथा।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते।।

Based entirely on the Śabdapramāṇa (or Āptavacana), Pāṇini establishes Vyākaraṇa as the first step towards achieving Bliss (Mokṣa).

4.14.Sāṅkhyadarśana

Sāṅkhyadarśana proposes 'Pariṇāmavāda' and postulates that matter transforms and presents itself in various forms. It can be in original form (Prakṛti), fully transformed (Vikṛti), partially transformed (Prakṛti, Vikṛti). However it cannot be in two forms at the same time. The original form is called Mūlaprakṛti (also called Pradhāna) and is responsible for the creation of every other form described as 24 Tattvas. The Puruṣ (Jīvātmā) is proposed as the 25th tattva. Beyond this, there is no other element called God.

महदादिकार्यं सुखदुःखमोहात्मकद्रव्यकार्यम्, कार्यत्वे सति सुखदुःखमोहात्मकत्वात् वस्त्रादि कार्य-भूतशय्याऽसनादिवत्।

Defining Puruṣ as one that is imperceptible to the Indriyas (using a common law - the one that is born cannot understand its parent in full and will get subsumed when it is time), a form of energy, omnipresent, propertyless, attributeless, static, permanent, omniscient, consumer and one that loves the body, Sāṅkhya lays its foundations on 3 Pramāṇas - Pratyakṣa, Anumāna, Āptavacana (Śabda).

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्, त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्दि।

4.15.Patañjali Yogadarśana

Yogadarśana is a variation of Sāṅkhyadarśana proposing Sēśvarasāṅkhya. What makes special of this Darśana is its emphasis of realizing God through Yoga defined as योगः चित्तवृत्तिनिरोधः।

The conceptual framework of Yoga is in four sections - Samādhi, Sādhana, Vibhūti and Kaivalya. It proposes that Yogic methods enable one to attain Īśvara and is best described by Sādhana explained as three forms - Svādhyāya, Īśvara Praṇidāna and Kriyāyoga.

In Public domain. Digitization Muthulakshmi Research Academy

Based on several scriptures primarily Viṣṇupurāṇa, Yogadarśana proposes पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं, स्वरूपप्रतिष्ठा वा चितिशक्तिः। Having accomplished their tasks, Indriyas merge into Pradhāna, release from Buddhi and return back to its original form with no relationship with the matter. The Seśvara concept allows Yoga to depend on Pratyakṣa and Śabda as the Pramāṇas to depend upon. Its dependence on Anumāna is based on its acceptance of the foundational aspects of the Sāṅkhyadarśana.

4.16. Ādiśaṅkara - Advaitadarśana

Ādiśaṅkaraproposes the world as 'Bharantī' and proposes Brahman as one with no Saṅkalpa or desire.

विवर्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः।
अनादिवासनोद्भूतो न सारूप्यमपेक्षते।।

(Śabdapramāṇa- easy to understand for those who worked with Vedāntaśāstra).

The conceptual framework of the Advaitadarśana is explained in four chapters -

- Samanvaya - all Vedāntas and Upaniṣads are aimed towards Brahman.
- Avirodha - this assumption includes all of Sāṅkhyavāda.
- Sādhana - approaches to achieve the Brahman (or knowledge).
- Phala - explain the various aspects related to clear statements, unclear and worshippable aspects, unclear and knowable aspects and unclear and unexplainable aspects of the Brahmasvarūpa.

Adopting the approach of inclusivity, Advaitadarśana accepts and aligns to erstwhile Darśanas where possible and rejects at places. "अविरोधस्य द्वितीयस्य प्रथमे सांख्ययोगकाणादादि स्मृतिविरोधपरिहारः, द्वितीये सांख्यादि मतानां दुष्टत्वम्, तृतीये पञ्चमहाभूत-श्रुतीनां जीवश्रुतीनां च परस्परविरोधपरिहारः, चतुर्थे लिङ्गशरीरश्रुतीनां विरोधपरिहारः, तृतीयस्य प्रथमे जीवस्य परलोकगमनागमनविचारपुरस्सरं वैराग्यम्, द्वितीये त्वम् तत्पदार्थपरिशोधनं, तृतीये सगुणविद्या-

In Public domain. Digitization Muthulakshmi Research Academy

सगुणोपसंहारः, चतुर्थे निर्गुणब्रह्मविद्यायाः बहिरङ्गान्तरङ्गाश्रमयज्ञशमादिसाधनजातं, चतुर्थस्य प्रथमे ब्रह्म-साक्षात्कारेण जीवितः पापपुण्यक्लेशवैधुर्यलक्षणा मुक्तिः, द्वितीये मरणोत्क्रमणप्रकारः, तृतीये सगुणब्रह्मो-पासकस्य उत्तरमार्गः, चतुर्थे निर्गुणसगुणब्रह्मविदो विदेहकैवल्यब्रह्मलोकावस्थानि, तदित्थं ब्रह्मविचार-शास्त्राध्यायपादार्थसंग्रहः।"

By this inclusivity Advaitadarśana leverages all six Pramāṇa. Through the four chapters, dependence on Pramāṇas, inclusivity, exclusivity and definition of new terms like Adhyāsa, Śaṅkara relates Mokṣa to Adhikāra and concludes that the knowledge of Brahman itself is the purpose of whole Vedānta and this knowledge brings with it attendant benefits on the way.

अज्ञातं विषयो ब्रह्म ज्ञातं तच्च प्रयोजनम्।
मुमुक्षुरधिकारी स्यात् सम्बुद्धः शक्तितः श्रुतेः।।

5. Conclusions

